श्रीमद्भावमिश्रप्रणीतः

भाव प्रकाशः पूर्व खण्डम्

गजमुखममरप्रवरं सिद्धिकरं विघ्नहर्तारम्
गुरुमवगमनयनप्रदमिष्टकरीमिष्टदेवतां वन्दे १

आयुर्वेदागमनं क्रमेण येनाभवद्भूमौ
प्रथमं लिखामि तमहं नानातन्त्राणि संदृश्य २

आयुर्हिताहितं व्याधेर्निदानं शमनं तथा
विद्यते यत्र विद्वद्भिः स आयुर्वेद उच्यते ३

अनेन पुरुषो यस्मादायुर्विन्दति वेत्ति च
तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः ४

विधाताऽथर्वसर्वस्वमायुर्वेदं प्रकाशयन्
स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुम् ५

ततः प्रजापतिं दक्षं दक्षं सकलकर्मसु
विधिर्धीनीरधिः साङ्गमायुर्वेदमुपादिशत् ६

अथ दक्षः क्रियादक्षः स्ववैद्यौ वेदमायुषः
वेदयामास विद्वांसौ सूर्यांशौ सुरसत्तमौ ७

दक्षादधीत्य दस्रौ वितनुतः संहितां स्वीयाम्
सकलचिकित्सकलोकप्रतिपत्तिविवृद्धये धन्याम् ८

स्वयम्भुवः शिरश्छिन्नं भैरवेण रुषाऽथ तत्
अश्विभ्यां संहितं तस्मात्तौ जातौ यज्ञभागिनौ ९

© 2003 Cosmic Software and Vedic Engineering. This text is made available exclusively for on-line use, and for printing individual copies for personal use. Distribution of hard copies, or distribution of electronic files via the internet is expressly prohibited. For licensing, and for an editable text version on CD-ROM, please contact cssetzer@yahoo.com.

देवासुररणे देवा दैत्यैर्ये सङ्गताः कृताः
अङ्गतास्ते कृताः सद्यो दस्राभ्यामद्भुतं महत् १०

वज्रिणोऽभूद् भुजस्तम्भः स दस्राभ्यां चिकित्सितः
सोमान्निपतितश्चन्द्रस्ताभ्यामेव सुखी कृतः ११

विशीर्णा दशनाः पूष्णो नेत्रे नष्टे भगस्य च
शशिनो राजयक्ष्माऽभूदश्विभ्यां ते चिकित्सिताः १२

भार्गवश्च्यवनः कामी वृद्धः सन् विकृतिं गतः
वीर्यवर्णस्वरोपेतः कृतोऽश्विभ्यां पुनर्युवा १३

एतैश्चान्यैश्च बहुभिः कर्मभिर्भिषजां वरौ
बभूवतुर्भृशं पूज्याविन्द्रादीनां दिवौकसाम् १४

संदृश्य दस्रयोरिन्द्रः कर्माणयेतानि यत्नवान्
आयुर्वेदं निरुद्वेगं तौ ययाचे शचीपतिः १५

नासत्यौ सत्यसन्धेन शक्रेण किल याचितौ
आयुर्वेदं यथाऽधीतं ददतुः शतमन्यवे १६

नासत्याभ्यामधीत्यैव आयुर्वेदं शतक्रतुः
अध्यापयामास बहूनात्रेयप्रमुखान्मुनीन् १७

एकदा जगदालोक्य गदाकुलमितस्ततः
चिन्तयामास भगवानात्रेयो मुनिपुङ्गवः १८

किं करोमि क्व गच्छामि कथं लोका निरामयाः
भवन्ति सामयानेतान्न शक्नोमि निरीक्षितुम् १९

दयालुरहमत्यर्थं स्वभावो दुरतिक्रमः

एतेषां दुःखतो दुःखं ममापि हृदयेऽधिकम् २०

आयुर्वेदं पठिष्यामि नैरुज्याय शरीरिणाम्
इति निश्चित्य गतवानात्रेयस्त्रिदशालयम् २१

तत्र मन्दिरमिन्द्रस्य गत्वा शक्रं ददर्श सः
सिंहासनसमासीनं स्तूयमानं सुरर्षिभिः २२

भासयन्तं दिशो भासा भास्करप्रतिमं त्विषा
आयुर्वेदमहाचार्यं शिरोधार्यं दिवौकसाम् २३

शक्रस्तु तं निरीक्ष्यैवं त्यक्तसिंहासनः स्थितः
तमग्रे पूजयामास भृशं भूरितपःकृशम् २४

कुशलं परिपप्रच्छ तथागमनकारणम्
स मुनिर्वक्तुमारेभे निजागमनकारणम् २५

देवराज न जानासि दिव एव यतो भवान्
विधात्रा विहितो यत्नात्त्रिलोकीलोकपालकः २६

व्याधिभिर्व्यथिता लोकाः शोकाकुलितचेतसः
भूतले सन्ति सन्तापं तेषां हन्तुं कृपां कुरु २७

आयुर्वेदोपदेशं मे कुरु कारुण्यतो नृणाम्
तथेत्युक्त्वा सहस्राक्षोऽध्यापयामास तं मुनिम् २८

मुनीन्द्र इन्द्रतः साङ्गमायुर्वेदमधीत्य सः
अभिनन्द्य तमाशीर्भिराजगाम पुनर्महीम् २९

अथात्रेयो मुनिश्रेष्ठो भगवान्करुणाकरः
स्वनाम्ना संहितां चक्रे नरवर्गानुकम्पया ३०

ततोऽग्निवेशं भेडञ्च जातूकर्णं पराशरम्
क्षीरपाणिञ्च हारीतमायुर्वेदमपाठयत् ३१

तन्त्रस्य कर्त्ता प्रथममग्निवेशोऽभवत्पुरा
ततो भेडादयश्चक्रुः स्वं स्वं तन्त्रं कृतानि च ३२

श्रावयामासुरात्रेयं मुनिवृन्देन वन्दितम्
श्रुत्वा च तानि तन्त्राणि हृष्टोऽभूदत्रिनन्दनः ३३

यथावत्सूत्रितं दृष्ट्वा प्रहृष्टा मुनयोऽभवन्
दिवि देवर्षयो देवाः श्रुत्वा साध्विति चाब्रुवन् ३४

एकदा हिमवत्पार्श्वे दैवादागत्य सङ्गताः
मुनयो बहवस्तेषां नामभिः कथयाम्यहम् ३५

भरद्वाजो मुनिवरः प्रथमं समुपागतः
ततोऽङ्गिरास्ततो गर्गो मरीचिर्भृगुभार्गवौ ३६

पुलस्त्योऽगस्तिरसितो वसिष्ठः सपराशरः
हारीतो गौतमः सांख्यो मैत्रेयश्च्यवनोऽपि च ३७

जमदग्निश्च गार्ग्यश्च कश्यपः काश्यपोऽपि च
नारदो वामदेवश्च मार्कण्डेयः कपिञ्जलः ३८

शाण्डिल्यः सहकौण्डिन्यः शाकुनेयश्चशौनकः
आश्वलायनसांकृत्यौ विश्वामित्रः परीक्षकः ३९

देवलो गालवो धौम्यः काप्यकात्यायनावुभौ
काङ्कायनो वैजपेयः कुशिको बादरायणः ४०

हिरण्याक्षश्च लौगाक्षिः शरलोमा च गोभिलः

वैखानसा वालखिल्यास्तथैवान्ये महर्षयः ४१

ब्रह्मज्ञानस्य निधयो यमस्य नियमस्य च
तपसस्तेजसा दीप्ता हूयमाना इवाग्नयः ४२

सुखोपविष्टास्ते तत्र सर्वे चक्रुः कथामिमाम्
धर्मार्थकाममोक्षाणां मूलमुक्तं कलेवरम्
तच्च सर्वार्थसंसिद्ध्यै भवेद्यदि निरामयम् ४३

तपः स्वाध्यायधर्माणां ब्रह्मचर्यव्रतायुषाम्
हर्त्तारः प्रसृता रोगा यत्र तत्र च सर्वशः ४४

रोगाः कार्श्यकरा बलक्षयकरा देहस्य चेष्टाहरा
दृष्टा इन्द्रियशक्तिसङ्क्षयकराः सर्वाङ्गपीडाकराः
धर्मार्थाखिलकाममुक्तिषु महाविघ्नस्वरूपा बलात्
प्राणानाशु हरन्ति सन्ति यदि ते क्षेमं कुतः प्राणिनाम् ४५

तत्तेषां प्रशमाय कश्चन विधिश्चिन्त्यो भवद्भिर्बुधै-
र्योग्यैरित्यभिधाय संसदि भरद्वाजं मुनिं तेऽब्रुवन्
त्वं योग्यो भगवन् सहस्रनयनं याचस्व लब्धं क्रमा-
दायुर्वेदमधीत्य यं गदभयान्मुक्ता भवामो वयम् ४६

इत्थं स मुनिभिर्योग्यैः प्रार्थितो विनयान्वितैः
भरद्वाजो मुनिश्रेष्ठो जगाम त्रिदशालयम् ४७

तत्रेन्द्रभवनं गत्वा सुरर्षिगणमध्यगम्
दृष्टवान् वृत्रहन्तारं दीप्यमानमिवानलम् ४८

दृष्ट्वैव स मुनिं प्राह भगवान् मघवा मुदा
धर्मज्ञ स्वागतं तेऽथ मुनिं तं समपूजयत् ४९

सोऽभिगम्य जयाशीर्भिरभिनन्द्य सुरेश्वरम्
ऋषीणां वचनं सम्यक् श्रावयामास तत्त्वतः ५०

व्याधयो हि समुत्पन्नाः सर्वप्राणिभयङ्कराः
तेषां प्रशमनोपायं यथावद्वक्तुमर्हसि ५१

अपाठयन्मुनिं साङ्गमायुर्वेदं शतक्रतुः
जीवेद्वर्षसहस्राणि देही नीरुङ् निशम्य यम् ५२

सोऽनन्तपारं त्रिस्कन्धमायुर्वेदं महामुनिः
यथावदचिरात्सर्वं बुबुधे तन्मना मुनिः ५३

तेनायुः सुचिरं लेभे भरद्वाजो निरामयम्
अन्यानपि मुनींश्चक्रे नीरुजः सुचिरायुषः ५४

तत्तन्त्रजनितज्ञानचक्षुषा ऋषयोऽखिलाः
गुणान्द्रव्याणि कर्माणि दृष्ट्वा तद्विधिमाश्रिताः ५५

आरोग्यं लेभिरे दीर्घमायुश्च सुखसंयुतम्
आयुर्वेदोक्तविधिनाऽन्येऽपि स्युर्मुनयो यथा ५६

यदा मत्स्यावतारेण हरिणा वेद उद्धृतः
तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान् ५७

अथर्वान्तर्गतं सम्यगायुर्वेदं च लब्धवान्
एकदा स महीवृत्तं द्रष्टुं चर इवागतः ५८

तत्रलोकान् गदैर्ग्रस्तान् व्यथया परिपीडितान्
स्थलेषु बहुषु व्यग्रान् म्रियमाणांश्च दृष्टवान् ५९

तान्दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः

अनन्तश्चिन्तयामास रोगोपशमकारणम् ६०

सञ्चिन्त्य स स्वयं तत्र मुनेः पुत्रो बभूव ह
प्रसिद्धस्य विशुद्धस्य वेदवेदाङ्गवेदिनः ६१

यतश्चर इवायातो न ज्ञातः केनचिद्यतः
तस्माच्चरकनाम्नासौ ख्यातश्च क्षितिमण्डले ६२

स भाति चरकाचार्यो देवाचार्यो यथा दिवि
सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः ६३

आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन्
मुनयो बहवस्तैश्च कृतं तन्त्रं स्वकं स्वकम् ६४

तेषां तन्त्राणि संस्कृत्य समाहृत्य विपश्चिता
चरकेणात्मनो नाम्ना ग्रन्थोऽय चरकः कृतः ६५

एकदा देवराजस्य दृष्टिर्निपतिता भुवि
तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीडिताः ६६

तान्दृष्ट्वा हृदयं तस्य दयया परिपीडितम्
दयार्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह ६७

धन्वन्तरे सुरश्रेष्ठ भगवन् किञ्चिदुच्यते
योग्यो भवसि भूतानामुपकारपरो भव ६८

उपकाराय लोकानां केन किं न कृतं पुरा
त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरूपवान् ६९

तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपो भव
प्रतीकाराय रोगाणामायुर्वेदं प्रकाशय ७०

इत्युक्त्वा सुरशार्दूलः सर्वभूतहितेप्सया
समस्तमायुषो वेदं धन्वन्तरिमुपादिशत् ७१

अधीत्य चायुषो वेदमिन्द्राद्धन्वन्तरिः पुरा
आगत्य पृथिवीं काश्यां जातो बाहुजवेश्मनि ७२

नाम्ना तु सोऽभवत्ख्यातो दिवोदास इति क्षितौ
बाल एव विरक्तोऽभूच्चचार सुमहत्तपः ७३

यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम्
ततो धन्वन्तरिर्लोकैः काशीराजोऽभिधीयते ७४

हिताय देहिनां स्वीया संहिता विहिताऽमुना
अथ विद्यार्थिनो लोकान्संहितां तामपाठयत् ७५

अथ ज्ञानदृशा विश्वामित्रप्रभृतयोऽविदन्
अयं धन्वन्तरिः काश्यां काशिराजोऽयमुच्यते ७६

विश्वामित्रो मुनिस्तेषु पुत्रं सुश्रुतमुक्तवान्
वत्स वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ७७

तत्र नाम्ना दिवोदासः काशिराजोऽस्ति बाहुजः
स हि धन्वन्तरिः साक्षादायुर्वेदविदां वरः ७८

आयुर्वेदं पठस्व त्वं लोकोपकृतिहेतवे
सर्वप्राणिदया तीर्थमुपकारो महामखः ७९

पितुर्वचनमाकर्ण्य सुश्रुतः काशिकां गतः
तेन सार्द्धं समध्येतुं मुनिसूनुशतं ययौ ८०

अथ धन्वन्तरिं सर्वे वानप्रस्थाश्रमे स्थितम्

भगवन्तं सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतम् ८१

काशिराजं दिवोदासं तेऽपश्यन्विनयान्विताः
स्वागतं च तदा चाह दिवोदासो यशोधनः ८२

कुशलं परिपप्रच्छ तथागमनकारणम्
ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरम् ८३

भगवन्मानवान्दृष्ट्वा व्याधिभिः परिपीडितान्
क्रन्दतो म्रियमाणांश्च जातास्माकं हृदि व्यथा ८४

आमयानां शमोपायं विज्ञातुं वयमागताः
आयुर्वेदं भवानस्मानध्यापयतु यत्नतः ८५

अङ्गीकृत्य वचस्तेषां नृपतिस्तानुपादिशत्
व्याख्यातं तेन ते यत्नाज्जगृहुर्मुनयो मुदा ८६

काशिराजं जयाशीर्भिरभिनन्द्य मुदान्विताः
सुश्रुताद्याः सुसिद्धार्था जग्मुर्गेहं स्वकं स्वकम् ८७

प्रथमं सुश्रुतस्तेषु स्वतन्त्रं कृतवान्स्फुटम्
सुश्रुतस्य सखायोऽपि पृथक्तन्त्राणि तेनिरे ८८

सुश्रुतेन कृतं तन्त्रं सुश्रुतं बहुभिर्यतः
तस्मात्तत्सुश्रुतं नाम्ना विख्यातं क्षितिमण्डले ८९

इति भावप्रकाशे पूर्वखण्डे आयुर्वेदप्रवक्तृप्रादुर्भावप्रकरणं समाप्तम् १

अथ सृष्टिप्रकरणं ग्रन्थारम्भश्च २

आयुर्वेदाब्धिमध्यादतिमतिमुनयो योगरत्नानि यत्नाल्लब्ध्वा स्वे स्वे निबन्धे
दधुरखिलजनव्याधिविध्वंसनाय ।
तत्तद्ग्रन्थाद् गृहीतैः सुवचनमणिभिर्भावमिश्रैश्चिकित्साशास्त्रे जाड्यान्धकारं

प्रशमयितुमिमं संविधत्ते प्रकाशम् १

श्रीपतिपदप्रसादादाशीर्भिर्भूमिदेवानाम्
भावप्रकाशनाम्ना ग्रन्थोऽयं पठ्यतां सर्वैः २

आत्मा ज्योतिश्चिदानन्दरूपो नित्यश्च निःस्पृहः
निर्गुणः प्रकृतेर्योगात्सगुणः कुरुते जगत् ३

सत्त्वं रजस्तमश्चेति गुणास्ते प्रकृतेः समाः
सा जडापि जगत्कर्त्री परमात्मचिदव्ययात् ४

प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा
एतानि तस्या नामानि पुरुषं या समाश्रिता ५

सत्त्वं रजस्तमस्त्रीणि विज्ञेयाः प्रकृतेर्गुणाः
तैश्च युक्तस्य चित्तस्य कथयाम्यखिलान् गुणान् ६

आस्तिक्यं प्रविभज्य भोजनमनुत्तापश्च तथ्यं वचो
मेधाबुद्धिधृतिक्षमाश्च करुणा ज्ञानं च निर्दम्भता
कर्मानिन्दितमस्पृहं च विनयो धर्मः सदैवादरा-
देते सत्त्वगुणान्वितस्य मनसो गीता गुणा ज्ञानिभिः ७

क्रोधस्ताडनशीलता च बहुलं दुःखं सुखेच्छाऽधिका-
दम्भः कामुकताप्यलीकवचनं चाधीरताहङ्कृतिः
ऐश्वर्यादभिमानितातिशयितानन्दोऽधिकश्चाटनं
प्रख्याता हि रजोगुणेन सहितस्यैते गुणाश्चेतसः ८

नास्तिक्यं सुविषण्णतातिशयितालस्यं च दुष्टा मतिः
प्रीतिर्निन्दितकर्मशर्मणि सदा निद्रालुताहर्निशम्
अज्ञानं किल सर्वतोऽपि सततं क्रोधान्धता मूढता
प्रख्याता हि तमोगुणेन सहितस्यैते गुणाश्चेतसः ९

तत्र प्रभूतसत्त्वस्तु सात्त्विकः पुरुषः स्मृतः
राजसस्तामसश्चैव त्रिविधस्तेन मानवः १०

ततोऽभवन्महत्तत्त्वं बुद्धितत्त्वापराभिधम्
त्रिगुणं सत्त्वबहुलं निर्मलं स्फटिकोपमम्
चिच्छायाप्राप्तचैतन्यं तदिच्छामयमीरितम् ११

महतस्त्रिगुणाज्जातोऽहङ्कारस्त्रिगुणान्वितः
सात्त्विको राजसश्चापि तामसश्चेति स त्रिधा १२

जातानि सात्त्विकात्तस्मादिन्द्रियाणि सराजसात्
तानि श्रोत्रं त्वचो नेत्रं रसना नासिका तथा १३

वाग्घस्तचरणोपस्थगुदान्येकादशं मनः
पञ्च बुद्धीन्द्रियाण्याहुः प्राक्तनानीतराणि च १४

कर्मेन्द्रियाणि पञ्चैव कथयन्ति विपश्चितः १५

मनो बुद्धीन्द्रियं विज्ञैः कर्मेन्द्रियमपि स्मृतम्
मनोऽधिष्ठितमेवेदमिन्द्रियं यत्प्रवर्त्तते १६

शब्दः स्पर्शश्च रूपश्च रसो गन्धो ह्यनुक्रमात्
बुद्धीन्द्रियाणां विषयाः समाख्याता महर्षिभिः १७

वाच्यं ग्राह्यञ्च गन्तव्यमानन्दं त्याज्यमेव च
कर्मेन्द्रियाणां विषया ज्ञातव्य विषयो हृदः १८

तामसादप्यहङ्कारस्तन्मात्राणि सराजसात्
पञ्चाल्पसत्त्वसम्बन्धात्तल्लिङ्गानि भवन्ति हि १९

शब्दतन्मात्रकं स्पर्शतन्मात्रं रूपमात्रकम्

रसतन्मात्रकं गन्धतन्मात्रमिति तानि तु २०

तन्मात्रेभ्यो वियद्वायुर्वह्निर्वारि वसुन्धरा
एतानि पञ्च जायन्ते महाभूतानि तत्क्रमात् २१

शब्दः श्रोत्रेन्द्रियं वापि च्छिद्राणि च विविक्तता
वियतः कथिता एते गुणागुणविचारिभिः २२

स्पर्शस्त्वगिन्द्रियञ्चापि लघुता स्पन्दनं तनोः
चेष्टा सर्वशरीरस्य वायोरेते गुणाः स्मृताः २३

रूपं नेत्रेन्द्रियं पाकः सन्तापस्तीक्ष्णता तथा
वर्णो भ्राजिष्णुताऽमर्षः शौर्यं वह्नेर्गुणा अमी २४

रसो रसेन्द्रियं शैत्यं स्नेहश्च गुरुता तथा
सर्वद्रवसमूहश्च शुक्रं वारिगुणाः स्मृताः २५

गन्धो घ्राणेन्द्रियं चापि काठिन्यं गौरवं तथा
वसुन्धरागुणा एते गदिता गुणवेदिभिः २६

शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च तत्क्रमात्
तन्मात्राणां विशेषाः स्युः स्थूलभावमुपागताः २७

प्रकृतेः कारणायोगान्मता प्रकृतिरेव सा
महत्तत्त्वादयः सप्त शक्तेर्विकृतयः स्मृताः २८

इन्द्रियाणां च भूतानां कारणत्वान्महर्षिभिः
महत्तत्त्वादयः सप्त प्रोक्ताः प्रकृतयोऽपि च २९

दशेन्द्रियाणि चित्तञ्च महाभूतानि पञ्च च
एतानि सृष्टिं जानद्भिर्विकाराः षोडश स्मृताः ३०

एवं चतुर्विंशतिभिस्तत्त्वैः सिद्धे वपुर्गृहे
जीवात्मनियतेर्निघ्नो वसति स्वान्तदूतवान् ३१

स देही कथ्यते पापपुण्यदुःखसुखादिभिः
व्याप्तो बद्धश्च मनसा कृत्रिमैः कर्मबन्धनैः ३२

इच्छाद्वेषसुखासुखानि विषयज्ञानं प्रयत्नो मनः
सङ्कल्पश्च विचारणा स्मृतिरथो बुद्धिः कलाविज्ञता
प्राणस्योपरियापनं गुदवशाद्वायोरधः प्रेरणं
नेत्रोन्मेषनिमेषकृत्यकरणोत्साहाश्च जीवे गुणाः ३३

इति श्री मिश्रलटकनतनय श्रीमन्मिश्रभावविरचिते भावप्रकाशे
सृष्टिप्रकरणं समाप्तम् २

अथ गर्भप्रकरणम् ३

द्वादशाब्दत्सरादूर्ध्वमापञ्चाशत्समाः स्त्रियः
मासि मासि भगद्वारा प्रकृत्यैवार्तवं स्रवेत् १

आर्तवस्रावदिवसादृतुः षोडश रात्रयः
गर्भग्रहणयोग्यस्तु स एव समयः स्मृतः २

आर्तवस्रावदिवसादहिंसा ब्रह्मचारिणी
शयीत दर्भशय्यायां पश्येदपि पतिं न च ३

करे शरावे पर्णे वा हविष्यं त्र्यहमाहरेत्
अश्रुपातं नखच्छेदमभ्यङ्गमनुलेपनम् ४

नेत्रयोरञ्जनं स्नानं दिवास्वापं प्रधावनम्
अत्युच्चशब्दश्रवणं हसनं बहुभाषणम्
आयासं भूमिखननं प्रवातञ्च विवर्जयेत् ५

अज्ञानाद्वा प्रमादाद्वा लोभाद्वा दैवतश्च वा ६

सा चेत्कुर्यान्निषिद्धानि गर्भो दोषांस्तदाऽप्नुयात्
एतस्या रोदनाद्गर्भो भवेद्विकृतलोचनः ७

नखच्छेदेन कुनखी कुष्ठी त्वभ्यङ्गतो भवेत्
अनुलेपात्तथा स्नानाद् दुःखशीलोऽञ्जनाददृक् ८

स्वापशीलो दिवास्वापाच्चञ्चलः स्यात्प्रधावनात्
अत्युच्चशब्दश्रवणाद्बधिरः खलु जायते ९

तालुदन्तौष्ठजिह्वासु श्यावो हसनतो भवेत्
प्रलापी भूरिकथनादुन्मत्तस्तु परिश्रमात्
स्खलते भूमिखननादुन्मत्तो वातसेवनात् १०

पूर्वं पश्येदृतुस्नाता यादृशं नरमङ्गना
तादृशं जनयेत्पुत्रं ततः पश्येत्पतिं प्रियम् ११

प्रवहत्सलिले क्षिप्तं द्रव्यं गच्छत्यधो यथा
तथा वहति रक्ते तु क्षिप्तं वीर्यमधो व्रजेत् १२

आयुः क्षयभयाद्भर्त्ता प्रथमे दिवसे स्त्रियम्
द्वितीयेऽपि दिने रत्यै त्यजेदृतुमतीं तथा १३

तत्र यश्चाहितो गर्भो जायमानो न जीवति
आहितो यस्तृतीयेऽह्नि स्वल्पायुर्विकलाङ्गकः १४

अतश्चतुर्थी षष्ठी स्यादष्टमी दशमी तथा
द्वादशी वापि या रात्रिस्तस्यां तां विधिना भजेत् १५

अत्रोत्तरोत्तरं विद्यादायुरारोग्यमेव च

प्रजासौभाग्यमैश्वर्यं बलञ्चाभिगमात् फलम् १६

मनोभवागारमुखेऽबलानां तिस्रो भवन्ति प्रमदाजनानाम्
समीरणा चन्द्रमसी च गौरी विशेषमासामुपवर्णयामि १७

प्रधानभूता मदनातपत्रे समीरणा नाम विशेषनाडी
तस्या मुखे यत् पतितं तु वीर्यं तन्निष्फलं स्यादिति चन्द्रमौलिः १८

या चापरा चान्द्रमसी च नाडी कन्दर्पगेहे भवति प्रधाना
सा सुन्दरी योषितमेव सूते साध्या भवेदल्परतोत्सवेषु १९

गौरीति नाडी यदुपस्थगर्भे प्रधानभूता भवति स्वभावात्
पुत्रं प्रसूते बहुधाङ्गना सा कष्टोपभोग्या सुरतोपविष्टा २०

युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु २१

स्नातश्चन्दनलिप्ताङ्गः सुगन्धसुमनोर्चितः
भुक्तवृष्यः सुवसनः सुवेशः समलङ्कृतः २२

ताम्बूलवदनस्तस्यामनुरक्तोऽधिकस्मरः
पुत्रार्थी पुरुषो नारीमुपेयाच्छयने शुभे २३

अत्याशितोऽधृतिः क्षुद्वान् सव्यथाङ्गः पिपासितः
बालो वृद्धोऽन्यवेगार्त्तस्त्यजेद्रोगी च मैथुनम् २४

पुरुषस्य गुणैर्युक्ता विहिता न्यूनभोजना
नारी ऋतुमती पुंसा सङ्गच्छेत्तु सुतार्थिनी २५

रजस्वला व्याधिमती विशेषाद्योनिरोगिणी
वयोऽधिका च निष्कामा मलिना गर्भिणी तथा
एतासां सङ्गमात्पुंसां वैगुण्यानि भवन्ति हि २६

कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः
गर्भः सञ्जायते नार्याः स जातो बाल उच्यते २७

दम्पत्योः कुष्ठबाहुल्याद्दुष्टशोणितशुक्रयोः
यदपत्यं तयोर्जातं ज्ञेयं तदपि कुष्ठितमिति २८

ऋतौ स्त्रीपुंसयोर्योगे मकरध्वजवेगतः
मेढ्रयोन्यभिसङ्घर्षाच्छरीरोष्मानिलाहतः २९

पुंसः सर्वशरीरस्थं रेतो द्रावयतेऽथ तत्
वायुर्मेहनमार्गेण पातयत्यङ्गनाभगे ३०

तत् संस्तुत्य व्यात्तमुखं याति गर्भाशयं प्रति
तत्र शुक्रवदायातेनार्त्तवेन युतं भवेत् ३१

शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च कीर्तिता
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता ३२

यथा रोहितमत्स्यस्य मुखं भवति रूपतः
तत्संस्थानां तथा रूपां गर्भशय्यां विदुर्बुधाः ३३

शुक्रार्त्तवसमाश्लेषो यदैव खलु जायते
जीवस्तदैव विशति युक्तः शुक्रार्त्तवान्तरः ३४

सूर्यांशोः सूर्यमणित उभयस्माद्युताद्यथा
वह्निः सञ्जायते जीवस्तथा शुक्रार्तवाद्युतात् ३५

आत्मानादिरनन्तश्चाव्यक्तो वक्तुं न शक्यते
चिदानन्दैकरूपोऽयं मनसापि न गम्यते ३६

एवम्भूतोऽपि जगतो भाविनी बलवत्तया

अविद्यास्वीकृते कर्मवशो गर्भे विशत्यसौ ३७

स एव वेत्ता रसनो द्रष्टा घ्राता स्पृशत्यसौ
श्रोता वक्ता च कर्त्ता च गन्ता रन्तोत्सृजत्यपि ३८

दिने व्यतीते नियतं संकुचत्यम्बुजं यथा
ऋतौ व्यतीते नार्यास्तु योनिः संव्रियते तथा ३९

बीजेऽन्तर्वायुना भिन्ने द्वौ जीवौ कुक्षिमागतौ
यमावित्यभिधीयेते धर्मेतरपुरःसरौ ४०

आधिक्ये रेतसः पुत्रः कन्या स्यादार्त्तवेऽधिके
नपुंसकं तयोः साम्ये यथेच्छा पारमेश्वरी ४१

एवं तामभिसङ्गम्य पुनर्मासाद्रजेदसौ ४१

शुक्रशोणितयोर्योनेरस्त्रावोऽथ श्रमोद्भवः
सक्थिसादः पिपासा च ग्लानिः स्फूर्त्तिर्भगे भवेत् ४२

स्तनयोर्मुखकाष्ण्यं स्याद्रोमराज्युद्गमस्तथा
अक्षिपद्मानि चाप्यस्याः संमील्यन्ते विशेषतः ४३

छर्दयेत्पथ्यभुक्चापि गन्धादुद्विजते शुभात्
प्रसेकः सदनं चैव गर्भिण्या लिङ्गमुच्यते ४४

पुत्रगर्भयुतायास्तु नार्या मासि द्वितीयके
गर्भो गर्भाशये लक्ष्यः पिण्डाकारोऽपरं शृणु ४५

दक्षिणाक्षिमहत्वं स्यात् प्राक्क्षीरं दक्षिणे स्तने
दक्षिणोरुः सुपुष्टः स्यात्प्रसन्नमुखवर्णता ४६

पुन्नामधेयद्रव्येषु स्वप्नेष्वपि मनोरथः

आम्रादिफलमाप्नोति स्वप्नेषु कमलादि च ४७

कन्या गर्भवती गर्भे पेशी मासि द्वितीयके
पुत्रगर्भस्य लिङ्गानि विपरीतानि चेद्भते ४८

नपुंसकं यदा गर्भे भवेद् गर्भोऽबुदाकृतिः
उन्नते भवतः पार्श्वे पुरस्तादुदरं महत् ४९

आसेक्यश्च सुगन्धी च कुम्भीकश्चेष्यर्यकस्तथा
अमी सशुक्रा बोद्धव्या अशुक्रः षण्ढसंज्ञकः ५०

पित्रोस्तु स्वल्पवीर्यत्वादासेक्यः पुरुषो भवेत्
स शुक्रं प्राश्य लभते ध्वजोन्नतिमसंशयम् ५१

यः पूतियोनौ जायेत स हि सौगन्धिको भवेत्
स योनिशेफसोर्गन्धमाघ्राय लभते बलम् ५२

स्वे गुदेऽब्रह्मचर्याद्यः स्त्रीषु पुंवत् प्रवर्त्तते
स कुम्भीक इति ज्ञेयो गुदयोनिस्तु स स्मृतः ५३

दृष्ट्वा व्यवायमन्येषां व्यावाये यः प्रवर्त्तते
ईर्ष्यकः स तु विज्ञेयो दृष्टियोनिस्तु स स्मृतः ५४

यो भार्यायामृतौ मोहादङ्गनेव प्रवर्त्तते
तत्र स्त्रीचेष्टिताकारो जायते षण्ढसंज्ञकः ५५

ऋतौ ऋतौ पुरुषवत् प्रवर्त्तेताङ्गना यदि
तत्र कन्या यदि भवेत् सा भवेन्नरचेष्टिता ५६

यदा नार्यावुपेयातां वृषस्यन्त्यौ कथञ्चन
मुञ्चन्त्यौ शुक्रमन्योन्यमनस्थिस्तत्र जायते ५७

ऋतुस्नाता तु या नारी स्वप्ने मैथुनमाचरेत्
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ५८

मासि मासिप्रवर्द्धेत स गर्भो गर्भलक्षणः
कललं जायते तस्य वर्जितं पैतृकैर्गुणैः ५९

सर्पवृश्चिककूष्माण्डाकृतयो विकृताश्च ये
गर्भास्ते योषितस्ताश्च ज्ञेयाः पापकृतो भृशम् ६०

गर्भो वातप्रकोपेण दोहदे चापमानिते
भवेत् कुब्जः कुणिः पङ्गुर्मूको मिन्मिन एव च ६१

आहाराचारचेष्टाभिर्यादृशीभिः समन्वितौ
स्त्रीपुंसौ समुपेयातां तयोः पुत्रोऽपि तादृशः ६२

गर्भाशयगतं शुक्रमार्त्तवं जीवसंज्ञकः
प्रकृतिः सविकारा च तत्सर्वं गर्भसंज्ञकम् ६३

कालेन वर्द्धितो गर्भो यद्यङ्गोपाङ्गसंयुतः
भवेत्तदा स मुनिभिः शरीरीति निगद्यते ६४

तस्य त्वङ्गान्युपाङ्गानि ज्ञात्वा सुश्रुतशास्त्रतः
मस्तकादभिधीयन्ते शिष्याः शृणुत यत्नतः ६५

आद्यमङ्गं शिरः प्रोक्तं तदुपाङ्गानि कुन्तलाः
तस्यान्तर्मस्तुलुङ्गं च ललाटं भ्रूयुगन्तथा ६६

नेत्रद्वयं तयोरन्तर्वर्त्तेते द्वे कनीनिके
दृष्टिद्वयं कृष्णगोलौ श्वेतभागौ च वर्त्मनी ६७

पद्मपत्रयपाङ्गौ शङ्खौ च कर्णौ तच्छष्कुलीद्वयम्

पालिद्वयं कपोलौ च नासिका च प्रकीर्त्तिता ६८

ओष्ठाधरौ च सृक्किणयौ मुख तालु हनुद्वयम्
दन्ताश्च दन्तवेष्टश्च रसना चिबुकङ्गलः ६९

द्वितीयमङ्गं ग्रीवा तु यया मूर्द्धा विधार्यते
तृतीयं बाहुयुगलं तदुपाङ्गान्यथ ब्रुवे ७०

तत्रोपरि मतौ स्कन्धौ प्रगण्डौ भवतस्त्वधः
कफोणियुग्मं तदधं प्रकोष्ठयुगलन्तथा ७१

मणिबन्धौ तले हस्तौ तयोश्चाङ्गुलयो दश
नखाश्च दश ते स्थाप्या दशच्छेद्याःप्रकीर्त्तिताः ७२

चतुर्थमङ्गं वक्षस्तु तदुपाङ्गान्यथ ब्रुवे
स्तनौ पुंसस्तथा नार्या विशेष उभयोरयम् ७३

यौवनागमने नार्याः पीवरौ भवतः स्तनौ
गर्भवत्या प्रसूतायास्तावेव क्षीरपूरितौ ७४

हृदयं पुण्डरीकेण सदृशं स्यादधोमुखम्
जाग्रतस्तद्विकसति स्वपतस्तु निमीलति ७५

आशयस्तत्तु जीवस्य चेतनास्थानमुत्तमम्
अतस्तस्मिंस्तमोव्याप्ते प्राणिनः प्रस्वपन्ति हि ७६

कक्षयोर्वक्षसः सन्धी जत्रुणी समुदाहृते
कक्षे उभे समाख्याते तयोः स्यातां च वङ्क्षणौ ७७

उदरं पञ्चमञ्चाङ्गं षष्ठं पार्श्वद्वयं मतम्
सपृष्ठवंशं पृष्ठं तु समस्तं सप्तमं स्मृतम् ७८

उपाङ्गानि च कथ्यन्ते तानि जानीहि यत्नतः
शोणिताज्जायते प्लीहा वामतो हृदयादधः ७९

रक्तवाहिशिराणां स मूलं ख्यातो महर्षिभिः
हृदयाद्वामतोऽधश्च फुप्फुसो रक्तफेनजः ८०

अधो दक्षिणतश्चापि हृदयाद्यकृतः स्थितिः
तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम् ८१

अधस्तु दक्षिणे भागे हृदयात् क्लोम तिष्ठति
जलवाहिशिरामूलं तृष्णाऽच्छादनकृन्मतम् ८२

मेदः शोणितयोः साराद्वृक्कयोर्युगलं भवेत्
तौ तु पुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः ८३

अर्द्धव्यामेन हीनानि योषितोऽन्त्राणि निर्दिशेत्
उक्ता सार्द्धास्त्रयो व्यामापुंसामन्त्राणि सूरिभिः ८४

उन्दुकश्च कटी चापि त्रिकं वस्तिश्च वङ्क्षणौ
करडराणां प्ररोहःस्यान्मेढ्रोऽध्वा वीर्यमूत्रयोः ८५

स एव गर्भस्याधानं कुर्याद्गर्भाशये स्त्रियाः
शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च कीर्त्तिता ८६

तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता
वृषणौ भवतः सारात्कफासृङ्मांसमेदसाम् ८७

वीर्यवाहिशिराधारौ तौ मतौ पौरुषावहौ
गुदस्य मानं सर्वस्य सार्द्धं स्याच्चतुरङ्गुलम् ८८

तत्र स्युर्वलयस्तिस्रः शङ्खावर्तनिभास्तु ताः

प्रवाहिणी भवेत्पूर्वा सार्द्धाङ्गुलमिता मता ८९

उत्सर्जनी तु तदधः सा सार्द्धाङ्गुलसम्मिता
तस्याधः संवरणी स्यादेकाङ्गुलसमा मता ९०

अर्द्धाङ्गुलप्रमाणं तु बुधैर्गुदमुखं मतम्
मलोत्सर्गस्य मार्गोऽय पायुर्देहे विनिर्मितः ९१

पुंसः प्रोथौ स्मृतौ यौ तु तौ नितम्बौ च योषितः
तयोः कुकुन्दरे स्यातां सक्थिनोत्वङ्गमष्टमम् ९२

तदुपाङ्गानि च ब्रूमो जानुनी पिण्डकाद्वयम्
जंघे द्वे घुटिके पार्ष्णी तले च प्रपदे तथा ९३

पादावङ्गुलयस्तत्र दश तासां नखा दश
अथ दोषाः प्रवक्ष्यन्ते धातवस्तदनन्तरम् ९४

आहारादेर्गतिस्तस्य परिणामश्च वक्ष्यते
आर्त्तवं चाथ धातूनां मलास्तदुपधातवः ९५

आशयाश्च कलाश्चापि मर्माण्यथ च सन्धयः
शिराश्च स्नायवश्चापि धमन्यः कण्डरास्तथा ९६

रन्ध्राणि भूरि स्रोतांसि जालैः कूर्च्चाश्च रज्जवः
सेवन्यश्चाथ सङ्घाताः सीमान्ताश्च तथा त्वचः ९७

लोमानि लोमकूपाश्च देह एतन्मयो मतः
वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः ९८

विकृताविकृता देहं घ्नन्ति ते वर्द्धयन्ति च
ते व्यापिनोऽपि हृन्नाभ्योरधो मध्योर्ध्वसंश्रयाः

वयोऽहोरात्रिभुक्तानामन्तमध्यादिगाः क्रमात् ९९

धातवश्च मलाश्चापि दुष्यन्त्येभिर्यतस्ततः
वातपित्तकफा एते त्रयो दोषा इति स्मृताः १००

ते धातवोऽपि विद्वद्भिर्गदिता देहधारणात् १०१

दोषधातुमलादीनां नेता शीघ्रः समीरणः
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः १०२

उत्साहोच्छ्वासनिःश्वासचेष्टावेगप्रवर्त्तनैः १०३

सम्यग् गत्या च धातूनामन्द्रियाणाञ्च पाटवैः
अनुगृह्णात्यविकृतो हृदयेन्द्रियचित्तधृक् १०४

रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्चलः
खरो मृदुर्योगवाही संयोगादुभयार्थकृत् १०५

दाहकृत् तेजसा युक्तः शीतकृत्सोमसंश्रयात्
विभागकरणाद्वायुः प्रधानं दोषसंग्रहे १०६

पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम्
स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः १०७

उदानस्तदनुप्राणः समानोऽपान एव च
व्यानश्चैतानि नामानि वायोः स्थानप्रभेदतः १०८

कण्ठे हृदि तथाऽधस्तात्कोष्ठवह्नेर्मलाशये
सकलेऽपि शरीरेऽसौ क्रमेण पवनो वसेत् १०९

उदानो नाम यस्तूर्ध्वमुपैति पवनोत्तमः
तेन भाषितगीतादिप्रवृत्तिः कुपितस्तु सः ११०

ऊर्ध्वजत्रुगतान् रोगान्विदधाति विशेषतः
यो वायुः प्राणनामाऽसौ मुखं गच्छति देहधृक् १११

सोऽन्न प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते
प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ११२

आमपक्वाशयचरः समानो वह्निसङ्गतः
सोऽन्न पचति तज्जांश्च विशेषान्विविनक्ति हि ११३

स दुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि
पक्वाशयालयोऽपानः काले कर्षति चाप्ययम् ११४

समीरणः शकृन्मूत्रशुक्रगर्भार्त्तवान्यधः
क्रुद्धस्तु कुरुते रोगान् घोरान्वस्तिगुदाश्रयान् ११५

शुक्रदोषप्रमेहांश्च व्यानापानप्रकोपजान्
कृत्स्नदेहचरो व्यानो रससंवाहनोद्यतः ११६

स्वेदाऽसृक्स्त्रावणश्चापि पञ्चधा चेष्टयत्यपि
प्रस्पन्दनञ्चोद्वहनं पूरणञ्च विरेचनम् ११७

धारणञ्चेति पञ्चैताश्चेष्टाः प्रोक्ताः नभस्वतः
गत्यपक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः
प्रायः सर्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम् ११८

क्रुद्धः सः कुरुते रोगान् प्रायशः सर्वदेहगान्
युगपत् कुपिता एते देहं भिन्द्युरसंशयम् ११९

पित्तमुष्णं द्रवं पीतं नीलं सत्त्वगुणोत्तरम्
सरं कटु लघु स्निग्धं तीक्ष्णमम्लन्तु पाकतः १२०

पाचकं रञ्जकञ्चापि साधकालोचके तथा
भ्राजकञ्चेति पित्तस्य नामानि स्थानभेदतः १२१

अग्न्याशये यकृत्प्लीह्नोर्हृदये लोचनद्वये
त्वचि सर्वशरीरेषु पित्तं निवसति क्रमात् १२२

पाचकं पचते भुक्तं शेषाग्निबलवर्द्धनम्
रसमूत्रपुरीषाणि विरेचयति नित्यशः १२३

इत्यलमप्रकृतिचिन्तनेन पुनः प्रकृतमनुसरति
रञ्जकं नाम यत्पित्तं तद्रसं शोणितं नयेत्
यत्तु साधकसंज्ञं तत्कुर्याद्बुद्धिं धृतिं स्मृतम् १२४

यदालोचकसंज्ञं तद्रूपग्रहणकारणम्
भ्राजकं कान्तिकारि स्याल्लेपाभ्यङ्गादिपाचकम् १२५

श्लेष्माश्वेतो गुरुः स्निग्धः पिच्छिलः शीतलस्तथा
तमोगुणाधिकः स्वादुर्विदग्धो लवणो भवेत् १२६

कफस्यैतानि नामानि क्लेदनश्चावलम्बनः
रसनः स्नेहनश्चापि श्लेषणः स्थानभेदतः १२७

आमाशयेऽथ हृदये कण्ठे शिरसि सन्धिषु
स्थानेष्वेषु मनुष्याणां श्लेष्मा तिष्ठत्यनुक्रमात् १२८

क्लेदनः क्लेदयत्यन्नमात्मशक्त्याऽपराणयपि
अनुगृह्णाति च श्लेष्मस्थानान्युदककर्मणा १२९

रसयुक्तात्मवीर्येण हृदयस्यावलम्बनम्
त्रिकसन्धारणं चापि विदधात्यवलम्बनः १३०

उभावपि ततः सौम्यौ तिष्ठतश्चान्तिके यतः
यतो रसान्विजानीतो रसनारसनौ समौ १३१

स्नेहनः स्नेहदानेन समस्तेन्द्रियतर्पणः
श्लेषणः सर्वसन्धीनां संश्लेषं विदधात्यसौ १३२

एते सप्त स्वयं स्थित्वा देहं दधति यन्नृणाम्
रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः १३३

प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे
गर्भोत्पादश्च कर्माणि धातूनां कथितानि हि १३४

गत्यर्थो रस धातुर्यस्ततोऽभवदयं रसः
सद्रवं सकलं देहे रसतीति रसः स्मृतः १३४

सम्यक्पक्वस्य भुक्तस्य सारो निगदितो रसः
स तु द्रवः सितः शीतः स्वादुः स्निग्धश्चलो भवेत् १३५

सर्वदेहचरस्यापि रसस्य हृदयं स्थलम्
समानमरुता पूर्वं यदयं हृदये धृतः १३६

आरुह्य धमनीर्गत्वा धातून् सर्वानयं रसः
पुष्णाति तदनु स्वीयैर्व्याप्नोति च तनुं गुणैः १३७

मन्दवह्निविदग्धस्तु कटुर्वाऽम्लो भवेद्रसः
स कुर्याद्बहुलान् रोगान् विषकृत्यं करोत्यपि १३८

यदा रसो यकृद्याति तत्र रञ्जकपित्ततः
रागंपाकं च सम्प्राप्य स भवेद्रक्तसंज्ञकः १३९

रक्तं सर्वशरीरस्थं जीवस्याधारमुत्तमम्

स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत् १४०

यकृत् प्लीहा च रक्तस्य मुख्यस्थानन्तयोः स्थितम्
अन्यत्र संस्थितवतां रक्तानां पोषकं भवेत् १४१

शोणितं स्वाग्निना पक्वं वायुना च घनीकृतम्
तदेव मांसं जानीयात्तस्य भेदानपि ब्रुवे १४२

यथाऽथमूष्मणा युक्तो वायुः स्रोतांसिदारयेत्
अनुप्रविश्य पिशितं पेशीर्विभजते तथा १४३

मांसपेश्यः समाख्याता नृणां पञ्च शतानि हि १४४

तासां शतानि चत्वारि शाखासु कथितान्यथ
कोष्ठे षडुत्तरा षष्टिः कथिता मुनिपुङ्गवैः
ग्रीवाया ऊर्ध्वगास्तास्तु चतुस्त्रिंशत् प्रकीर्त्तिताः १४५

स्त्रीणामपि भवन्त्येताः किन्तु विंशतिरुत्तराः
गर्भाशये गर्भमार्गे योनौ च स्तनयोरपि १४६

पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता मेहनमुष्कजाः
स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः १४७

शिरास्नाय्वस्थिपर्वाणि सन्धयश्च शरीरिणाम्
पेशीभिःसंवृतान्येव बलवन्ति भवन्ति हि १४८

यन्मांसं स्वाग्निना पक्वं तन्मेद इति कथ्यते
तदतीव गुरु स्निग्धं बलकार्यतिबृंहणम् १४९

मेदो हि सर्वभूतानामुदरेष्वस्थि संस्थितम्
अत एवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् १५०

मेदो यत् स्वाग्निना पक्वं वायुना चातिशोषितम् १५१

तदस्थिसंज्ञां लभते स सारः सर्वविग्रहे
अभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः १५२

अस्थिसारैस्तथा देहा ध्रियन्ते देहिनो ध्रुवम्
तस्माच्चिरविनष्टेषु त्वङ्मांसेषु शरीरिणाम्
अस्थीनि न विनश्यन्ति सारा एतानि सर्वथा १५३

शल्यतन्त्रेऽस्थिखण्डानांशतत्रयमुदाहृतम् १५४

तान्येवात्र निगद्यन्ते तेषां स्थानानि यानि च
सविंशतिशतं त्वस्थ्नां शाखासु कथितं बुधैः १५५

पार्श्वयोः श्रोणिफलके वक्षःपृष्ठोदरेषु च
जानीयाद्भिषगेतेषु शतं सप्तदशोत्तरम्
ग्रीवायामूर्ध्वगां विद्यादस्थ्नां षष्टिंत्रिसंयुताम् १५६

एतान्यस्थीनि पञ्चविधानि भवन्ति तानि यथा
तरुणानि कपालानि रुचकानि भवन्ति हि
वलयानीति तानि स्युर्नलकानि च कानि चित् १५७

अक्षिकोश श्रुतिघ्राणग्रीवासु तरुणानि च १५८

शिरः शङ्खकपोलेषु ताल्वं सप्रोथजानुषु
कपालानि भवन्त्येषु दन्तेषु रुचकानि च १५९

पाष्ण्यर्योः पार्श्वयुगे पृष्ठे वक्षोजठरपायुषु
पादयोर्वलयानि स्युर्नलकानि ब्रुवेऽधुना १६०

हस्ते पादाङ्गुलितले कूर्च्चे च मणिबन्धके

बाहूजङ्घाद्वये चापि जानीयान्नलकानि तु १६१

मांसान्यन्त्राणि बद्धानि शिराभिः स्नायुभिस्तथा
अस्थीन्यालम्बनं कृत्वा न दीर्यन्ते पतन्ति च १६२

अस्थि यत् स्वाग्निना पक्वं तस्य सारो भवेद्घनः
यः स्वेदवत् पृथग्भूतः स मज्जेत्यभिधीयते १६३

स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तरे स्थितः १६४

रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते
मेदसोऽस्थि ततो मज्जा मज्ज्ञः शुक्रस्य सम्भवः १६५

यात्यामाशयमाहारः पूर्वं प्राणानिलेरितः
माधुर्यं फेनभावं च षड्रसोऽपि लभेत सः १६६

षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता
आमपक्वाशयान्तःस्था ग्रहणी साऽभिधीयते १६७

तत्रग्रहणयामामाशयपक्वाशयमध्यवर्त्तिपाचकाख्यपित्ताधिष्ठानेनाग्निनाऽहारः पच्यते स कटुश्च भवतीत्याहग्रहणयां पच्यते कोष्ठे वह्निना जायते कटुः इति १६८

एतदाहारपाके विशेषमाह शरीरं पाञ्चभौतिकम्
तत्र पञ्चसुभूतेषु पञ्चाग्नयस्तिष्ठन्तै उक्तं च चरकेण
भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः
पञ्चाहारगुणान् स्वान् स्वान्पार्थिवादीन् पचन्त्यनु १६९

पञ्च भूतात्मके देहे आहारः पाञ्चभौतिकः
विपक्वः पञ्चधा सम्यग्गुणान्स्वानभिवर्द्धयेत् इति १७०

मिष्टः पटुश्च मधुरमम्लोऽम्ल पच्यते रसः
कटुतिक्तकषायाणां विपाको जायते कटुः इति १७१

आहारस्य रसः सारः सार हीनो मलद्रवः
शिराभिस्तज्जलं नीतं वस्तिं मूत्रत्वमाप्नुयात् १७२

शेषं किट्टञ्च यत्तस्य तत्पुरीषं निगद्यते
समानवायुना नीतन्तत्तिष्ठति मलाशये १७३

मूत्रञ्चोपस्थमार्गेण पुरीषं गुदमार्गतः
अपानवायुना क्षिप्तं बहिर्याति शररीतः १७४

रसस्तु हृदयं याति समानमरुतेरितः
स तु व्यानेन विक्षिप्तः सर्वान् धातून् विवर्द्धयेत् १७५

केदारेषु यथा कुल्याः पुष्णन्ति विविधौषधीः
तथा कलेवरे धातून् सर्वान् वर्द्धयते रसः १७६

रसस्तु तत्र तत्र त्रिधा विभज्यते उक्तञ्च चरके
स्थूलः सूक्ष्मस्तन्मलश्च तत्र तत्र त्रिधा रसः
स्वं स्थूलोंऽश परं सूक्ष्मस्तन्मलो याति तन्मलम् १७७

धातौ रसादौ मज्जान्ते प्रत्येकं क्रमतो रसः
अहोरात्रात्स्वयं पञ्च सार्द्धदण्डं च तिष्ठति १७८

स्वाग्निभिः पच्यमानेषु मज्जान्तेषु रसादिषु
षट्सु धातुषु जायन्ते मलानि मुनयो जगुः १७९

यथा सहस्त्रधा ध्माते न मलं किल काञ्चने
तथा रसे मुहुः पक्वे न मलं शुक्रताङ्गते १८०

ओजः सर्वशरीरस्थं स्निग्धं शीतं स्थिरं सितम्
सोमात्मकं शरीरस्य बलपुष्टिकरं मतम् १८१

गुरु शीतं मृदु स्निग्धं सान्द्रं स्वादु स्थिरं तथा
प्रसन्नं पिच्छिलं सूक्ष्ममोजो दशगुणं स्मृतम् १८२

अष्टविन्दुप्रमाणं तदीषद्रक्तं सपीतकम्
अग्नीषोमात्मकत्वेन द्विरूपं वर्णितन्तु तत् १८३

ओजश्च तेजो धातूनां शुक्रान्तानां परं स्मृतम्
हृदयस्थमपि व्यापि देहस्थितिनिबन्धनम् १८४

यस्य प्रवृद्धौ देहस्य तुष्टिपुष्टिबलोदयाः
यन्नाशे नियतो नाशो यस्मिंस्तिष्ठति जीवनम् १८५

निष्पद्यन्ते यतो भावा विविधा देहसंश्रयाः
उत्साहप्रतिभाधैर्यलावण्यसुकुमारताः १८६

ततः स्थूलो भागो रसो मासेन पुंसां शुक्रं स्त्रीणान्त्वार्त्तवं शुक्रञ्च भवति उक्तञ्च सुश्रुते
एवं मासेन रसः शुक्रो भवति स्त्रीणामार्त्तवञ्चेति चकारात् स्त्रीणामपि शुक्रं भवति
अत एवोक्तं सुश्रुते
योषितोऽपि स्रवत्येव शुक्रं पुंसः समागमे
तत्र गर्भस्य किञ्चित्तुन करोतीति न चिन्त्यते १८७

एवञ्च
स्त्रीणां गर्भोपयोगि स्यादार्त्तवं सर्वसम्मतम्
तासामपि बलं वर्णं शुक्रं पुष्टिं करोति हि १८८

एवञ्च

रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते
मेदसोऽस्थि ततो मज्जा मज्ज्ञः शुक्रस्य सम्भवः १८९

रसः शरीरे शब्दार्च्चिर्जलसन्तानवत् त्रिधा
सञ्चरत्यनुरूपोऽय नित्यमेव हि देहिनाम् १९०

वाजीकरिणय ओषध्यः स्वप्रभावगुणोच्छ्रयात्
विरेचयन्ति ताः शुक्रं विरेकिद्रव्यवन्नृणाम् १९१

दुग्धं माषाश्च भल्लात फलमज्जामलानि च
जनकानि निगद्यन्ते रेचनानि च रेतसः १९२

बालानां शुक्रमस्त्येव किन्तु सौद्म्यान्न दृश्यते
पुष्पाणां मुकुले गन्धो यथा सन्नपि नाप्यते १९३

तेषां तदेव तारुणये पुष्टत्वाद्व्यक्तिमेति हि
कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा १९४

रोमराज्यादयः पुंसां नारीणामपि यौवने
जायतेऽत्र च यो भेदो ज्ञेयो व्याख्यानतः स च १९५

वार्द्धके वर्द्धमानेन वायुना रसशोषणात्
न तथा धातुवृद्धिः स्यात्ततस्तत्रानिलं जयेत् १९६

शुक्रं सौम्यं सितं स्निग्धं बलपुष्टिकरं स्मृतम्
गर्भबीजं वपुःसारो जीवस्याश्रय उत्तमः १९७

जीवो वसति सर्वस्मिन्देहे तत्र विशेषतः
वीर्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणात् १९८

स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च

शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभञ्च तत् १९९

यथा पयसि सर्पिस्तु गूढश्चेक्षौ रसो यथा
एवं हि सकले काये शुक्रं तिष्ठति देहिनाम् २००

द्वयङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधः
मूत्रस्रोतःपथाच्छुक्रं पुरुषस्य प्रवर्त्तते २०१

कृत्स्नदेहस्थितं शुक्रं प्रसन्नमनसस्तथा
स्त्रीषु व्यायच्छतश्चापि हर्षात्तत् सम्प्रवर्त्तते २०२

शुक्रं कामेन कामिन्या दर्शनात् स्पर्शनादपि
शब्दसंश्रवणाद्ध्यानात् संयोगाच्च प्रवर्त्तते २०३

रसादेव रजः स्त्रीणां मासि मासि त्र्यहं स्रवेत्
तद्वर्षाद् द्वादशादूर्ध्वं याति पञ्चाशतः क्षयम् २०४

मासेनोपचितं काले धमनीभ्यस्तदार्त्तवम्
ईषद्विवर्णं कृष्णञ्च वायुर्योनिमुखं नयेत् २०५

शशासृक्प्रतिमं यच्च यद्वा लाक्षारसोपमम्
तदार्त्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत् २०६

अतिरिक्ता गुणा रक्ते ब्रह्मेर्मांसे तु पार्थिवाः
मेदस्यपां भुवश्चास्थ्नि पृथिव्यनिलतेजसाम् २०७

मज्ज्ञि शुक्रे च सोमस्य मूत्रे च शिखिनोगुणाः
भुवस्तथाऽत्तवे त्वग्ने रसे क्षीरे तथाऽम्भसः २०८

कफः पित्तं मलः खेषु प्रस्वेदो नखलोम च
नेत्रविट्त्वक्षु च स्नेहो धातूनां क्रमशो मलाः २०९

वनितानां प्रसूतानां धमनीभ्यां स्तनौ गतात्
रसादेव हि जायेत स्तन्यं स्तनयुगाशयम् २१०

शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्त्तिता
मेदसस्ताप्यमानस्य स्नेहो वा कथिता वसा २११

स्तन्यं रजो वसा स्वेदो दन्ताः केशास्तथैव च
ओजश्च सप्तधातूनां क्रमात् सप्तोपधातवः २१२

उरोरक्ताशयस्तस्मादधः श्लेष्माशयः स्मृतः
आमाशयस्तु तदधस्तल्लिङ्गं चरकोऽवदत् २१३

आमाशयादधः पक्वाशयादूर्ध्वन्तु या कला
ग्रहणी नामिका सैव कथितः पाचकाशयः २१४

ऊर्ध्वमग्न्याशयो नाभेर्मध्यभागे व्यवस्थितः
तस्योपरि तिलं ज्ञेयं तदधः पवनाशयः २१५

पक्वाशयस्तुतदधः स एव तु मलाशयः
तदधः कथितो वस्तिः स हि मूत्राशयो मतः २१६

आशयानुक्रमस्तु वाग्भटेनोक्तः स यथा
कफाऽमपित्तवातानामाशया मलमूत्रयोः
पुरुषेभ्योऽधिकाश्चान्ये नारीणामाशयास्त्रयः २१७

धरा गर्भाशयः प्रोक्तः पित्तपक्वाशयान्तरे
स्तनौ प्रवृद्धौ तावेव बुधैः स्तन्याशयौ मतौ २१८

स्नायुभिश्च प्रतिच्छन्नान् सन्ततांश्च जरायुणा
श्लेष्मणा वेष्टितांश्चापि कलाभागांस्तु तान्विदुः २१९

धात्वाशयान्तरे धातोर्यः क्लेदस्त्वधितिष्ठति
देहोष्मणाऽभिपक्वश्च सा कलेत्यभिधीयते २२०

आद्या मांसधरा प्रोक्ता द्वितीया रक्तधारिणी
मेदोधरा तृतीया तु चतुर्थी श्लेष्मधारिणी २२१

पञ्चमी तु मलं धत्ते षष्ठी पित्तधरा मता
रेतोधरा सप्तमी स्यादिति सप्त कलाः स्मृताः २२२

सन्निपातः शिरास्नायुसन्धिमांसास्थिसम्भवः
मर्माणि तेषु तिष्ठन्ति प्राणाः खलु विशेषतः २२३

सप्तोत्तरशतं सन्ति देहे मर्माणि देहिनाम्
तान्येकादश मांसे स्युरष्टावस्थिषु सन्ति हि २२४

सन्धीनां विंशतिस्तानि स्नायूनां सप्तविंशतिः
चत्वारिंशतत्तथैकञ्च शिरामर्माणि तत्र तु २२५

द्वाविंशतिः सक्थियुगे तावत्येव भुजद्वये
द्वादशोरसि कुक्षौ च पृष्ठदेशे चतुर्दश २२६

ग्रीवायामूर्ध्वभागे तु सप्तत्रिंशन्मतानि हि
मर्माणि तानि सन्तीह पञ्चधा च भवन्ति हि २२७

सद्यः प्राणहराणि स्युर्मर्माणयेकोनविंशतिः
मर्मदेशास्त्रयस्त्रिंशत् स्युः कालान्तरमारकाः २२८

चत्वारिंशच्च चत्वारि वैकल्यं जनयन्ति हि
मर्माष्टकं रुजाकारि विशल्यघ्नं त्रिकं मतम् २२९

शृङ्गाटकान्यधिपतिः शङ्खौ कण्ठशिरा गुदम्

हृदयं वस्तिनाभी च सद्यो घ्नन्ति हतानि चेत् २३०

वक्षोमर्माणि सीमन्ततलक्षिप्रेन्द्रवस्तयः
वृहत्यौ पार्श्वयोः सन्धी कटीकतरुणे च ये
नितम्बाविति चैतानि कालान्तरहराणि तु २३१

लोहिताक्षाणिजानूर्वी कूर्चा विटपकूर्पराः
कुकुन्दरे कक्षधरे विधुरे सकृकाटिके २३२

अंसांसफलकापाङ्गा नीले मन्ये फणे तथा
वैकल्यकरणान्याहुरावर्त्तौ द्वौ तथैव च २३३

गुल्फौ द्वौ मणिबन्धौ द्वौ तथा कूर्चशिरांसि च
रुजाकराणि जानीयादष्टावेतानि बुद्धिमान् २३४

उत्क्षेपौ स्थपनी चैव विशल्यघ्नं त्रिकम्मतम् २३५

सप्तरात्रान्तरे हन्युः सद्यः प्राणहराणि हि
कालान्तरप्राणहरं पक्षे मासे च मारकम् २३६

सद्यः प्राणहरञ्चान्ते विद्धं कालेन मारयेत्
कालान्तरप्राणहरमन्ते विद्धन्तु दुःखदम् २३७

मर्माणयधिष्ठाय हि ये विकारा मूर्च्छन्ति काये विविधा नराणाम्
प्रायेण ते कृच्छ्रतमा भवन्ति वैद्येन यत्नैरपि साध्यमानाः २३८

अथ सन्धयः
ते द्विविधाश्चेष्टावन्तः स्थिराश्च
शाखासु हन्वोः कटयाञ्च चेष्टावन्तो भवन्ति हि
शेषास्तु सन्धयः सर्वे स्थिरास्तज्ज्ञैरुदाहृताः २३९

कथिता देहिनां देहे सन्धयो द्वे शते दश
शाखासु तेऽष्टषष्टिश्च कोष्ठे त्वेकोनषष्टिका २४०

ग्रीवाया ऊर्ध्वदेशे तु त्र्यशीतिस्ते प्रकीर्त्तिताः
प्रथमं परिगण्यन्ते तेषु शाखागता इह २४१

कोरोदूखलसामुद्गाः प्रतरस्तूणसेवनी
काकतुण्डं मण्डलञ्च शङ्खावर्त्तोऽष्टसन्धयः २४२

अस्थ्नां तु सन्धयो ह्येते केवलाः समुदाहृताः
पेशीस्नायु शिराणान्तु सन्धिसंख्या न विद्यते २४३

सन्धिबन्धनकारिण्यो दोषधातुवहाः शिराः
नाभ्यां सर्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः २४४

शरीरं सकलञ्चैतच्छिराभिः पोष्यते सदा
प्रणालीभिरिवारामाः कुल्याभिः क्षेत्रधान्यवत् २४५

प्रसारणाकुञ्चनादिक्रियाभिः सततं तनौ
शिरा एवोपकुर्वन्ति ताः स्युः सप्तशतानि तु २४६

यथा द्रुमदले साक्षाद् दृश्यन्ते प्रतताः शिराः
तथैव दैहिनो देहे वर्त्तन्ते सकले शिराः २४७

नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिरुपाश्रिता
शिराभिरावृता नाभिश्चक्रनाभिरिवारकैः २४८

क्रियाणामप्रतीघातममोहं बुद्धिकर्मणाम्
करोत्यन्यान् गुणांश्चापि स्वाः शिराः पवनश्चरन् २४९

यदा तु कुपितो वायुः स्वाः शिराः प्रतिपद्यते

तदाऽस्य विविधा रोगा जायन्ते वातसम्भवाः २५०

भ्राजिष्णुतामन्नरुचिमग्निदीप्तिमरोगताम्
करोत्यन्यान् गुणांश्चापि पित्तमात्मशिराश्चरद् २५१

यदा तु कुपितं पित्तं सेवते स्ववहाः शिराः
तदाऽस्यविविधा रोगा जायन्ते पित्तसम्भवाः २५२

स्नेहमङ्गेषु सन्धीनां स्थैर्यं बलमरोगाताम्
करोत्यन्यान् गुणांश्चापि वलासःस्वाःशिराश्चरन् २५३

यदा तु कुपितः श्लेष्मा स्वाः शिराः प्रतिपद्यते
तदाऽस्य विविधा रोगा जायन्ते श्लेष्मसम्भवाः २५४

धातूनां पूरणं वर्णस्पर्शज्ञानमसंशयम्
स्वशिरासु चरद्रक्तं कुर्याच्चान्यान् गुणानपि २५५

यदा तु कुपितं रक्तं सेवते स्ववहाः शिराः
तदाऽस्य विविधा रोगा जायन्ते रक्तसम्भवाः २५६

तत्रारुणा वातवहाः पूर्यन्ते वायुना शिराः
पित्तादुष्णाश्च नीलाश्च शीता गौर्यः स्थिराः कफात्
असृग्धरास्तु ता रक्ताः स्युश्च नात्युष्णशीतलाः २५७

मेदसः स्नेहमादाय शिरा स्नायुत्वमाप्नुयात्
शिराणां हि मृदुः पाकः स्नायूनान्तु ततः खरः २५८

स्नायवो बन्धनानिस्युर्देहमांसास्थिमेदसाम्
सन्धीनामपि यत्तास्तु शिराभ्यः सुदृढाः स्मृताः २५९

नौर्यथा फलकास्तीर्णा बन्धनैर्बहुभिर्युता

नियुक्ताऽगाधसलिले भवेद्भारसहा भृशम् २६०

एवमेव शरीरेस्मिन्यावन्तः सन्धयः स्मृताः
स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः २६१

शतानि नव जायन्ते शरीरे स्नायवो नृणाम्
तासां विवरणं ब्रूमः शिष्याः शृणुत यत्नतः २६२

शाखासु षट्शतानि स्युः कोष्ठे त्रिंशच्छतद्वयम्
ग्रीवाया ऊर्ध्वदेशे तु स्नायूनां सप्ततिः समृता २६३

धमन्यो नाभितो जाताश्चतुर्विंशतिसंख्यया
दशोर्ध्वगा दशाधोगाः शेषास्तिर्यग्गताः स्मृता २६४

यथा स्वभावतः खानि मृणालेषु विसेषु च
धमनीनां तथा खानि रसो यैरभितश्चरेत् २६५

पञ्चाभिभूतास्त्वथ पञ्चकृत्वः पञ्चेन्द्रियं पञ्चसु भाबयन्ति
पञ्चेन्द्रियं पञ्चसु भावयित्वा पञ्चत्वमायान्ति विनाशकाले २६६

महत्यः स्नायवः प्रोक्ताः कण्डरास्तास्तु षोडश
प्रसारणाकुञ्चनयोर्दृष्टं तासां प्रयोजनम् २६७

चतस्रो हस्तयोस्तासां तावत्यः पादयोः स्मृताः
ग्रीवायामपि तावत्यस्तावत्यः पृष्ठसङ्गताः २६८

नेत्रश्रवणनासानां द्वे द्वे रन्ध्रे प्रकीर्त्तिते
मुखमेहनपायूनामेकैकं रन्ध्रमुच्यते २६९

दशमं मस्तके प्रोक्तं रन्ध्राणीति नृणां विदुः
स्त्रीणामन्यानि च त्रीणि स्तनयोर्गर्भवर्त्मनि २७०

मनः प्राणान्नपानीयदोषधातूपधातवः
धातूनां च मला मूत्रं मलमित्यादयस्तनौ २७१

सञ्चरन्ति हि यैर्मार्गैस्तानि स्त्रोतांसि सञ्जगुः
बहूनि तानि संख्याय शक्यन्ते नैव भाषितुम् २७२

जालानि तु शिरास्नायुमांसास्थ्नामुद्भवन्ति हि
तानि चत्वारि चत्वारि सर्वाण्येव च षोडश २७३

कूर्चा स्युर्हस्तयोर्द्वौ तु तावन्तौ पादयोरपि
ग्रीवायामेक एकस्तु मेढ्रे सर्वेऽपि षट् स्मृताः २७४

पृष्ठवंशस्योभयत्र महत्यो मांसरज्जवः
चतस्त्रो मांसपेशीनां बन्धनं तत्प्रयोजनम् २७५

सेवन्यः सप्त तासां तु भवेयुः पञ्च मस्तके
एका शेफसि जिह्वायामेका विध्येन्न ताः क्वचित् २७६

चतुर्दशास्थ्नां सङ्घातास्तेषां त्रयो गुल्फजानुवंक्षणेषु
एतेनेतरसक्थिबाहू च व्याख्यातौ त्रिकशिरसोरेकैकम् २७७

चतुर्दशैव सीमन्ताः कथिता मुनिपुङ्गवैः
सङ्घाताः सीविता यैस्तु सीमन्तास्ते प्रकीर्त्तिताः २७८

क्षीरस्य पच्यमानस्य यथा सन्तानिका भवेत्
पच्यमानस्य शुक्रस्य रजसश्च तथा त्वचः
पूर्वावभासिनी तासां सिध्मस्थानं च सा स्मृता २७९

द्वितीया लोहिता ज्ञेया तिलकालकजन्मभूः २८०

तृतीया तु भवेच्छ्वेता स्थानं चर्मदलस्य सा २८१

ताम्रा चतुर्थी विज्ञेया किलासश्चित्रभूमिका २८२

पिञ्चमी वेदिनी नाम्ना पञ्चभागप्रमाणिका
विसर्पकुष्ठाधिष्ठाना ज्ञेया षष्ठी तु रोहिणी
विख्याता रोहिणी षष्ठी ग्रन्थिगण्डापचीस्थितिः २८३

स्थूला त्वक्सप्तमी ख्याता विद्रध्यादेः स्थितिश्च सा २८४

अस्थ्नो मलानि लोमानि चासंख्यानि भवन्ति हि
सन्ति यावन्ति लोमानि तावन्तो लोमकूपकाः २८५

अङ्गप्रत्यङ्गनिर्वृत्तिः स्वभावादेव जायते
सन्निवेशश्च गात्राणां नात्रास्ते कारणान्तरम् २८६

अङ्गप्रत्यङ्गनिर्वृत्तौ ये भवन्यगुणा गुणाः
ते ते गर्भस्य विज्ञेया धर्माधर्मनिमित्तजाः २८७

दन्तानां पतनं जन्म पुनः पाते त्वसम्भवः
तलेष्वनुद्भवो लोम्नामेतत्सर्वं स्वभावतः २८८

गर्भाशये निपतितं यादृक्शुक्रं तथाऽतवम्
तादृगेव द्रवीभूतं प्रथमे मासि तिष्ठति २८९

मरुत्पित्तकफैस्तत्स्थैः पच्यमानो द्वितीयके
कललस्थमहाभूतसमुदायो घनीभवेत् २९०

तृतीये मासि शिरसो हस्तयोः पादयोस्तथा
पिण्डकाः पञ्च सिध्यन्ति सूक्ष्माङ्गावयवास्तनोः २९१

सर्वाण्यङ्गान्युपाङ्गानि चतुर्थे स्युः स्फुटानि हि
हृदयव्यक्तभावेन व्यज्यते चेतनाऽपि च २९२

तस्माच्चतुर्थे गर्भस्तु नाना वस्तूनि वाञ्छति
ततो द्विहृदया यत्स्यान्नारी दौहृदिनी मता २९३

दौहृदावज्ञया कुब्जं कुणिं षण्ढं च वामनम्
विकृताङ्गमनङ्गं वा पुत्रं नारी प्रसूयते २९४

यतः स्त्री दौहृदं प्राप्य वीर्यवन्तं चिरायुषम्
पुत्रं प्रसूयते तस्मात्तस्यै वाच्छितमर्पयेत् २९५

इन्द्रियार्थांस्तु यान्यान्सा भोक्तुमिच्छति गर्भिणी
गर्भबाधाभयात्तांस्तान्भिषगाहृत्य दापयेत् २९६

सा प्राप्तदौहृदा पुत्रं जनयेत्तु गुणान्वितम्
अलब्धदौहृदा गर्भे लभेतात्मनि वा भयम् २९७

येषु येष्विन्द्रियार्थेषु दौहृदे साऽवमानिता
प्रसूयते सुतं सार्तिं तस्मिंस्तस्मिंस्तदिन्द्रिये २९८

राजसन्दर्शने यस्या दौहृदंजायते स्त्रियाः
अर्थवन्तं महाभागं कुमारं सा प्रसूयते २९९

दुकूलपट्टकौशेयभूषणादिषु दौहृदात्
अलङ्कारैषिणं पुत्रं ललितं सा प्रसूयते ३००

आश्रमे संयतात्मानं धर्मशीलं प्रसूयते
देवताप्रतिमायां तु प्रसूते पार्षदोपमम् ३०१

दर्शने व्यालजातीनां हिंसाशीलं प्रसूयते
रक्ताङ्गं लोमशं शूरं महिषामिषदौहृदात् ३०२

वाराहमांसे स्वप्नालुं शूरं सञ्जनयेत्सुतम्

मृगमांसे तु जङ्घालं विक्रान्तं वनचारिणम् ३०३

अतोऽनुक्तेषु या नारी दौहृदं विदधाति हि
शरीराचारशीलैः सा समानं जनयिष्यति ३०४

पञ्चमे मानसं षष्ठे बुद्धिश्चातिप्रबुद्ध्यते
सर्वाण्यङ्गान्युपाङ्गानि भृशं व्यक्तानि सप्तमे ३०५

ओजोऽष्टमे सञ्चरति माता पुत्रौ मुहुः क्रमात्
तेन तौम्लानमुदितौ स्यातां जातो न जीवति ३०६

न जीवत्यष्टमे जातस्तत्रौजो न स्थिरं यतः
तथा नेर्ऋत्यभागत्वाद्दापयेत्तद्बलि ततः ३०७

नवमे दशमे मासि नारी बालं प्रसूयते
एकादशे द्वादशे वा ततोऽन्यत्र विकारतः ३०८

शिरो भवति चाङ्गस्य पूर्वमित्याह शौनकः
शिरस्येवोपजायन्ते प्रधानानीन्द्रियाणि यत् ३०९

हृदयं जायते पूर्वं कृतवीर्योऽवदन्मुनिः
बुद्धेश्च मनसश्चापि यतस्तत्स्थानमीरितम् ३१०

पाराशर्य इति प्राह पूर्वं नाभिसमुद्भवः
प्राणो यत्र स्थितो देहं वर्द्धयत्यूष्मसंयुतः ३११

पाणिपादं भवेत्पूर्वं मार्कण्डेयमुनेर्मतम्
देहिनः सकलाश्चेष्टाः पाणिपादाश्रया यतः ३१२

प्रथमं जायते कोष्ठं ततः सर्वांगसम्भवः
एतत्तु कथयामास गौतमो मुनिपुंगवः ३१३

सर्वाण्ययङ्गान्युपाङ्गानि युगपत्सम्भवन्ति हि
सूक्ष्मत्वान्नोपलभ्यन्ते मतं धन्वन्तरेरिदम् ३१४

आम्रस्याणुफले भवन्ति युगपन्मांसास्थिमज्जादयो
लक्ष्यन्ते न पृथक्पृथक्तनुतया पुष्टास्त एव स्फुटाः
एवं गर्भसमुद्भवे त्ववयवाः सर्वे भवन्त्येकदा
लक्ष्याः सूक्ष्मतया न ते प्रकटतामायान्ति वृद्धिं गताः ३१५

अथ शरीरे पितृज-मातृज-रसजात्मजा भागा उच्यन्ते तत्र
केशाःश्मश्रु च लोमानि नखा दन्ताः शिरास्तथा
धमन्यः स्नायवः शुक्रमेतानि पितृजानि हि ३१६

मांसासृङ्मज्जमेदांसि यकृत्प्लीहान्त्रनाभयः
हृदयं च गुदं चापि भवन्त्येतानि मातृतः ३१७

शरीरोपचयो वर्णो बलं देहस्थितिस्तथा
रसादेतानि जायन्ते भिषजो मुनयो जगुः ३१८

ज्ञानं विज्ञानमायुश्च सुखदुःखादिकं तथा
इन्द्रियाणि च सर्वाणि भवन्त्येतानि चात्मनः ३१९

अग्नीषोमौ मही वायुर्नभः सत्त्वं रजस्तमः
पञ्चेन्द्रियाणि भूतात्मा गर्भं सञ्जीवयन्ति हि ३२०

गर्भस्य नाभिनाड्या तु नाडी रसवहा स्त्रियाः
संलग्ना तेन गर्भस्य वृद्धिर्भवति नित्यशः ३२१

निःश्वासोच्छ्वाससंक्षोभस्वप्नांशान्सोऽधिगच्छति
मातुर्निःश्वसितोच्छ्वाससंक्षोभस्वप्नसंभवान् ३२२

गर्भस्य नाभिमध्ये तु ज्योतिःस्थानं ध्रुवं स्मृतम्

तदाधमति वातश्च देहस्तेनास्य वर्धते ३२३

ऊष्मणा सहिताश्चापि दारयत्यस्य मारुतः
ऊर्ध्वं तिर्यगधस्ताच्च स्रोतांसि तु यथा तथा ३२४

दृष्टिश्च रामकूपाश्च न वर्धन्ते कदा च न
ध्रुवाण्येतानि मर्त्यानामिति धन्वन्तरेर्मतम् ३२५

शरीरे क्षीयमाणेऽपि वर्धेते द्वाविमौ सदा
स्वभावं प्रकृतिं कृत्वा नखकेशाविति स्थितिः ३२६

चेतनानामधिष्ठानं मनो देहश्च सेन्द्रियः
केशलोमनखाग्रान्नमलद्रवगुणैर्विना ३२७

वाताल्पत्वादयोगाच्च वायोः पक्वाशयस्य च
वातमूत्रपुरीषाणि गर्भस्थो न विमुञ्चति ३२८

जरायुणा मुखे छन्ने कण्ठे च कफवेष्टिते
वायोर्मार्गनिरोधाच्च न गर्भस्थः प्ररोदिति ३२९

गर्भिणी प्रथमादह्नः प्रहृष्टा भूषिता शुचिः
भवेच्छुक्लाम्बरधरा गुरुविप्रार्चने रता ३३०

भोज्यं तु मधुरप्रायं स्निग्धं हृद्यं द्रवं लघु
सस्कृतं दीपनीयं तु नित्यमेवोपयोजयेत् ३३१

गर्भिणी न तु कुर्वीत व्यायाममपतर्पणम्
व्यवायं च न सेवेत न कुर्यादतितर्पणम् ३३२

रात्रौ जागरणं शोकं यानस्यारोहणं तथा
रक्तमोक्षं वेगरोधं न कुर्यादुत्कटासनम् ३३३

दोषाभिघातैर्गर्भिण्या यो यो भागः प्रपीड्यते
स स भागः शिशोस्तस्य गर्भस्थस्य प्रपीड्यते ३३४

मलिनां विकृताकारां हीनाङ्गीं न स्पृशेत्स्त्रियम्
न जिघ्रेदपि दुर्गन्धं न पश्येन्नयनाप्रियम् ३३५

वचांसि नापि शृणुयात्कर्णयोरप्रियाणि च
नान्नं पर्युषितं शुष्कं भुञ्जीत क्वथितं न च ३३६

चैत्यश्मशानवृक्षांश्च भावांश्चाप्ययशस्करान्
बहिर्निष्क्रमणं क्रोधं शून्यागारं च वर्जयेत् ३३७

नोच्चैर्ब्रूयान्न तत्कुर्याद्येन गर्भो विनश्यति
तैलाभ्यङ्गोद्वर्तनं च नात्यर्थं कारयेदपि ३३८

नामृद्वास्तरणं कुर्यान्नात्युच्चं शयनासनम्
एतांस्तु नियमान्सर्वान्यत्नात्कुर्वीत गर्भिणी ३३९

नवमे दशमे मासि नारी गर्भं प्रसूयते
एकादशे द्वादशे वा ततोऽन्यत्र विकारतः ३४०

अष्टहस्तायतं चारु चतुर्हस्तविशालकम्
प्राचीद्वारमुदग्द्वारं विदध्यात्सूतिकागृहम् ३४१

जाते हि शिथिले कुक्षौ मुक्ते हृदयबन्धने
सशूले जघने नारी विज्ञेया प्रसवोत्सुका ३४२

आसन्नप्रसवायास्तु कटीपृष्ठं तु सव्यथम्
भवेन्मुहुः प्रवृत्तिश्च मूत्रस्य च मलस्य च ३४३

तैलेनाभ्यक्तगात्रान्तां संस्नातामुष्णवारिणा

यवागूं पाययेत्कोष्णां मात्रया घृतसंयुताम् ३४४

कृतोपधाने मृदुनि विस्तीर्णे शयने शनैः
अभुग्नसक्थी चोत्ताना नारी तिष्ठेद्व्यथाऽन्विता ३४५

चतस्त्रोऽशकनीयाश्च स्त्रावणे कुशला हिताः
वृद्धाः परिचरेयुस्ताः सम्यक्छिन्ननखाः स्त्रियः ३४६

अपत्यमार्गं तैलेन समभ्यज्य समन्ततः
एका तु तासु सुभगे प्रवाहस्वेति तां वदेत् ३४७

अन्यथा मा प्रवाहिष्ठाः प्रावहेथा व्यथा यदि
प्रवाहेथाः शनैः पूर्वंप्रगाढं च ततः परम् ३४८

ततो गाढतमं गर्भे योनिद्वारमुपागते
अपरासहितो गर्भो यावत्पतति भूतले ३४९

मूकं वा बधिरं कुब्जं श्वासकासक्षयान्वितम्
सूते स्त्रस्ततनुं बालमकाले तु प्रवाहणात् ३५०

इति श्रीमिश्रलटकन तनय श्रीमन्मिश्रभाव विरचिते
भावप्रकाशे गर्भप्रकरणं तृतीयम् ३

अथ चतुर्थं बालप्रकरणम् ४

अथ बाले समुत्पन्ने विदधीत विधिं तथा
यथैव कुलवृद्धस्त्रीव्यवहारपरम्परा १

प्रसूता हितमाहारं विहारं च समाचरेत्
व्यायामं मैथुनं क्रोधं शीतसेवां विवर्जयेत् २

मिथ्याचारात्सूतिकाया यो व्याधिरुपजायते
स कृच्छ्रसाध्योऽसाध्यो वा भवेत्तत्पथ्यमाचरेत् ३

सर्वतः परिशुद्धा स्यात्स्निग्धपथ्याऽल्पभोजना
स्वेदाभ्यङ्गपरा नित्यं भवेन्मासमतन्द्रिता ४

प्रसूता सार्धमासान्ते दृष्टे वा पुनरार्त्तवे
सूतिकानामहीना स्यादिति धन्वन्तरेर्मतम् ५

व्युपद्रवां विशुद्धां च विज्ञाय वरवर्णिनीम्
ऊर्ध्वं चतुर्भ्यो मासेभ्यो नियमं परिहारयेत् ६

रसप्रसादो मधुरः पक्वाहारनिमित्तजः
कृत्स्नाद्देहात्स्तनौ प्राप्तः स्तन्यमित्यभिधीयते ७

स्तन्यं त्रिरात्रात्स्त्रीणां वा चतूरात्रादनन्तरम्
प्रवर्त्तयन्ति विवृता धमन्यो हृदये स्थिताः ८

पयः पुत्रस्य संस्पर्शाद्दर्शनात्स्मरणादपि
ग्रहणादप्युरोजस्य शुक्रवत्सम्प्रवर्त्तते
स्नेहो निरन्तरस्तस्य प्रवाहे हेतुरुच्यते ९

अवात्सल्याद्भयाच्छोकात्क्रोधादत्यपतर्पणात्
स्त्रीणां स्तन्यं भवेत्स्वल्पं गर्भान्तरविधारणात् १०

शालिषष्टिकगोधूमान्मांसक्षुद्रझषानपि
कालशाकमलाबूं च नारिकेलं कसेरुकम् ११

शृङ्गाटकं वरीं चापि विदारीकन्दमेव च
लशुनं दुग्धवृद्धयै स्त्री सेवेत सुमना भवेत् १२

कलमस्य तण्डुलानां कल्कं या क्षीरपेषितं पिबति
सा भवति भृशं तरुणी क्षीरभरेणैव तुङ्गकुचयुगला १३

कलमः कलिविख्यातो जायते स बृहद्ध्रदे
काश्मीरदेश एवोक्तो महातण्डुलसंज्ञकः १४

विदारिकन्दस्य रसं पिबेत्स्तन्यस्य वृद्धये
तच्चूर्णं तस्य वृद्ध्यर्थं पिबेद्वा क्षीरसंयुतम् १५

धात्र्या गुरुभिराहारैर्विहारैर्दोषलैस्तथा
देहे दोषाः प्रकुप्यन्ति ततः स्तन्यं प्रदुष्यति १६

मिथ्याऽहारविहारिण्या दुष्टा वातादयः स्त्रियाः
दूषयन्ति पयस्तेन शरीरं व्याधयः शिशोः १७

कषायं सलिलप्लावि स्तन्यं मारुतदूषितम्
पित्तादम्लं च कटुकं राज्योऽम्भसि तु पीतिकाः १८

कफदुष्टं तु यत्तोये निमज्जति च पिच्छिलम्
द्वन्द्वजं तु द्विलिङ्गं स्यात्त्रिलिङ्गं सान्निपातिकम् १९

धात्री क्षीरविशुद्ध्यर्थं मुद्गयूषरसाशिनी
भार्ङ्गीदारुवचाः पिष्ट्वा पिबेत्साऽतिविषास्तथा २०

पाठामूर्वाऽब्दभूनिम्बदारुशुण्ठीकलिङ्गकैः
सारिवामत्स्यपित्ताऽख्यै क्वाथः स्तन्यविशोधनः २१

पटोलनिम्बासनदारुपाठा मूर्वां गुडूचीं कटुरोहिणीं च
सनागरां च क्वथितां च तोये धात्री पिबेत्स्तन्यविशुद्धिहेतोः २२

नीरे स्यन्यं यदेकि स्वादविवर्णमतन्तुमत्
पाण्डुरं तनु शीतं च तद्दुग्धं शुद्धमादिशेत् २३

पीताय यदि बालस्य विदध्यादुपमातरम्

सुविचार्य गुणान्दोषान्कुर्याद्धात्रीं तदेदृशीम् २४

सवर्णां मध्यवयसां सच्छीलां मुदितां सदा
शुद्धदुग्धां बहुक्षीरां सवत्सामतिवत्सलाम् २५

स्वाधीनामल्पसन्तुष्टां कुलीनां सज्जनात्मजाम्
कैतवेन परित्यक्तां निजपुत्रशदृशं शिशौ २६

शोकाकुलाक्षु धार्ता च श्रान्ता व्याधिमती सदा
अत्युच्चा नितरां नीचा स्थूलातीव भृशं कृशा २७

गर्भिणी ज्वरिणी चापि लम्बोन्नतपयोधरा
अजीर्णभोजिनी चापि तथा पथ्यविवर्जिता २८

आसक्ता क्षुद्रकार्येषु दुःखार्ता चञ्चलाऽपि च
एतासां स्तन्यपानेन शिशुर्भवति सामयः २९

तत्र माता प्रशस्ताङ्गी चारुवस्त्रा पुरोमुखी
उपविश्यासने सम्यग्दक्षिणं स्तनमम्बुना ३०

प्रक्षाल्येषत्परिस्राव्य मन्त्राभ्यामभिमन्त्रितम्
उदङ्मुखं शिशुं क्रोडे शनैः सन्धाय पाययेत् ३१

अस्त्रावितं स्तनं बालः पिबन्स्तन्येन भूयसा
पूर्णस्रोता वमीकासश्वासैर्भवति पीडितः ३२

क्षीरनीरनिधिस्तेऽस्तु स्तनयोः क्षीरपूरकः
सदैव सुभगो बालो भवत्वेष महाबलः ३३

पयोऽमृतसमं पीत्वा कुमारस्ते शुभानने
दीर्घमायुरवाप्नोतु देवाः प्राप्यामृतं यथा ३४

क्षीरसात्म्यतया क्षीरमाजं गव्यमथापि वा
दद्यादास्तन्यपर्याप्तेर्बालेभ्यो वीक्ष्य मात्रया ३५

यथोक्तविधिना बालं मासि षष्ठेऽष्टमेऽपि च
अन्नं सम्प्राशयेत्किञ्चित्ततस्तद्वर्धयेत्क्रमात् ३६

बालमङ्के सुखं दध्यान्न चैनं तर्जयेत्क्वचित्
सहसा बोधये न्नैव नायोग्यमुपवेशयेत् ३७

नाकृष्य स्थापयेत्क्रोडे न क्षिप्रं शयने क्षिपेत्
रोदयेन्न क्वचित्कार्ये विधिमावश्यकं विना ३८

तच्चित्तमनुवर्त्तेत तं सदैवानुमोदयेत्
वितातपतडिद्वृष्टिधूमानलजलादितः
निम्नोच्चस्थानतश्चापि रक्षेद्बालं प्रयत्नतः ३९

अभ्यङ्गोद्वर्त्तन स्नानं नेत्रयोरञ्जनं तथा
वसनं मृदु यत्तच्च तथा मृद्वनुलेपनम्
जन्मप्रभृति पथ्यानि बालस्यैतानि सर्वथा ४०

कवलः पञ्चमाद्वर्षादष्टमान्नस्यकर्म च
विरेकः षोडशाद्वर्षाद्विंशतेश्चैव मैथुनम् ४१

वयस्तु त्रिविधं बाल्यं मध्यमं वार्धकं तथा
ऊनषोडशवर्षस्तु नरो बालो निगद्यते ४२

त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशी तथाऽन्नभुक्
दुग्धाशी वर्षपर्यन्तं दुग्धान्नाशी शरद्द्वयम् ४३

तदुत्तरं स्यादन्नाशी एवं बालस्त्रिधा मतः
मध्ये षोडशसप्तत्योर्मध्यमः कथितो बुधैः ४४

चतुर्धा मध्यमं वृद्धियुवपूर्णक्षयान्वितम्
भवेदाविंशतेर्वृद्धिर्युवा त्वान्त्रिंशतो मतः ४५

चत्वारिंशत्समा यावत्तिष्ठेद्वीर्यादिपूरितः
ततः क्रमेण क्षीणः स्याद्यावद्भवति सप्ततिः ४६

ततस्तु सप्ततेरूर्ध्वं क्षीणधातुरसादिकः
क्षीयमाणेन्द्रियबलः क्षीणरेता दिने दिने ४७

बलीपलितखालित्ययुक्तः कर्मसु चाक्षमः
कासश्वासादिभिः क्लिष्टो वृद्धो भवति मानवः ४८

बाल्ये विवर्धते श्लेष्मा पित्तं स्यान्मध्यमेऽधिकम्
वार्धके वर्द्धते वायुर्विचार्यैतदुपक्रमेत् ४९

बाल्यं वृद्धिश्छविर्मेधा त्वग्दृष्टिः शुक्रविक्रमौ
बुद्धिः कर्मेन्द्रियं चेतो जीवितं दशतो ह्रसेत् ५०

सप्त प्रकृतयो नृणां वातात्पित्तात्कफात्तथा
संसर्गात्सन्निपाताच्च भवन्ति भिषजां मते ५१

शुक्रशोणितसंयोगे यो दोषस्तूत्कटो भवेत्
प्रकृतिर्जायते तेन तस्या लक्षणमुच्यते ५२

शुक्रासृग्गर्भिणीभोज्यचेष्टागर्भाशयार्त्तिषु
यः स्याद्दोषोऽधिकस्तेन प्रकृतिः सप्तधोदिता ५३

जागरूकोऽल्पकेशश्च स्फुटितांघ्रिकरः कृशः
शीघ्रगो बहुवाग्यूक्षः स्वप्ने वियति गच्छति
एवंविधः स विज्ञेयो वातप्रकृतिको नरः ५४

पित्तप्रकृतिको लोको यादृशोऽथ निगद्यते
अकालपलितो गौरः क्रोधी स्वेदी च बुद्धिमान् ५५

बहुभुक्ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति
एवंविधो भवेद्यस्तु पित्तप्रकृतिको नरः ५६

श्यामकेशः क्षमी स्थूलो बहुवीर्यो महाबलः
स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः ५७

दृश्यते प्रकृतौ यत्र रूपं दोषद्वयस्य तु
द्विसंसर्गेण जानीयात्सर्वलिङ्गैस्त्रिदोषजम् ५८

विभुत्वादाशुकारित्वाद्बलित्वादन्यकोपनात्
स्वातन्त्र्याद्बहुरोगत्वाद्दोषाणां प्रबलोऽनिलः ५९

प्रायोऽत एव पवनाध्युषिता मनुष्या दोषात्मकाः स्फुटितधूसरकेशगात्राः
शीतद्विषश्चलधृतिस्मृतिबुद्धिचेष्टासौहार्ददृष्टिगतयोऽतिबहुप्रलापाः ६०

अल्पपित्तबलजीवितनिद्राः सन्नसक्तचलजर्जरवाचः
नास्तिका बहुभुजः सविलासा गीतहास्यमृगयाकलिलोलाः ६१

मधुराम्लपटूष्णसात्म्यकांक्षाः कृशदीर्घाकृतयः सशब्दयाताः
न दृढा न जितेन्द्रिया न चार्या न च कान्तादयिता बहुप्रजा वा ६२

नेत्राणि चैषां खरधूसराणि वृत्तान्यचारूणि मृतोपमानि
उन्मीलितानीव भवन्ति सुप्ते शैलद्रुमांस्ते गगनं च यान्ति ६३

अधन्या मत्सराध्माताः स्तेना प्रोद्बद्धपिण्डिकाः
श्वशृगालोष्ट्रगृध्राखुकाकानूकाश्च वातिकाः ६४

पित्तं वह्निर्वह्निजं वा यदस्मात्पित्तोद्रिक्तस्तीक्ष्णतृष्णाबुभुक्षः

गौरोष्णाङ्गस्ताम्रहस्ताङ्घ्रिवक्त्रः शूरो मानी पिङ्गकेशोऽल्परोमा ६५

दयितमाल्यविलेपनमण्डनः सुचरितः शुचिराश्रितवत्सलः
विभवसाहसबुद्धिबलान्वितो भवति भीषु गतिर्द्विषतामपि ६६

मेधावी प्रशिथिलसन्धिबन्धमांसो नारीणामनभिमतोऽल्पशुक्रकामः
आवासः पलिततरंगनीलिकानां भुक्तान्नं मधुरकषायतिक्तशीतम् ६७

धर्मद्वेषी स्वेदनः पूतिगन्धिर्भूर्युच्चारक्रोधपानाशनेर्ष्यः
सुप्तं पश्येत्कर्णिकारान् पलाशान् दिग्दाहोल्काविद्युदर्कानलांश्च ६८

तनूनि पिङ्गानि चलानि चैषां तन्वल्पपद्माणि हिमप्रियाणि
क्रोधेन मद्येन रवेश्च भासा रागं व्रजन्त्याशु विलोचनानि ६९

मध्यायुषो मध्यबलाः पण्डिताः क्लेशभीरवः
व्याघ्रर्क्षकपिमार्जारवृकानूकाश्च पैत्तिकाः ७०

श्लेष्मा सोमं श्लेष्मलस्तेन सौम्यो गूढस्निग्धश्लिष्टसन्ध्यस्थिमांसः
क्षुत्तृड्दुःखक्लेशधर्मैरतप्तो बुद्ध्या युक्तः सात्त्विकः सत्यसन्धः ७१

प्रियंगुदूर्वाशरकाण्डदर्भगोरोचनापद्मसुवर्णवर्णः
प्रलम्बबाहुः पृथुपीनवक्षा महाललाटो घननीलकेशः ७२

मृदङ्गः समसुविभक्तचारुदेहो बह्वोजोरतिरसशुक्रपुत्रभृत्यः
धर्मात्मा वदति न निष्ठुरं च जातु प्रच्छन्नं वहति दृढं चिरं च वैरम् ७३

समदद्विरदेन्द्रतुल्ययातो जलदाम्भोधिमृदङ्गसिंहघोषः
स्मृतिमानभियोगवान्विनीतो न च बाल्येऽप्यतिरोदनो न लोलः ७४

तिक्तं कषायं कटुकोष्णरूक्षमल्पं स भुंक्ते बलवांस्तथाऽपि
रक्तान्तसुस्निग्धविशालदीर्घसुव्यक्तशुक्लासितपद्मलाक्षः ७५

अल्पव्याहारक्रोधपानाशनेर्ष्यः प्राज्ञायुर्वित्तो दीर्घदर्शी वदान्यः
श्राद्धो गम्भीरः स्थूललक्ष्यः क्षमावानार्योनिद्रालुर्दीर्घसूत्रः कृतज्ञः ७६

ऋजुर्विपश्चित्सुभगः सलज्जो भक्तो गुरूणां स्थिरसौहृदश्च
स्वप्ने सपद्मान्सविहङ्गमालांस्तोयाशयान्पश्यति तोयदांश्च ७७

ब्रह्मरुद्रेन्द्रवरुणतार्क्ष्यहंसगजाधिपैः
श्लेष्मप्रकृतयस्तुल्यास्तथा सिंहाश्वगोवृषैः ७८

विषजातो यथा कीटो न विषेण प्रबाध्यते
तद्वत्प्रकृतयो मर्त्यं शक्नुवन्ति न बाधितुम् ७९

प्रकोपो वाऽन्यभावो वा शमो वा नोपजायते
प्रकृतीनां स्वभावेन जायते तु गतायुषः ८०

इति श्रीमिश्रलटकन तनय श्रीमन्मिश्रभाव विरचिते
भावप्रकाशे बालप्रकरणं चतुर्थम् ४

अथ पञ्चमं दिनचर्यादिप्रकरणम् ५

भूमिदेशस्त्रिधाऽनूपो जांगलो मिश्रलक्षणः १

नदीपल्वलशैलाढ्यः फुल्लोत्पलकुलैर्युतः
हंससारसकारंडचक्रवाकादिसेवितः २

शशवाराहमहिषरुरुरोहिकुलाकुलः
प्रभूतद्रुमपुष्पाढ्यो नीलशस्यफलान्वितः ३

अनेकशालिकेदारकदलीक्षुविभूषितः
अनूपदेशो ज्ञातव्यो वातश्लेष्मामयार्त्तिमान् ४
आकाशसम उच्चश्च स्वल्पपानीयपादपः
शमीकरीरबिल्वार्कपीलुकर्कंधुसङ्कुलः ५

हरिणैणर्क्षपृषतगोकर्णखरसङ्कुलः
सुस्वादुफलवान्देशो वातलो जाङ्गलः स्मृतः ६

बहूदकनगोऽनूपः कफमारुतरोगवान्
जाङ्गलोऽल्पाम्बुशाखी च पित्तासृङ्मारुतोत्तरः ७

संसृष्टलक्षणो यस्तु देशः साधारणो मतः
समाः सधारणे यस्माच्छीतवर्षोष्णमारुताः
समता तेन दोषाणां तस्मात्साधारणो वरः ८

उचिते वर्तमानस्य नास्ति दुर्देशजं भयम्
आहारस्वप्नचेष्टाऽदौ तद्देशस्य कृते सति ९

यस्य देशस्य यो जन्तुस्तज्जं तस्यौषधं हितम्
देशादन्यत्र वसतस्तत्तुल्यगुणमौषधम् १०

स्वे देशेनिचिता दोषा अन्यस्मिन्कोपमागताः
बलवन्तस्तथा न स्युर्जलजाः स्थलजास्तथा ११

मानवो येन विधिना स्वस्थस्तिष्ठति सर्वदा
तमेव कारयेद्वैद्यो यतः स्वास्थ्यं सदेप्सितम् १२

दिनचर्यां निशाचर्यामृतुचर्यां यथोदिताम्
आचरन्पुरुषः स्वस्थः सदा तिष्ठति नान्यथा १३

समदोषः समाग्निश्च समधातुमलक्रियः
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते १४

ब्राह्मे मुहूर्ते बुध्येत स्वस्थो रक्षाऽथमायुषः
तत्र सर्वाघशान्त्यर्थं स्मरेद्धि मधुसूदनम् १५

दध्याज्यादर्शसिद्धार्थं बिल्वगोरोचनस्रजाम्
दर्शनं स्पर्शनं कार्यं प्रबुद्धेन शुभावहम् १६

स्वमाननं घृते पश्येद् यदीच्छेच्चिरजीवितम्
आयुष्यमुषसि प्रोक्तं मलादीनां विसर्जनम्
तदन्त्रकूजनाध्मानोदरगौरववारणम् १७

आटोपशूलौ परिकर्त्तिका च सङ्गः पुरीषस्य तथोर्ध्ववातः
पुरीषमास्यादथवा निरेति पुरीषवेगेऽभिहते नरस्य १८

वातमूत्रपुरीषाणां सङ्गो ध्मानं क्लमो रुजा
जठरे वातजाश्चान्येरोगाः स्युर्वातनिग्रहात् १९

बस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजा
विनामो वङ्क्षणानाहः स्यालिङ्गं मूत्रनिग्रहे २०

न वेगितोऽन्यकार्यः स्यान्न वेगानीरयेद्बलात्
कामशोकभयक्रोधान्मनोवेगान्विधारयेत् २१

गुदादिमलमार्गाणां शौचं कान्तिबलप्रदम्
पवित्रकरमाख्यातमलक्ष्मीकलिपापहृत् २२

प्रक्षालनं मतं पाणयोः पादयोः शुद्धिकारणम्
मलश्रमहरं वृष्यं चक्षुष्यं राजसापहम् २३

भक्षयेद्दन्तपवनं द्वादशाङ्गुलमायतम्
कनिष्ठिकाऽग्रवत्स्थूलमृज्वग्रन्थिं तथाऽव्रणम् २४

एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन तु
दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन् २५

क्षौद्रत्रिकटुकाक्तेन तैलसिन्धुभवेन वा
चूर्णेन तेजोवत्याश्च दन्तान्नित्यं विशोधयेत् २६

मधुको मधुरे श्रेष्ठः करञ्जः कटुके तथा
निम्बः स्यात्तिक्तके श्रेष्ठः कषाये खदिरस्तथा २७

समयं तु समालोक्य दोषं च प्रकृतिं तथा
यथोचितै रसैर्वीर्यैर्युक्तं द्रव्यं प्रयोजयेत् २८

तेनास्य मुखवैरस्यदन्तजिह्वाऽस्यजा गदाः
रुचिवैशद्यलघुता न भवन्ति भवन्ति च २९

अर्के वीर्यं वटे दीप्तिः करञ्जे विजयो भवेत्
प्लक्षे चैवार्थसम्पत्तिर्वैदर्यां मधुरोध्वनिः ३०

खदिरे मुखसौगन्ध्यं बिल्वे तु विपुलं धनम्
उदुम्बरे तु वाक्सिद्धिराम्रे त्वारोग्यमेव च ३१

कदम्बे तु धृतिर्मेधा चम्पके च दृढा मतिः
शिरीषे कीर्त्तिसौभाग्यमायुरारोग्यमेव च ३२

अपामार्गे धृतिर्मेधा प्रज्ञाशक्तिस्तथाऽसने
दाडिम्यां सुन्दराकारः ककुभे कुटजे तथा ३३

जातीतगरमन्दारैर्दुःस्वप्नं च विनश्यति ३४

गुर्वाकस्तालहिन्तालौ केतकश्च बृहत्तृणः
खर्जूरं नारिकेलं च सप्तैते तृणराजकाः ३५

तृणराजसमुत्पन्नं यः कुर्याद्दन्तधावनम्
नरश्चाण्डालयोनिः स्याद्यावद्दन्तं न पश्यति ३६

न खादेद्गलताल्वोष्ठजिह्वादन्तगदेषु तत्
मुखस्य पाके शोथे च श्वासकासवमीषु च ३७

दुर्बलोऽजीर्णभुक्तश्च हिक्कामूर्च्छामदान्वितः
शिरोरुजार्तस्तृषितः श्रान्तः पानक्लमान्वितः ३८

अर्दितः कर्णशूली च नेत्ररोगी नवज्वरी
वर्जयेद्दन्तकाष्ठं तु हृदामययुतोऽपि च ३९

जिह्वानिर्लेखनं हैमं राजतं ताम्रजं तथा
पाटितं मृदु तत्काष्ठं मृदुपत्रमयं तथा ४०

दशाङ्गुलं मृदु स्निग्धं तेन जिह्वां लिखेत्सुखम्
तज्जिह्वामलवैरस्यदुर्गन्धजडताहरम् ४१

गण्डूषमपि कुर्वीत शीतेन पयसा मुहुः
कफतृष्णामलहरं मुखान्तःशुद्धिकारकम् ४२

सुखोष्णोदकगण्डूषः कफारुचिमलापहः
दन्तजाड्यहरश्चापि मुखलाघवकारकः ४३

विषमूर्च्छामदार्त्तानां शोषिणां रक्तपित्तिनाम्
कुपिताद्यिमलक्षीणरूक्षाणां स न शस्यते ४४

मुखप्रक्षालनं शीतपयसा रक्तपित्तजित्
मुखस्य पिडिकाशोषनीलिकाव्यङ्गनाशनम् ४५

कुर्याद्वाऽपि कदुष्णेन पयसाऽस्यविशोधनम्
कफवातहरं स्निग्धं मुखशोषविनाशनम् ४६

कटुतैलादि नस्यार्थे नित्याभ्यासेन योजयेत्

प्रातः श्लेष्मणि मध्याह्ने पित्ते सायं समीरणे ४७

सुगन्धवदनाः स्निग्धनिःस्वना विमलेन्द्रियाः
निर्बलीपलितव्यङ्गा भवेयुर्नस्यशीलिनः ४८

सौवीरमञ्जनं नित्यं हितमक्ष्णोस्ततो भजेत्
लोचने भवतस्तेन मनोज्ञे सूक्ष्मदर्शने ४९

स्रोतोऽञ्जनं मतं श्रेष्ठं विशुद्धं सिन्धुसम्भवम्
दृष्टेः कण्डूमलहरं दाहक्लेदरुजापहम् ५०

अक्ष्णो रूपावहं चैव सहते मारुतातपौ
नेत्रे रोगा न जायन्ते तस्मादञ्जनमाचरेत् ५१

रात्रौ जागरितः श्रान्तश्छर्दितो भुक्तवांस्तथा
ज्वरातुरः शिरः स्नातो नाक्ष्णोरञ्जनमाचरेत् ५२

पञ्चरात्रान्नखश्मश्रुकेशरोमाणि कर्त्तयेत्
केशश्मश्रुनखादीनां कर्त्तनं सम्प्रसाधनम्
पौष्टिकं धन्यमायुष्यं शौचकान्तिकरं परम् ५३

उत्पाटयेत्तु लोमानि नासाया न कदाचन
तदुत्पाटनतो दृष्टेर्दौर्बल्यं त्वरया भवेत् ५४

केशपाशे प्रकुर्वीत प्रसाधन्या प्रसाधनम्
केशप्रसाधनं केश्यं रजोजन्तुमलापहम् ५५

आदर्शालोकनं प्रोक्तं मङ्गल्यं कान्तिकारम्
पौष्टिकं बल्यमायुष्यं पापालक्ष्मीविनाशनम् ५६

लाघवं कर्मसमर्थ्यं विभक्तघनगात्रता

दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते ५७

व्यायामदृढगात्रस्य व्याधिर्नास्ति कदाचन
विरुद्धं वा विदग्धं वा भुक्तं शीघ्रं विपच्यते ५८

भवन्ति शीघ्रं नैतस्य देहे शिथिलतादयः
न चैवं सहसाऽक्रम्य जरा समधिरोहति ५९

न चास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षकम्
स सदा गुणमाधत्ते बलिनां स्निग्धभोजिनाम् ६०

वसन्ते शीतसमये सुतरां स हितो मतः
अन्यदाऽपि च कर्त्तव्यो बलार्धेन यथा बलम् ६१

हृदयस्थो यदा वायुर्वक्त्रं शीघ्रं प्रपद्यते
मुखं च शोषं लभते तद्बलार्धस्य लक्षणम् ६२

किं वा ललाटे नासायां गात्रसन्धिषु कक्षयोः
यदा सञ्जायते स्वेदो बलार्धं तु तदादिशेत् ६३

भुक्तवान्कृतसम्भोगः कासी श्वासी कृशः क्षयी
रक्तपित्ती क्षती शोषी न तं कुर्यात्कदाचन ६४

अतिव्यायामतः कासो ज्वरश्छर्दिं श्रमः क्लमः
तृष्णा क्षयः प्रतमको रक्तपित्तं च जायते ६५

अभ्यङ्गं कारयेन्नित्यं सर्वेष्वङ्गेषु पुष्टिदम्
शिरः श्रवणपादेषु तं विशेषेण शीलयेत् ६६

सार्षपं गन्धतैलं च यत्तैलं पुष्पवासितम्
अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन ६७

अभ्यङ्गो वातकफहृच्छ्रमशान्तिबलं सुखम्
निद्रावर्णमृदुत्वायुष्कुरुते देहपुष्टिकृत् ६८

अभ्यङ्गः शीलितो मूर्ध्नि सकलेन्द्रियतर्पकः
दृष्टितुष्टिकरो हन्ति शिरोभूमिगतान्गदान् ६९

केशानां बहुतां दाढर्यं मृदुतां दीर्घतां तथा
कृष्णतां कुरुते कुर्याच्छिरसःपूर्णतामपि ७०

न कर्णरोगा न मलं न च मन्याहनुग्रहः
नोच्चैः श्रुतिर्न बाधिर्यं स्यान्नित्यं कर्णपूरणात् ७१

रसाद्यैः पूरणं कर्णे भोजनात्प्राक्प्रशस्यते
तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते ७२

पादाभ्यङ्गश्च तत्स्थैर्यनिद्रादृष्टिप्रसादकृत्
पादसुप्तिश्रमस्तम्भसङ्कोचस्फुटनप्रणुत् ७३

व्यायामक्षुण्णवपुषं पद्भ्यां सम्मर्दितं तथा
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः ७४

लोमकूपशिराजालधमनीभिः कलेवरे
तर्पयेद्बलमाधत्ते स्नेहयुक्तेऽवगाहने ७५

अद्भिः संसिक्तमूलानां तरूणां पल्लवादयः
वर्द्धन्ते हि तथा नृणां स्नेहसंसिक्तधातवः ७६

नवज्वरी अजीर्णी च नाभ्यक्तव्यः कथञ्चन
तथा विरिक्तो वान्तश्च निरूढो यश्च मानवः ७७

पूर्वयोः कृच्छ्रता व्याधेरसाध्यत्वमथापि वा

शेषाणां च त्विह प्रोक्ता वह्निसादादयो गदाः ७८

उद्वर्त्तनं कफहरं मेदोघ्नं शुक्रदं परम्
बल्यं शोणितकृच्चापि त्वक्प्रसादमृदुत्वकृत् ७९

मुखलेपादृढं चक्षुः पीनो गण्डस्तथाऽननम्
कान्तमव्यङ्गपिडकं भवेत्कमलसन्निभम् ८०

दीपनंवृष्यमायुष्यं स्नानमोजोबलप्रदम्
कण्डूमलश्रमस्वेदतन्द्रातृड्दाहपाप्मनुत् ८१

बाह्यैश्च सेकैः शीताद्यैरूष्माऽन्तर्याति पीडितः
नरस्य स्नानमात्रस्य दीप्यते तेन पावकः ८२

शीतेन पयसा स्नानं रक्तपित्तप्रशान्तिकृत्
तदेवोष्णेन तोयेन बल्यं वातकफापहम् ८३

शिरः स्नानमचक्षुष्यमत्युष्णेनाम्बुना सदा
वातश्लेष्मप्रकोपे तु हितं तच्च प्रकीर्त्तितम् ८४

अशीतेनाम्भसा स्नानं पयःपानं नवाःस्त्रियः
एतद्वो मानवाः पथ्यं स्निग्धमल्पं च भोजनम् ८५

यः सदाऽमलकैः स्नानं करोति स विनिश्चितम्
बलीपलितनिर्मुक्तो जीवेद्वर्षशतं नरः ८६

स्नानं ज्वरेऽतिसारे च नेत्रकर्णानिलार्तिषु
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम् ८७

स्नानस्यानन्तरं सम्यग्वस्त्रेणाङ्गस्य मार्जनम्
कान्तिप्रदं शरीरस्य कण्डूत्वग्दोषनाशनम् ८८

कौशेयौर्णिकवस्त्रं च रक्तवस्त्रं तथैव च
वातश्लेष्महरं तत्तु शीतकाले विधारयेत् ८९

मेध्यं सुशीतं पित्तघ्नं कषायं वस्त्रमुच्यते
तद्धारयेदुष्णकाले तत्रापि लघु शस्यते ९०

शुक्लं तु शुभदं वस्त्रं शीतातपनिवारणम्
न चोष्णं न च वा शीतं तत्तुवर्षासु धारयेत् ९१
यशस्यं काम्यमायुष्यं श्रीमदानन्दवर्धनम्
त्वच्यं वशीकरं रुच्यं नवनिर्मलमम्बरम् ९२

कदाऽपि न जनैः सद्भिर्धार्यं मलिनमम्बरम्
तत्तु कण्डूकृमिकरं ग्लान्यलक्ष्मीकरं परम् ९३

कुङ्कुमं चन्दनं चापि कृष्णागुरु च मिश्रितम्
उष्णं वातकफध्वंसि शीतकाले तदिष्यते ९४

चन्दनं घनसारेण बालकेन च मिश्रितम्
सुगन्धि परमं शीतमुष्णकाले प्रशस्यते ९५

चन्दनं घुसृणोपेतं मृगनाभिसमायुतम्
न चोष्णं न च वा शीतं वर्षाकाले तदिष्यते ९६

अनुलेपस्तृषामूर्च्छादुर्गन्धस्वेददाहजित्
सौभाग्यतेजस्त्वग्वर्णप्रीत्यौजोबलवर्धनः
स स्नानानर्हलोकानाममुलेपोऽपि नो हितः ९७

सुगन्धिपुष्पपत्राणां धारणं कान्तिकारकम्
पापरक्षोग्रहहरं कामदं श्रीविवर्द्धनम् ९८

भूषणैर्भूषयेदङ्गं यथायोग्यं विधानतः

शुचिसौभाग्यसन्तोषदायकं काञ्चनं स्मृतम् ९९

ग्रहदृष्टिहरं पुष्टिकरं दुःस्वप्ननाशनम्
पापदौर्भाग्यशमनं रत्नाभरणधारणम् १००

माणिक्यं तरणेः सुजातममलं मुक्ताफलं शीतगो
र्महेयस्य च विद्रुमो निगदितः सौम्यस्य गारुत्मतम्
देवेज्यस्य च पुष्परागमसुराचार्यस्य वज्रं शने
र्नीलं निर्मलमन्ययोश्च गदिते गोमेदवैदूर्यके १०१

वासःशृङ्गाररत्नानां धारणं प्रीतिबर्धकम्
रक्षोघ्नमर्थ्यमोजस्यं सौभाग्यकरमुत्तमम् १०२

सततं सिद्धमन्त्रस्य महौषध्यास्तथैव च
रोचनासर्षपादीनां मङ्गल्यानां च धारणम् १०३

आयुर्लक्ष्मीकरं रक्षोहरं मङ्गलदं शुभम्
हिंस्रादिभयविध्वंसि वशीकरणकारणम् १०४

ततो भोजनवेलायां कुर्यान्मङ्गल्यदर्शनम्
तस्य प्रदर्शनं नित्यमायुर्धर्मविवर्धनम् १०५

लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः
पुष्पस्रक्सर्पिरादित्य आपो राजा तथाऽष्टमः १०६

पादुकाधारणं कुर्यात्पूर्वं भोजनतः परम्
पादरोगहरं वृष्यं चक्षुष्यं चायुषो हितम् १०७
शरीरे जायते नित्यं वाञ्छा नृणां चतुर्विधः
बुभुक्षा च पिपासा च सुषुप्सा च रतिस्पृहा १०८

भोजनेच्छाविघातात्स्यादङ्गमर्दोऽरुचिः श्रमः

तन्द्रा लोचनदौर्बल्य धातुदाहो बलक्षयः १०९

विघातेन पिपासायाः शोषः कण्ठास्ययोर्भवेत्
श्रवणस्यावरोधश्च रक्तशोषो हृदि व्यथा ११०

निद्राविघाततो जृम्भा शिरोलोचनगौरवम्
अङ्गमर्दस्तथा तन्द्रा स्यादन्नापाक एव च १११

बुभुक्षितो न योऽश्नाति तस्याहारेन्धनक्षयात्
मन्दीभवति कायाग्निर्यथा चाग्निर्निरिन्धनः ११२

आहारं पचति शिखी दोषानाहारवर्जितः
पचेद् दोषक्षये धातून्प्राणान्धातुक्षयेऽपि च ११३

आहारः प्रीणनः सद्यो बलकृद् देहधारणः
स्मृत्यायुःशक्तिवर्णौजःसत्त्वशोभाविवर्धनः ११४

यथोक्तगुणसम्पन्नं नरः सेवेत भोजनम्
विचार्य दोषकालादीन्कालयोरुभयोरपि ११५

सायं प्रातर्मनुष्याणामशनं श्रुतिबोधितम्
नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः ११६

याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत्
याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः ११७

क्षुत्सम्भवति पक्वेषु रसदोषमलेषु च
काले वा यदि वाऽकाले सोऽन्नकाल उदाहृतः ११८

उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः
लघुता क्षुत्पिपासा च जीर्णाहारस्य लक्षणम् ११९

आहारं तु रहः कुर्यान्निर्हारमपि सर्वदा
उभाभ्यां लङ्घ्युपेतः स्यात्प्रकाशे हीयते श्रिया १२०

आहारनिर्हारविहारयोगाः सदैव सद्भिर्विजने विधेयाः १२१

पितृमातृसुहृद्वैद्यपाककृद्धंसबर्हिणाम्
सारसस्य चकोरस्य भोजने दृष्टिरुत्तमा १२२

दीनहीनक्षुधाऽत्तानां पापपाषण्डरोगिणाम्
कुक्कुटादेः शुनो दृष्टिर्भोजने नैव शोभना १२३

दोषहृद् दृष्टिदं पथ्यं हैमं भोजनभाजनम्
रौप्यं भवति चक्षुष्यं पित्तहृत्कफवातकृत् १२४

कांस्यं बुद्धिप्रदं रुच्यं रक्तपित्तप्रसादनम्
पैत्तलं वातकृद्रूक्षमुष्णं कृमिकफप्रणुत् १२५

आयसे काचपात्रे च भोजनं सिद्धिकारकम्
शोथपाण्डुहरं बल्यं कामलाऽपहमुत्तमम् १२६

शैलेये मृण्मये पात्रे भोजनं श्रीनिवारणम्
दारूद्भवे विशेषेण रुचिदं श्लेष्मकारि च
पात्रं पत्रमयं रुच्यं दीपनं विषपापनुत् १२७

जलपात्रं तु ताम्रस्य तदभावे मृदो हितम् १२८

पवित्रं शीतलं पात्रं रचितं स्फटिकेन यत्
काचेन रचितं तद्वत्तथा वैदूर्यसम्भवम् १२९

भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम्
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम् १३०

अन्नं ब्रह्मा रसो विष्णुर्भोक्ता देवो महेश्वरः
इति सञ्चिन्त्य भुञ्जानं दृष्टिदोषो न बाधते १३१

अञ्जनागर्भसम्भूतं कुमारं ब्रह्मचारिणम्
दृष्टिदोषविनाशाय हनुमन्तं स्माराम्यहम् १३२

अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसम्
मध्येऽम्ललवणौ पश्चात्कटुतिक्तकषायकान् १३३

फलान्यादौ समश्नीयाद्दाडिमादीनि बुद्धिमान्
विना मोचफलं तद्वद्भर्जनीया च कर्कटी १३४

मृणालबिसशालूककन्देक्षुप्रभृतीनपि
पूर्वमेव हि भोज्यानि न तु भुक्त्वा कदाचन १३५

गुरु पिष्टमयं द्रव्यं तराडुलान्पृथुकानपि
न जातु भुक्तवान्खादेन्मात्रां खादेद्बुभुक्षितः १३६

घृतपूर्वं समश्नीयात्कठिनं प्राक् ततो मृदु
अन्ते पुनर्द्रवाशी तु बलाद्रोगेण मुञ्चति १३७

यद्यत्स्वादुतरं तत्तद्विदध्यादुत्तरोत्तरम्
भुक्त्वा यत्प्रार्थ्यते भूयस्तदुक्तं स्वादु भोजनम् १३८

सौमनस्यं बलं पुष्टिमुत्साहं वृद्धिमायुषः
स्वादु सञ्जनयत्यन्नमस्वादु च विपर्ययम् १३९

अत्युष्णान्नं बलं हन्ति शीतं शुष्कं च दुर्जरम्
अतिक्लिन्नं ग्लानिकरं युक्तियुक्तं हि भोजनम् १४०

अतिद्रुताशिताहारे गुणान्दोषान्न विन्दति

भोज्यं शीतमहृद्यं च स्याद्विलम्बितमश्नतः १४१

मन्दानलो नरो द्रव्यं मात्रागुरु विवर्जयेत्
स्वभावतश्च गुरु यत्तथा संस्कारतो गुरु १४२

मात्रागुरुस्तु मुद्गादिर्माषादिः प्रकृतेर्गुरुः
संस्कारगुरु पिष्टान्नं प्रोक्तमित्युपलक्षणम् १४३

आहारं षड्विधं चूष्यं पेयं लेह्यं तथैव च
भोज्यं भक्ष्यं तथा चर्व्यं गुरु विद्याद्यथोत्तरम् १४४

गुरूणामर्धसौहित्यं लघूनां तृप्तिरिष्यते
द्रवो द्रवोत्तरश्चापि न मात्रागुरुरिष्यते १४५

विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति १४६

शुष्कं निरुद्धं विष्टम्भि वह्निव्यापादकृद्भवेत् १४७

न भुक्त्वा न रदैश्छित्त्वा न निशायां न वा बहून्
न जलान्तरितानद्भिः सक्तूनद्यान्न केवलान् १४८

पुनर्दानं पृथक्पानं सामिषं पयसा निशि
सदन्तच्छेदमुष्णं च सप्त सक्तुषु वर्जयेत् १४९

सक्तूनामाशु जीर्येत मृदुत्वादवलेहिका १५०

यथाकालेऽतिमात्रं यत् तद्भवेद्विषमाशनम्
बहुस्तोकमकाले वा ज्ञेयं तद्विषमाशनम् १५१

आलस्यगौरवाटोपसादांश्च कुरुतेऽधिकम्
हीनमात्रं तनोःकार्श्यं करोति च बलक्षयम् १५२

अप्राप्तकाले भुञ्जानो ह्यसमर्थतनुर्नरः
तांस्तान् व्याधीनवाप्नोति मरणं चाधिगच्छति १५३

कालेतीतेश्नतो जन्तोर्वायुनोपहतेऽनले
कृच्छ्राद्विपच्यते भुक्तं न स्याद्भोक्तुं पुनः स्पृहा १५४

कुक्षेर्भागद्वयं भोज्यैस्तृतीये वारि पूरयेत्
वायोः सञ्चारणार्थाय चतुर्थमवशेषयेत् १५५

रसेनान्नस्य रसना प्रथमेनोपतर्पिता
न तथा स्वादमाप्नोति ततः शोध्याम्बुनान्तरा १५६

अत्यम्बुपानान्न विपच्यतेऽन्नमनम्बुपानाच्च स एव दोषः
तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि १५७

भुक्तस्यादौ जलं पीतं कार्श्यमन्दाग्निदोषकृत्
मध्येऽग्निदीपनं श्रेष्ठमन्ते स्थौल्यकफप्रदम् १५८

समस्थूलकृशा भुक्तमध्यान्तप्रथमाम्बुपाः १५९

तृषितस्तु न चाश्नीयात्क्षुधितो न पिबेज्जलम्
तृषितस्तु भवेदुल्मी क्षुधितस्तु जलोदरी १६०

अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसम्
मध्येऽम्ललवणौ पश्चात्कटुतिक्तकषायकान् १६१

दुग्धं स्वादुरसं स्निग्धमोजस्यं धातुवर्धनम्
वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलम् १६२

विदाहीन्यन्नपानानि यानि भुंङ्क्ते हि मानवः
तद्विदाहप्रशान्त्यर्थं भोजनान्ते पयः पिबेत् १६३

कुर्यात्क्षीरान्तमाहारं न दध्यन्तं कदाचन
लवणाम्लकटूष्णानि विदाहीन्यत्ति यानि तु
तद्दोषं हर्तुमाहारं मधुरेण समापयेत् १६४

बलवच्छत्रुविनाशनेन शत्रुहन्तुः क्षीणता च दृश्यते तथा च
नाशनात्प्रत्यनीकस्य स्वयं च क्षीयते यथा
वह्निसन्तप्तलोहस्य तप्ततां नाशयेज्जलम् १६५

ननु भोजनावसानसमये प्रयुक्ताः कटुतिक्तकषायरसाः कफं
शमयिष्यन्ति वातस्य वृद्धिं विधास्यन्तीति चेत्तै् तन्न
कट्वादीनां क्षीणशक्तित्वात् तथा च
यदेकं नाशयेद्दोषं तदन्यं वर्धयेत्कुतः
नाशने ह्येकदोषस्य यतस्तत्क्षीणशक्तिकम् १६६

जग्धाः सर्वेऽपि गच्छन्ति बलिनो वश्यतां रसाः
यथा प्रकुपिता दोषा वशं यान्ति बलीयसः १६७

एवं भुक्त्वा समाचामेद्भूक्षग्रहणपूर्वकम्
भोजने दन्तलग्नानि निर्हृत्याचमनं चरेत् १६८

दन्तान्तरगतं चान्नं शोधनेनाहरेच्छनैः
कुर्यादनिर्हृतं तद्धि मुखस्यानिष्टगन्धताम् १६९

दन्तलग्नमनिर्हार्यं लेपं मन्येत दन्तवत्
न तत्र बहुशः कुर्याद्यत्नं निर्हरणं प्रति १७०

आचम्य जलयुक्ताभ्यां पाणिभ्यां चक्षुषी स्पृशेत्
भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते
अचिरेणैव तद्वारि तिमिराणि व्यपोहति १७१

भुक्त्वा च संस्मरेन्नित्यमगस्त्यादीन्सुखावहान् १७२

विष्णुरात्मा तथैवान्नं परिणामश्च वै यथा
सत्येन तेन मद्भुक्तं जीर्यत्वन्नमिदं तथा १७३

अगस्तिरग्निर्वडवानलश्च भुक्तं ममान्नं जरयन्त्वशेषम्
सुखं च मे तत्परिणामसम्भवं यच्छन्त्वरोगं मम चास्तु देहम् १७४

अङ्गारकमगस्तिं च पावकं सूर्यमश्विनौ
पञ्चैतान्संस्मरेन्नित्यं भुक्तं तस्याशु जीर्यति १७५

इत्युच्चार्य स्वहस्तेन परिमार्ज्य तथोदरम्
अनायासप्रदायीनि कुर्यात्कर्माण्ययतन्द्रितः १७६

जीर्णेऽन्ने वर्धते वायुर्विदग्धे पित्तमेधते
भुक्तमात्रे कफश्चापि क्रमोऽय भोजनोपरि १७७

धूमेनापोह्य हृद्यैर्वा कषायकटुतिक्तकैः
पूगैः कर्पूरकस्तूरीलवंगसुमनः फलैः १७८

फलैः कटुकषायैर्वा मुखवैशद्यकारिभिः
ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः १७९

रतौ सुप्तोत्थिते स्नाते भुक्तेवान्ते च संगरे
सभायां विदुषां राज्ञां कुर्यात्ताम्बूलचर्वणम् १८०

ताम्बूलमुक्तं तीक्ष्णोष्णं रोचनं तुवरं सरम्
तिक्तं क्षारोषणं कामरक्तपित्तकरं लघु १८१

वश्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम्
मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम् १८२

हनुदन्तमलध्वंसि जिह्वेन्द्रियविशोधनम्

मुखप्रसेकशमनं गलामयविनाशनम् १८३

नवं तदेव मधुरं कषायानुरसं गुरु
बलासजननंप्रायः पत्रशाकगुणं स्मृतम् १८४

वङ्गदेशोद्भवं पर्णं परं कटुरसं सरम्
पाचनं पित्तजनकमुष्णं कफहरं स्मृतम् १८५

पर्णं पुराणमकटु क्षुल्लकं तनु पाण्डुरम्
विशेषाद्गुणवद्वेद्यमन्वद्धीनगुणं स्मृतम् १८६

पूगं गुरु हिमं रूक्षं कषायं कफपित्तनुत्
मोहनं दीपनं रुच्यमास्यवैरस्यनाशनम् १८७

पूगं स्यात् दृढमध्यं यत्स्विन्नं वाऽपि त्रिदोषनुत्
सरसङ्गुर्वभिष्यन्दि तद् भृशं वह्निनाशनम् १८८

खदिरं कफपित्तघ्नश्चूर्णं वातबलासनुत्
संयोगतस्त्रिदोषघ्नं सौमनस्यं करोति च १८९

मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम्
प्रभाते पूगमधिकं मध्याह्ने खदिरं तथा
निशासु चूर्णमधिकं ताम्बूलं भक्षयेत्सदा १९०

आयुरग्रे यशो मूले लक्ष्मीर्मध्ये व्यवस्थिता
तस्मादग्रं तथा मूलं मध्यं पर्णस्य वर्जयेत् १९१

पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः
पर्णमध्यं हरत्यायुः शिरा बुद्धि विनाशिनी १९२

आद्यं विषोपमं पीतं द्वितीयं भेदि दुर्जरम्

तृतीयादनुपातव्यं सुधातुल्यं रसायनम् १९३

ताम्बूलं नातिसेवेत न विरिक्तो बुभुक्षितः १९४

देहदृक्केशदन्ताग्निश्रोत्रवर्णबलक्षयः
शोषः पित्तानिलास्रं स्यादतिताम्बूलचर्वणात् १९५

ताम्बूलं न हितं दन्तदुर्बलेक्षणरोगिणाम्
विषमूर्च्छामदार्त्तानां क्षयिणां रक्तपित्तिनाम् १९६

भुक्त्वा शतपदं गच्छेच्छनैस्तेन तु जायते
अन्नसंघातशैथिल्यं ग्रीवाजानुकटीषु च १९७

भुक्त्वोपविशतस्तन्द्रा शयानस्य तु पुष्टता
आयुश्चंकममाणस्य मृत्युर्धावति धावतः १९८

श्वासानष्टौ समुत्तानस्तान् द्विःपार्श्वे तु दक्षिणे
ततस्तद्द्विगुणान्वामे पश्चात्स्वप्याद्यथासुखम् १९९

वामदिशायामनलो नाभेरूर्ध्वेऽस्ति जन्तूनाम्
तस्मात्तु वामपार्श्वे शयीत भुक्तप्रपाकार्थम् २००

त्रिदोषशमनी षट्वा तूली वातकफापहा
भूशय्या वृंहणी वृष्या काष्ठपट्टी तु वातला २०१

भूशय्या वातलाऽतीवरूक्षा पित्तास्रनाशिनी
सुशय्याशयनं हृद्यं पुष्टिनिद्राधृतिप्रदम्
श्रमानिलहरं वृष्यं विपरीतमतोऽन्यथा २०२

संवाहनं मांसरक्तत्वक्प्रसादकरं परम्
प्रीतिनिद्राकरं वृष्यं कफवातश्रमापहम् २०३

प्रवातं रौक्ष्यवैवर्ण्यस्तम्भकृद्दाहपित्तनुत्
स्वेदमूर्च्छापिपासाघ्नमप्रवातमतोऽन्यथा २०४

सुखं प्रवातं सेवेत ग्रीष्मे शरदि चान्तरा
निर्वातमायुषे सेव्यमारोग्याय च सर्वदा २०५

पूर्वाऽनिलो गुरुः सोष्णः स्निग्धः पित्तास्रदूषकः
विदाही वातलः श्रान्तिकफशोषवतां हितः २०६

स्वादुः पटुरभिष्यन्दी त्वग्दोषार्शोविषकृमीन्
सन्निपातं ज्वरं श्वासमामवातं च कोपयेत् २०७

दक्षिणः पवनः स्वादुः पित्तरक्तहरो लघुः
वीर्येण शीतलो बल्यश्चक्षुष्यो न तु वातलः २०८

पश्चिमः पवनस्तीक्ष्णः शोषणो बलहृल्लघुः
मेदः पित्तकफध्वंसी प्रभञ्जनविवर्धनः २०९

उत्तरो मारुतः शीतः स्निग्धो दोषप्रकोपकृत्
क्लेदनः प्रकृतिस्थानां बलदो मधुरो मृदुः २१०

आग्नेयो दाहकृद्रूक्षो नैर्ऋतो न विदाहकृत्
वायव्यस्तु भवेत्तिक्त एशानः कटुकः स्मृतः २११

विष्वग्वायुरनायुष्यः प्राणिनां बहुरोगकृत्
अतस्तं नैव सेवेत सेवितः स्यान्न शर्मणे २१२

व्यजनस्यानिलो दाहस्वेदमूर्च्छाश्रमापहः
तालवृन्तभवो वातस्त्रिदोषशमको मतः २१३

वंशव्यजनजस्तूष्णो रक्तपित्तप्रकोपणः

चामरो वस्त्रसम्भूतो मायूरो वेत्रजस्तथा २१४

पूते दोषजिता वाताः स्निग्धाः हृद्याः सुपूजिताः २१५

दिवा स्वापं न कुर्वीत यतोसौ स्यात्कफावहः
ग्रीष्मवर्ज्येषु कालेषु दिवास्वप्नो निषिध्यते २१६

उचितो हि दिवास्वप्नो नित्यं येषां शरीरिणाम्
वातादयः प्रकुप्यन्ति तेषामस्वपतां दिवा २१७

व्यायामप्रमदाऽध्ववाहनरतान् क्लान्तानतीसारिणः
शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीडितान्
क्षीणान् क्षीणकफाञ्छिशून्मदहतान्वृद्धान् रसाजीर्णिनो
रात्रौ जागरितान्नरान्निरशनान्कामं दिवा स्वापयेत् २१८

दिवा वा यदि वा रात्रौ निद्रा सात्मीकृता तु यैः
न तेषां स्वपतां दोषो जाग्रतां चोपजायते २१९

भोजनानन्तरं निद्रा वातं हरति पित्तहृत्
कफं करोति वपुषः पुष्टिं सौख्यं तनोति हि २२०

शयनं पित्तनाशाय वातनाशाय मर्दनम्
वमनं कफनाशाय ज्वरनाशाय लङ्घनम् २२१

आसीनं घूर्णितं यत्तु नाभिष्यन्दि न रूक्षणम् २२२

शब्दान् स्पर्शांश्च रूपाणि रसान्गन्धान्मनःप्रियान्
भुक्तवानपि सेवेत तेनान्नं साधु तिष्ठति २२३

शब्दः स्पर्शस्तथा रूपं रसो गन्धो जुगुप्सितः
भुक्तमप्रयतं चान्नमतिहास्यं च वामयेत् २२४

शयनं चाशनं चाति न भजेन्न द्रवाधिकम्
नाग्न्यातपौ न प्लवनं न यानं नापि वाहनम् २२५

व्यायामं च व्यवायं च धावनं यानमेव च
युंद्धं गीतं च पाठं च मुहूर्त्तं भुक्तवांस्त्यजेत् २२६

अत्यम्बुपानाद्विषमाशनाच्च सन्धारणात् स्वप्नविपर्ययाच्च
कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य २२७

ईर्ष्याभय क्रोधसमन्वितेन लुब्धेन रुग्दैन्यनिपीडितेन
विद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक्परिपाकमेति २२८

अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते २२९

प्राग्भुक्ते चानले मन्दे द्विरह्नि न समाहरेत् २३०

पूर्व भुक्ते विदग्धेऽन्ने भुञ्जानो हन्ति पावकम् २३१

सायमाशे त्वजीर्णे तु प्रातर्भुक्तं विषोपमम् २३२

भवेद्यदि प्रातरजीर्णशङ्का तदाऽभयां नागरसैन्धवाभ्याम्
विचूर्णितां शीतजलेन भुक्त्वा भुञ्जीत चान्नं मितमन्नकाले २३३

आयुःक्षयभयाद्विद्वान्नाह्नि सेवेत कामिनीम्
अवशो यदि सेवेत तदा ग्रीष्मवसन्तयोः २३४

आस्या वर्णकफस्थौल्यसौकुमार्यसुखप्रदा
अध्वा वर्णकफस्थौल्यसौकुमार्यविनाशनः २३५

यत्तु चंक्रमणं नातिदेहपीडाकरं भवेत्
तदायुर्बलमेधाऽग्निप्रदमिन्द्रियबोधनम् २३६

उष्णीषं कान्तिकृत्केश्यं रजोवातकफापहम्
लघु यच्छस्यते तस्माद् गुरु पित्ताद्विरोगकृत् २३७

उपानद्धारणं नेत्र्यमायुष्यं पादरोगहृत्
सुखप्रचारमोजस्यं वृष्यं च परिकीर्तितम् २३८

पादाभ्यामनुपानद्भ्यां सदा चंक्रमणं नृणाम्
अनारोग्यमनायुष्यमिन्द्रियघ्नमदृष्टिदम् २३९

छत्रस्य धारणं वर्षातपवातरजोऽपहम्
हिमघ्नं हितमद्दणोश्च मङ्गल्यमपि कीर्त्तितम् २४०

सत्त्वोत्साहवलस्थैर्यधैर्यतेजोविवर्धनम्
अवष्टम्भकरं चापि भयघ्नं दण्डधारणम् २४१

ऊर्ध्वाच्छादनसंयुक्ता शिबिका सर्ववल्लभा
तस्यामारोहणं नृणां त्रिदोषशमकं मतम् २४२

वातश्लेष्मगदार्त्तानामहिता भ्रमकृत्तरिः
पित्तानिलकरो हस्ती लद्दम्यायुःपुष्टिवर्द्धनः २४३

घोटकारोहणं वातपित्ताग्निश्रमकृन्मतम्
मेदोवर्णकफघ्नं च हितं तद्बलिनां परम् २४४

आतपः स्वेदमूर्च्छाऽस्रपित्ततृष्णाक्लमश्रमान्
दाहं विवर्णतां कुर्यादेतांश्छाया व्यपोहति २४५

वृष्टिर्वृष्या हिमा बल्या निद्राऽलस्यविधायिनी
भयावहा मोहकरी कुहेलि कफवातला २४६

अग्निर्वातकफस्तम्भशीतवेपथुनाशनः

आमाभिष्यन्दशमनो रक्तपित्तप्रकोपणः २४७

सद्यः श्लेष्मकरो धूमो नेत्रयोरहितो भृशम्
शिरोगौरवकृच्चापि वातपित्तं च कोपयेत् २४८

मैत्री सद्भिः समं कुर्यात्स्नेहं सत्सु तु सर्वथा
संसर्गं साधुभिः कुर्यादसत्सङ्गं परित्यजेत् २४९

सेवेत देवभूदेववृद्धवैद्यनृपातिथीन्
विमुखान्नार्थिनः कुर्यान्नावमन्येत कानपि २५०

गुरूणां सन्निधौ तिष्ठेत्सदैव विनयान्वितः
पादप्रसारणादीनि तत्र नैव समाचरेत् २५१

अपकारपरेऽपि स्यादुपकारपरः पुमान्
आत्मवत्सकलान्पश्येद्वैरिणो दूरतो वसेत् २५२

न कश्चिदात्मनः शत्रुं नात्मानं कस्यचिद्रिपुम्
प्रकाशयेन्नापमानं न च निःस्नेहतां प्रभोः २५३

नात्मानमुदके पश्येन्न नग्नः प्रविशेज्जलम्
तथा नाज्ञातगाम्भीर्यं न हिंस्रप्राणिसेवितम् २५४

काले हितं मितं सत्यं संवादि मधुरं वदेत्
भुञ्जीत मधुरप्रायं स्निग्धं काले हितं मितम् २५५

न रात्रौ दधि भुञ्जीत न च निर्लवणं तथा
नामुद्गसूपं नाक्षौद्रं न चाप्यघृतशर्करम् २५६

जनस्याशयमालक्ष्य यो यथा परितुष्यति
तं तथैवानुवर्तेत पराराधनपण्डितः २५७

नैकः सुखी न सर्वत्र विश्वस्तो न च शङ्कितः
नोद्यमेविरमेत्क्वापि हेतावीर्ष्येत्फले न तु २५८

वेगान्न धारयेज्जातु मनोवेगान्विधारयेत्
न पीडयेदिन्द्रियाणि न चैतान्यतिलालयेत् २५९

वर्षाऽतपादिषु च्छत्री दण्डी रात्रौ भयेषु च
सोपानत्कस्तनुं रक्षेद्विचरेद्युगमात्रदृक् २६०

नदीं तरेन्न बाहुभ्यां नाग्निस्कन्धमभिव्रजेत्
सन्दिग्धनावं वृक्षं च नारोहेद्दुष्टयानकम् २६१

नासंवृतमुखः कुर्यात्सभायां च विचक्षणः
कासं हासं तथोद्गारं जृम्भणं क्षवथुं तथा २६२

नासिकां न विकुष्णीयान्नासीतोत्कटकः क्वचित्
नोर्ध्वजानुश्चिरं तिष्ठेन्न नखेन लिखेद्भुवम् २६३

सम्मार्जनीरजो नैव देहे दद्यात्कदाचन
न नखेन तृणं छिन्द्यान्नोच्छिष्टो ब्राह्मणं स्पृशेत् २६४

नोपरक्तं न चोद्यन्तं नास्तं यातं दिवाकरम्
सर्वथा न समीक्षेत न जले प्रतिबिम्बितम् २६५

नेक्षेत सततं सूक्ष्मं दीप्तामेध्याप्रियाणि च
पौरन्दरं धनुर्नैव दर्शयेत्कमपि क्वचित् २६६

नेच्छेद्बलवता युद्धं न भारं शिरसा वहेत्
गात्रं न वादयेत्केशान्हस्तेन धुनुयान्न च २६७

न गच्छेत्पूज्ययोर्मध्ये दम्पत्योरन्तरेण च

रिपोरन्नं न भुञ्जीत गणिकाऽन्नमपि क्वचित् २६८

प्रतिभूर्न भवेत्क्वापि न च साक्षी वृथा भवेत् २६९

स्थागं न धारयेज्जातु द्यूतं दूरात्परित्यजेत् २७०

विश्वासं नाचरेत्स्त्रीणां ताः स्वतंत्रा न चारयेत्
रक्षणीयाः सदा यत्नाद्यौवने तु विशेषतः २७१

न भिन्ने शयने स्वप्यान्नानेकविवरेऽपि च
नैको देवालये नैव रात्रौ तरुतलेऽपि च २७२

एवं दिनानि गमयेत्सदाचारपरः सदा
ततो रात्रिप्रयुक्तानि कुर्यात्कर्माणि मानवः २७३

इत्याचारं समासेन भाषितं यः समाचरेत्
स विंदत्यायुरारोग्यं प्रीतिं धर्मं धनं यशः २७४

एतानि पञ्च कर्माणि सन्ध्यायां वर्जयेद् बुधः
आहारं मैथुनं निद्रां संपाठं गतिमध्वनि २७५

भोजनाज्जायते व्याधिर्मैथुनाद्गर्भवैकृतिः
निद्रया निःस्वता पाठादायुर्हानिर्गतेर्भयम् २७६

ज्योत्स्ना शीता स्मरानन्दप्रदा तृट्पित्तदाहहृत्
ततो हीनगुणः कुर्यादवश्यायोऽनिलं कफम् २७७

तमो भयावहं मोहदिङ्मोहजनकं भवेत्
पित्तहृत्कफहृत्कामवर्धनं क्लमकृच्च तत् २७८

रात्रौ च भोजनं कुर्यात्प्रथमप्रहरान्तरे
किञ्चिदूनं समश्नीयाद् दुर्जरं तत्र वर्जयेत् २७९

शरीरे जायते नित्यं देहिनः सुरतस्पृहा
अव्यवायान्मेहमेदोवृद्धिः शिथिलता तनोः २८०

बालेति गीयते नारी यावद्वर्षाणि षोडश
ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि २८१

तदूर्ध्वमधिरुढा स्यात्पञ्चाशद्वत्सरावधि
वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्जिता २८२

निदाघशरदोर्वाला हिता विषयिणां मता
तरुणी शीतसमये प्रौढा वर्षावसन्तयोः २८३

नित्यं बाला सेव्यमाना नित्यं वर्धयते वलम्
तरुणी ह्रासयेच्छक्तिं प्रौढोद्भावयते जराम् २८४

सद्यो मांसं नवं चान्नं वाला स्त्री क्षीरभोजनम्
घृतमुष्णोदके स्नानं सद्यः प्राणकराणिषट् २८५

पूतिमांसं स्त्रियो वृद्धा बालाऽकस्तरुणं दधि
प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् २८६

वृद्धोऽपि तरुणीं गत्वा तरुणत्वमवाप्नुयात्
वयोधिकां स्त्रियं गत्वा तरुणः स्थविरायते २८७

आयुष्मन्तो मन्दजरा वपुर्वर्णबलान्विताः
स्थिरोपचितमांसाश्च भवन्ति स्त्रीषु संयताः २८८

सेवेत कामतः कामं बलाद्वाजीकृतो हिमे
प्रकामं तु निषेवेत मैथुनं शिशिरागमे २८९

त्र्यहाद्वसन्तशरदोः पक्षाद् वृष्टिनिदाघयोः २९०

त्रिभिस्त्रिभिरहोभिर्हि समेयात्प्रमदां नरः
सर्वेष्वृतुषु घर्मे तु पक्षात्पक्षाद् व्रजेद् बुधः २९१

शीते रात्रौ दिवा ग्रीष्मे वसन्ते तु दिवा निशि
वर्षासु वारिदध्वाने शरत्सु सरसः स्मरः २९२

उपेयात्पुरुषो नारीं संध्ययोर्न च पर्वसु
गोसर्गे चार्द्धरात्रे च तथा मध्यदिनेऽपि च २९३

विहारं भार्यया कुर्याद् देशेऽतिशयसंवृते
रम्ये श्राव्याङ्गनागाने सुगन्धे सुखमारुते २९४

देशे गुरुजनासन्ने विवृतेऽतित्रपाकरे
श्रूयमाणे व्यथाहेतुवचने न रमेत ना २९५

स्नातचन्दनलिप्ताङ्गः सुगन्धः सुमनोऽन्वितः
भुक्तवृष्यः सुवसनः सुवेषः समलंकृतः २९६

ताम्बूलवदनः पत्न्यामनुरक्तोऽधिकस्मरः
पुत्रार्थी पुरुषो नारीमुपेयाच्छयने शुभे २९७

अत्याशितोऽधृतिः क्षुद्वान्सव्यथाङ्गः पिपासितः
बालो वृद्धोऽन्यवेगार्त्तस्त्यजेद्रोगी च मैथुनम् २९८

भार्यां रूपगुणोपेतां तुल्यशीलां कुलोद्भवाम्
अतिकामोऽभिकामां तु हृष्टो हृष्टामलंकृताम्
सेवेत प्रमदां युक्त्या वाजीकरणवृंहितः २९९

रजस्वलामकामां च मलिनामप्रियां तथा ३००

वर्णबृद्धां वयोवृद्धां तथा व्याधिप्रपीडिताम्

हीनाङ्गीं गर्भिणीं द्वेष्यां योनिरोगसमन्विताम् ३०१

सगोत्रां गुरुपत्नीं च तथा प्रव्रजितामपि
नाधिगच्छेत् पुमान्नारीं भूरिवैगुण्यशङ्कया ३०२

रजस्वलां गतवतो नरस्यासंयतात्मनः
दृष्ट्यायुस्तेजसां हानिरधर्मश्च ततो भवेत् ३०३

लिगिनीं गुरुपत्नीं च सगोत्रामथ पर्वसु
वृद्धां च सन्ध्ययोश्चापि गच्छतो जीवनक्षयः ३०४

गर्भिण्यां गर्भपीडा स्याद्व्याधितायां बलक्षयः ३०५

हीनाङ्गीं मलिनां द्वेष्यां क्षामां वन्ध्यामसंवृते
देशेऽभिगच्छतो रेतः क्षीणं म्लानं मनो भवेत् ३०६

क्षुधितः क्षुब्धचित्तश्च मध्याह्ने तृषितोऽबलः
स्थितस्य हानिं शुक्रस्य वायोः कोपं च विन्दति ३०७

व्याधितस्य रुजा प्लीहा मूर्च्छा मृत्युश्च जायते
प्रत्यूषे चार्धरात्रे च वातपित्ते प्रक्ष्यतः ३०८

तिर्यग्योनावयोनौ वा दुष्टयोनौ तथैव च
उपदंशस्तथा वायोः कोपः शुक्रसुखक्षयः ३०९

उच्चारिते मूत्रिते च रेतसश्च विधारणे
उत्ताने च भवेच्छीघ्रं शुक्राश्मर्यास्तु सम्भवः ३१०

सर्वमेतत्त्यजेत्तस्माद्यतो लोकद्वयाहितम्
शुक्रं तूपस्थितं मोहान्न सन्धार्यं कदा चन ३११

स्नानं सशर्करं क्षीरं भक्ष्यमैक्षवसंस्कृतम्

वातो मांसरसः स्वप्नः सुरतान्ते हिता अमी ३१२

शूलकासज्वरश्वासकार्श्यपाण्ड्वामयक्षयाः
अतिव्यवायाज्जायन्ते रोगाश्चाक्षेपकादयः ३१३

रोत्रौ जागरणं रूक्षं कफदोषविषार्तिजित्
निद्रा तु सेविताकाले धातुसाम्यमतन्द्रिताम् ३१४

पुष्टिं वर्णं बलोत्साहं वह्निदीप्तिं करोति हि ३१५

यो लेढि शयनसमये मधुमिश्रं बीजपूरदलचूर्णम्
स तु लज्जाकरवातप्रसरनिरोधात्सुखं स्वपिति ३१६

सवितुः समुदयकाले प्रसृतीः सलिलस्य यः पिबेदष्टौ
रोगजरापरिमुक्तो जीवेद्वत्सरशतं साग्रम् ३१७

अर्शःशोथग्रहणयो ज्वरजठरजराकुष्ठमेदोविकाराः
मूत्राघातास्रपित्तश्रवणगलशिरःश्रोणिशूलाक्षिरोगाः
ये चान्ये वातपित्तक्षतजकफकृता व्याधयः सन्ति जन्तो
स्तांस्तानभ्यासयोगादपहरति पयः पीतमन्ते निशायाः ३१८

विगतघननिशीथे प्रातरुत्थाय नित्यं पिबति खलु नरो यो घ्राणरन्ध्रेण वारि
स भवति मतिपूर्णश्चक्षुषा तार्क्ष्यतुल्यो वलिपलितविहीनः सर्वरोगैर्विमुक्तः
३१९

पातव्यं नासया नीरं प्रसृतित्रयमात्रया ३२०

व्यङ्गवलीपलितघ्नंपीनसवैस्वर्यकासशोथहरम्
रजनीक्षयेऽम्बुनस्यं रसायनं दृष्टिसञ्जननम् ३२१

स्नेहे पीते क्षते शुद्धावाध्माने स्तिमितोदरे

हिक्कायां कफवातोत्थे व्याधौ तद्वारि वारयेत् ३२२

क्षयकोपशमा यस्मिन्दोषाणां सम्भवन्ति हि
ऋतुषट्कं तदाख्यातं रवेः राशिषु संक्रमात् ३२३

ग्रीष्मो मेषबृषौ प्रोक्तः प्रावृश्मिथुनकर्कटौ
सिंहकन्ये स्मृता वर्षा तुलावृश्चिकयोः शरत् ३२४

धनुर्ग्राहौ च हेमन्तो वसन्तः कुम्भमीनयोः ३२५

शिशिरः पुष्पसमयो ग्रीष्मो वर्षा शरद्भिमाः
माघादिमासयुग्मं स्युर्ऋतवः षट् क्रमादमी ३२६

गङ्गाया दक्षिणे देशे वृष्टेर्बहुलभावतः
उभौ मुनिभिराख्यातौ प्रावृड्वर्षाभिधावृतू ३२७

तिस्याएवोत्तरेदेशे हिमप्रचुरभावतः
एतावुभौ समाख्यातौ हेमन्तशिशिरावृतू ३२८

उत्तरायणमाद्यैस्तैः परैः स्याद्दक्षिणायनम्
आद्यमुष्णं बलहरं ततोऽन्यद्बलदं हिमम् ३२९

हेमन्तं शीतलः स्निग्धः स्वादुर्जठरवह्निकृत्
शिशिरः शीतलोऽतीव रूक्षो वाताग्निवर्धनः ३३०

वसन्तो मधुरः स्निग्धः श्लेष्मवृद्धिकरश्च सः
ग्रीष्मो रूक्षोऽतिकटुकः पित्तकृत्कफनाशनः ३३१

वर्षाः शीता विदाहिन्यो वह्निमान्द्यानिलप्रदाः
शरदुष्णा पित्तकर्त्री नृणां मध्यबलावहा ३३२

चयप्रकोपोपशमा वायोर्ग्रीष्मादिषु त्रिषु

वर्षाऽदिषु च पित्तस्य श्लेष्मणः शिशिरादिषु ३३३

चीयते लघुरूक्षाभिरोषधीभिः समीरणः
तद्विधस्तद्विधे देहे कालस्यौष्ण्यान्न कुप्यति ३३४

अब्भिरम्लविपाकाभिरोषधीभिश्च तादृशम्
पित्तं याति चयं कोपं न तु कालस्य शैत्यतः ३३५

चीयते स्निग्धशीताभिरुदकौषधिभिः कफः
तुल्ये च काले देहे च स्कन्नत्वान्न प्रकुप्यति ३३६

हिमे याति शमं पित्तं वायुः श्लेष्मा च चीयते
स वायुः शिशिरे कोपं यात्येवोपचितः कफः ३३७

हेमन्ते सञ्चितः श्लेष्मा शिशिरे त्वतिचीयते
शीतस्निग्धगुरुद्रव्यैः शैत्यस्कन्नो न कुप्यति ३३८

इति कालस्वभावोऽयमाहारादिवशात्पुनः
चयादीन् यान्ति सद्योऽपि दोषाः काले विशेषतः ३३९

चयकोपमशमान्दोषा विहाराहारसेवनैः
समानैर्यान्त्यकालेऽपि विपरीतैर्विपर्ययम् ३४०

स्वस्थानस्थस्य दोषस्य वृद्धिः स्यात्स्तब्धकोषता
पीतावभासता वह्निमन्दता चाङ्गगौरवम् ३४१

आलस्यं चयहेतौ तु द्वेषश्च चयलक्षणम्
सञ्चये ऽपहृता दोषा लभन्ते नोत्तरां गतिम् ३४२

ते तूत्तरासु गतिषु भवन्ति बलवत्तराः ३४३

वर्षासुप्रबलो वायुस्तस्मान्मिष्टादयस्त्रयः

रसाः सेव्या विशेषेण पवनस्योपशान्तये ३४४

भवेद्वर्षासु वपुषः क्लिन्नत्वं यद्विशेषतः
तत्क्लेदशान्तये सेव्या अपि कट्वादयस्त्रयः ३४५

स्वेदनं मर्दनं सेव्यं दध्युष्णंजाङ्गलामिषम्
शालयो यवगोधूमा जलं कौपं जलं च्युतम् ३४६

न भजेत्पूर्वपवनं वृष्टिं घर्मं हिमं श्रमम्
नदीतीरं दिवास्वप्नं रूक्षं नित्यं च मैथुनम् ३४७

सर्पिः स्वादुकषायतिक्तकरसा यच्छीतलं यल्लघु
क्षीरं स्वच्छसितैक्षवः पटुरसः स्वल्पं पलं जाङ्गलम्
गोधूमा यवमुद्गशालिसहिता नादेयमंशूदकं
चन्द्रश्चन्दनमिन्दुरादिरजनी माल्यं पटो निर्मलः ३४८

दिविसेऽककरैर्जुष्टं निशि शीतकरांशुभिः
ज्ञेयमंशूदकं नाम स्निग्धं दोषत्रयापहम्
विश्रामः सुहृदां गणेषु मधुरा वाचः सरः क्रीडनं
पित्तानां च विरेचनं बलवतो युक्तं शिरामोक्षणम्
एतान्यत्र घनावसानसमयेपथ्यानि मुञ्जेद्दधिव्यायामाम्लकटूष्णतीक्ष्ण
दिवसस्वप्नं हिमञ्चातपम् ३४९

इक्षवः शालयो मुद्गाः सरोऽम्भ क्वथितं पयः
शरद्येतानि पथ्यानि प्रदोषे चेन्दुरश्मयः ३५०

प्रातर्भोजनमम्लमिष्टलवणानभ्यङ्गघर्मश्रमान्
गोधूमैक्षवशालिमाषपिशितं पिष्टं नवान्नं तिलान्
कस्तूरीं वरकुङ्कुमागुरुयुतामुष्णाम्बुशौचं तथौ स्निग्धं स्त्रीषु सुखं
गुरूष्णवसनं सेवेत हेमन्तके ३५१

शिशिरे शीतमधिकं रौक्ष्यं चादानकालजम्
विशेषतस्ततस्तत्र हेमन्तस्य मतो विधिः ३५२

वान्तिं नस्यमथाभयां च मधुना व्यायाममुद्वर्त्तनं
संसेवेत मधौ कफघ्नकवलं शूल्यं पलं जाङ्गलम्
गोधूमान्बहुशालिभेदसहितान्मुद्गान्यवान्षष्टिकां
ल्लेपञ्चन्दनकुङ्कुमागुरुकृतं रूक्षं कटूष्णं लघु ३५३

मिष्टमम्लं दधिस्निग्धं दिवास्वप्नं च दुर्जरम्
अवश्यायमपि प्राज्ञो वसन्ते परिवर्जयेत् ३५४

स्वादुस्निग्धहिमं लघु द्रवमयं द्रव्यं रसालां सितां-
सक्तुंक्षीरमजाङ्गलानि सितया शालि रसं मांसजम्
शीतांशुं शयनं दिवा मलयजं शीतं पयः पानकं
सेवेतोष्णदिने त्यजेत्तु कटुकक्षाराम्लघर्मश्रमान् ३५५

ऋतुष्वेषु य एतैस्तु विधिभिर्वर्त्तते नरः
दोषानृतुकृतान्नैव लभते स कदाचन ३५६

इति श्रीलटकन तनय श्रीमन्मिश्रभाव विरचिते भावप्रकाशे
दिनचर्यादिप्रकरणं पञ्चमम् ५

अथ षष्ठं मिश्रप्रकरणम् ६

रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता
रोगा दुःखस्य दातारो ज्वरप्रभृतयो हि ते १

ते च स्वाभाविकाः केचित्केचिदागन्तवः स्मृताः
मानसाः केचिदाख्याताः कथिताः केऽपि कायिकाः २

कर्मजाः कथिताः केचिद्दोषजाः सन्ति चापरे
कर्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः स्मृताः ३

कर्मक्षयात्कर्मकृता दोषजाः स्वस्वभेषजैः
कर्मदोषोद्भवा यान्ति कर्मदोषक्षयात् क्षयम् ४

साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः स्मृताः
सुखसाध्यः कष्टसाध्यो द्विविधः साध्य उच्यते ५

यापनीयं तु तं विद्यात्क्रिया धारयते हि यम्
क्रियायां तु निवृत्तायां सद्यो यश्च विनश्यति ६

प्राप्ता क्रिया धारयति सुखिनं याप्यमातुरम्
प्रपतिष्यदिवागारं स्तम्भो यत्नेन योजितः ७

साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम् ८

रोगारम्भकदोषस्य प्रकोपादुपजायते
योऽन्यो विकारः स बुधैरुपद्रव इहोदितः ९

रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते
तल्लक्षणमरिष्टं स्याद्रिष्टं चापि तदुच्यते १०

या क्रिया व्याधिहरणी सा चिकित्सा निगद्यते
दोषधातुमलानां या साम्यकृत्सैव रोगृहृत् ११

याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः
सा चिकित्सा विकाराणां कर्म तद्भिषजां मतम् १२

या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् १३

जातमात्रश्चिकित्स्यः स्यान्नोपेक्ष्योऽल्पतया गदः

वह्निशत्रुविषैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ १४

रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्
ततः कर्म भिषक् पश्चाज्ज्ञानपूर्वं समाचरेत् १५

यस्तु रोगमविज्ञाय कर्माण्यारभते भिषक्
अप्यौषधविधानज्ञस्तस्य सिद्धिर्यदृच्छया १६

भेषजं केवलं कर्तुं यो जानाति न चामयम्
वैद्यकर्म स चेत्कुर्याद्वधमर्हति राजतः १७

यस्तु केवलरोगज्ञो भेषजेष्वविचक्षणः
तं वैद्यं प्राप्य रोगी स्याद्यथा नौर्नाविकं विना १८

यस्तु केवलशास्त्रज्ञः क्रियास्वकुशलो भिषक्
स मुह्यत्यातुरं प्राप्य तथा भीरुरिवाहवम् १९

यस्तु रोगविशेषज्ञः सर्वभैषज्यकोविदः
देश कालविभागज्ञस्तस्य सिद्धिर्न संशयः २०

आदावन्ते रुजां ज्ञाने प्रयतेत चिकित्सकः
भेषजानां विधानेन ततः कुर्याच्चिकित्सतम् २१

विकारनामाकुशलो न जिह्रीयात्कदाचन
न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः २२

नास्ति रोगो विना दोषैर्यस्मात्तस्माच्चिकित्सकः
अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् २३

ये न कुर्वन्त्यसाध्यानां चिकित्सां ते भिषग्वराः
अतो वैद्यैः श्रमः कार्यः साध्यासाध्यपरीक्षणे २४

शीते शीतप्रतीकारमुष्णे तूष्णनिवारणम्
कृत्वा कुर्यात्क्रियां प्राप्तां क्रियाकालं न हापयेत् २५

अप्राप्ते वा क्रियाकाले प्राप्ते वा न क्रिया कृता
क्रियाहीनाऽतिरिक्ता च साध्येष्वपि न सिध्यति २६

विकारेऽल्पे महत्कर्म क्रिया लघ्वी गरीयसि
द्वयमेतदकौशल्यं कौशल्यं युक्तकर्मता २७

क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत्
पूर्वस्यां शान्तवेगायां न क्रियासङ्करो हितः २८

क्रियाभिस्तुल्यरूपाभिर्न क्रियासङ्करो हितः
ताभिस्तु भिन्नरूपाभिः साङ्कर्यं नैव दुष्यति २९

न चैकान्तेन निर्दिष्टे शास्त्रे निविशते बुधः
स्वयमप्यत्र भिषजा तर्कणीयं चिकित्सता ३०

उत्पद्यते च साऽवस्था दोषकालबलं प्रति
यस्यां कार्यमकार्यं स्यात्कर्म कार्यं विवर्जितम् ३१

क्वचिदर्थः क्वचिन्मैत्री क्वचिद्धर्मः क्वचिद्यशः
कर्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला ३२

आयुर्वेदोदितां युक्तिं कुर्वाणाश्च हिताय ये
पुण्यायुर्वृद्धिसंयुक्ता नीरोगाश्च भवन्ति ते ३३

नैव कुर्वीत लोभेन चिकित्सापुण्यविक्रयम्
ईश्वराणां वसुमतां लिप्सेतार्थं तु वृत्तये ३४

चिकित्सितं शरीरं यो न निष्क्रीणाति दुर्मतिः

स यत्करोति सुकृतं सर्वं तद्भिषगश्नुते ३५

न देशो मनुजैर्हीनो न मनुष्या निरामयाः
ततः सर्वत्र वैद्यानां सुसिद्धा एव वृत्तयः ३६

रोगी दूतो भिषग्दीर्घमायुर्द्रव्यं सुसेवकः
सदौषधं चिकित्साया इत्यङ्गानि बुधा जगुः ३७

रोगो यस्यास्तिरोगी स सचिकित्स्यस्तु यादृशः
यादृशश्चाचिकित्स्योऽपि वक्ष्यमाणो निशम्यताम् ३८

निजप्रकृतिवर्णाभ्यां युक्तः सत्त्वेन चक्षुषा
चिकित्स्यो भिषजां रोगी वैद्यभक्तो जितेन्द्रियः ३९

आयुष्मान्सत्त्ववान्साध्यो द्रव्यवान्मित्रवानपि
चिकित्स्यो भिषजां रोगी वैद्यवाक्यकृदास्तिकः ४०

चण्डः साहसिको भीरुः कृतघ्नो व्यग्र एव च
शोकाकुलो मुमूर्षुश्च विहीनः करणैश्चः यः ४१

वैरी वैद्यविदग्धश्च श्रद्धाहीनश्च शङ्कितः
भिषजामविधेयः स्युर्नोपक्रम्या भिषग्विधाः ४२

एतानुपाचरन् वैद्यो वहून् दोषानवाप्नुयात् ४३

यश्चिकित्सकमानेतुं याति दूतः स कथ्यते
स च यादृक् समुचितस्तादृगत्र निगद्यते ४४

दूताः सुजातयोऽव्यङ्गाः पटवो निर्मलाम्बराः
सुखिनोऽश्ववृषारूढाः शुभ्रपुष्पफलैर्युताः ४५

सजातयः सुचेष्टाश्च सजीवदिशि सङ्गताः

भिषजं समये प्राप्ता रोगिणः सुखहेतवे ४६

वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते
न शुभं सौम्यशकुनं प्रदीप्तं तु सुखावहम् ४७

तथाहि रिक्तहस्तो न पश्येत्तुराजानं भिषजं गुरुम्
दैवज्ञं देवतां मित्रं फलेन फलमादिशेत् ४८

चिकित्सां कुरुते यस्तु स चिकित्सक उच्यते
स च यादृक्समीचीनस्तादृशोऽपि निगद्यते ४९

तत्त्वाधिगतशास्त्रार्थो दृष्टकर्मा स्वयंकृती
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ५०

प्रत्युत्पन्नमतिर्धीमान् व्यवसाथी प्रियंवदः
सत्यधर्मपरो यश्च वैद्य ईदृक् प्रशस्यते ५१

कुचैलः कर्कशः स्तब्धो ग्रामीणः स्वयमागतः
पञ्च वैद्या न पूज्यन्ते धन्वन्तरिसमा यदि ५२

व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः
एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ५३
भिषगादौ परीक्षेत रुग्णस्यायुः प्रयत्नतः
तत आयुषि विस्तीर्णे चिकित्सा सफला भवेत् ५४

सौम्या दृष्टिर्भवेद्यस्य श्रोत्रं वक्त्रं तथैव च
स्वादु गन्धं विजानाति स साध्यो नात्र संशयः ५५

पाणिपादौ च यस्योष्णौ दाहः स्वल्पतरो भवेत्
जिह्वातु कोमला यस्य स रोगी न विनश्यति ५६

स्वेदहीनो ज्वरो यस्य श्वासो नासिकया चरेत्
कण्ठश्च कफहीनः स्यात्स रोगी जीवति ध्रुवम् ५७

यस्य निद्रा सुखेन स्याच्छरीरं द्युतिमद्भवेत्
इन्द्रियाणि प्रसन्नानि स रोगी नैव नश्यति ५८

शरीरशीलयोर्यस्य प्रकृतेर्विकृतिर्भवेत्
तदरिष्टं समासेन व्यासतश्च निबोध मे ५९

शृणोति विविधाञ्छब्दान्विपरीताञ्छृणोति च
यो न शृणोति चाकस्मात्तं वदन्ति गतायुषम् ६०

यस्तूष्णमिव गृह्णाति शीतमुष्णं च शीतवत्
उष्णगात्रोऽतिमात्रं यो भृशं शीतेन कम्पते ६१

प्रहारं नैव जानाति योऽङ्गच्छेदमथापि वा
पांशुनेवावकीर्णानि यश्च गात्राणि मन्यते ६२

वर्णान्यता वा राज्यो वा यस्य गात्रे भवन्ति हि
स्नातानुलिप्तं यं चापि भजन्ते नीलमाक्षिकाः ६३

विपरीतेन गृह्णाति रसान्यश्चोपयोजितान्
यो वा रसान्न संवेत्ति तं गतासुं प्रचक्षते ६४

सुगन्धं वेत्ति दुर्गन्धं दुर्गन्धं च सुगन्धवत्
गृह्णाति योऽन्यथा गन्धं शान्ते दीपे निरामयः ६५

रात्रौ सूर्यं ज्वलन्तं वा दिवा वा चन्द्रवर्चसम्
दिवा ज्योतींषि यश्चापि ज्वलितानीव पश्यति ६६

विद्युत्वतोऽसितान्मेघान् गगने निर्घने घनान्

विमानयानप्रासादैर्यश्च सङ्कुलमम्बरम् ६७

यश्चानिलं मूर्त्तिमन्तमन्तरिक्षेऽवलोकते
धूमनीहारवासोभिरावृतामिव मेदिनीम् ६८

प्रदीप्तमिव यो लोकं यो वाप्लुतमिवाम्भसा
भूमिमष्टापदाकारां लेखाभिर्यश्च पश्यति ६९

यो न पश्यति ऋक्षाणि यश्च देवीमरुन्धतीम्
ध्रुवमाकाशगङ्गां च तं वदन्ति गतायुषम् ७०

आदर्शेऽम्बुनि घर्मे वा छायां यश्च न पश्यति
पश्यत्येकाङ्गहीनां वा विकृतां वाऽन्यसत्वजाम् ७१

श्वकाककङ्कगृध्राणां प्रेतानां यक्षरक्षसाम्
आतुरो लभते मृत्युं स्वस्थो व्याधिमवाप्नुयात् ७२

ह्रीश्रियौ नश्यतो यस्य तेज ओजः स्मृतिः प्रभा
अकस्माच्च भजन्ते यं स गतासुरसंशयम् ७३

यस्याधरौष्ठः पतितः क्षिप्तश्चोर्ध्वं तथोत्तरः
उभौ वा जाम्बवाभासौ दुर्लभं तस्य जीवितम् ७४

आरक्ता दशना यस्य श्यावा वा स्युः पतन्ति वा
खञ्जनप्रतिभा वापि तं गतायुषमादिशेत् ७५

कृष्णा तथाऽनुलिप्ता च जिह्वा शून्या च यस्य वै
कर्कशा वा भवेद्यस्य सोऽचिराद्विजहात्यसून् ७६

कुटिला स्फुटिता वाऽपि शुष्का वा यस्य नासिका
अवस्फूर्जति भग्ना वा स न जीवति मानवः ७७

संक्षिप्ते विषमे स्तब्धे रूक्षे सास्रे च लोचने
स्यातां परिश्रुते यस्य स गतायुर्नरो ध्रुवम् ७८

केशा सीमन्तिनो यस्य संक्षिप्ते विनते भ्रुवौ
लुठन्ति चाक्षिपद्मानि सोऽचिराद्याति मृत्यवे ७९

नाहरत्यन्नमास्यस्थं न धारयति यः शिरः
एकाग्रदृष्टिर्मूढात्मा सद्यः प्राणान्विमुञ्चति ८०

उत्थाप्यमानो बहुशः संमोहं योऽधिगच्छति
बलवान्दुर्बलो वापि तं पक्वं भिषगादिशेत् ८१

निद्रा निरन्तरं यस्य यो जागर्त्ति च सर्वदा
मुह्येद्वा वक्तुकामश्च प्रत्याख्येयः स जानता ८२

उत्तरौष्ठं च यो लिह्यादुत्करांश्च करोतिः यः
प्रेतैर्वा भाषते सायं प्रेतरूपं तमादिशेत् ८३

खेभ्यश्च रोमकूपेभ्यो यस्य रक्तं प्रवर्तते
पुरुषस्याविषार्तस्य स सद्यो जीवितं त्यजेत् ८४

सम्यक् चिकित्स्यमानस्य विकारो योऽभिवर्धते
प्रक्षीणबलमांसस्य लक्षणं तद्गतायुषः ८५

भूताः प्रेताः पिशाचाश्च रक्षांसि विविधानि च
मरणाभिमुखं जन्तुमुपसृत्य च नित्यशः ८६

तानि भेषजवीर्याणि प्रतिघ्नन्ति जिघांसया
तस्मान्मोघाः क्रियाः सर्वा भवन्त्येव गतायुषः ८७

सर्वे द्रव्यमपेक्षन्ते रोगिप्रभृतयो यतः

विना वित्तं न भैषज्यं चिकित्साऽङ्ग ततो धनम् ८८

स्निग्धोऽजुगुप्सुर्बलवान्युक्तो व्याधितरक्षणे
वैद्यवाक्यकृदश्रान्तो युज्यते परिचारकः ८९

वैद्यो व्याधिं हरेद्येन तद्द्रव्यं प्रोक्तमौषधम्
तद्यादृशमवश्यं स्याद्रोगघ्नं तादृशं ब्रुवे ९०

प्रशस्तदेशे सञ्जातं प्रशस्तेऽहनि चोद्धृतम्
अल्पमात्रं बहुगुणं गन्धवर्णरसान्वितम् ९१

दोषघ्नमग्लानिकरमधिकं न विकारि यत्
समीक्ष्य काले दत्तं च भेषजं स्याद् गुणावहम् ९२

आग्नेया विन्ध्यशैलाद्या सौम्यो हिमगिरिः स्मृतः
अतस्तदौषधानि स्युरनुरूपाणि हेतुभिः ९३

अन्येष्वपि प्ररोहन्ति वनेषूपवनेषु च
गृह्णीयात्तानि सुमनाः शुचिः प्रातः सुवासरे ९४

आदित्यसम्मुखो मौनी नमस्कृत्य शिवं हृदि
साधारणधराद्रव्यं गृह्णीयादुत्तराश्रितम् ९५

वल्मीककुत्सितानूपश्मशानोषरमार्गजाः
जन्तुवह्निहिमव्याप्ता नौषध्यः कार्यसाधिकाः ९६

शरद्यखिलकार्यार्थं ग्राह्यंसरसमौषधम्
विरेकवमनार्थं तु वसन्तान्ते समाहरेत् ९७

अतिस्थूलजटा याः स्युस्तासां ग्राह्यास्त्वचो ध्रुवम्
गृह्णीयात्सूक्ष्ममूलानि सकलान्यपि बुद्धिमान् ९८

महान्ति येषां मूलानि काष्ठगर्भाणि सर्वतः
तेषां तु वल्कलं ग्राह्यं ह्रस्वमूलानि सर्वशः ९९

न्यग्रोधादेस्त्वचो ग्राह्या सारःस्याद्बीजकादितः
तालीसादेश्च पत्राणि फलं स्यात् त्रिफलादितः १००

क्वचिन्मूलं क्वचित्कन्दः क्वचित्पत्रं क्वचित्फलम्
क्वचित्पुष्पं क्वचित्सर्वं क्वचित्सारः क्वचित्त्वचः १०१

चित्रकं सूरणं निम्बो वासा च त्रिफला क्रमात्
धातकी करटकारी च खदिरः क्षीरपादपः १०२

क्वचिन्निम्बस्य गृह्णीयात्पत्राभावे त्वचामपि
बालं फलं तु बिल्वस्य पक्वमारग्वधस्य च १०३

अङ्गेऽनुक्ते जटा ग्राह्या भागेऽनुक्तेऽखिलं समम्
पात्रेऽनुक्ते मृदः पात्रं कालेऽनुक्ते त्वहर्मुखम् १०४

नवान्येव हि योज्यानि द्रव्याण्यखिलकर्मसु
विना विडङ्गकृष्णाभ्यां गुडधान्याज्यमाक्षिकैः १०५

पुराणन्तु प्रशस्तं स्यात्ताम्बूलं काङ्क्षिकं तथा
शुष्कं नवीनद्रव्यं तु योज्यं सकलकर्मसु १०६

आर्द्रं तु द्विगुणं युञ्ज्यादेष सर्वत्र निश्चयः
गुडूची कुटजो वासा कूष्माण्डश्च शतावरी १०७

अश्वगन्धा सहचरः शतपुष्पा प्रसारिणी
प्रयोक्तव्याः सदैवार्द्रा द्विगुणं नैव कारयेत् १०८

वासानिम्बपटोलकेतकबलाकूष्माण्डकेन्दीवरी-

वर्षाभूकुटजाश्च कन्दसहिता सा पूतिगन्धाऽमृता
एन्द्री नागबला कुरुण्टकपुरच्छत्राऽमृताः सर्वदा
सार्द्रा एव तु न क्वचिद् द्विगुणिताः कार्येषु योज्या बुधैः १०९

घृतं तैलं च पानीयं कषायं व्यञ्जनादिकम्
पक्त्वा शीतीकृतं चोष्णं तत्सर्वं स्याद्विषोपमम् ११०

सूक्ष्मास्थिमांसला पथ्या सर्वकर्मणि पूजिता
क्षिप्ताऽम्भसि निमज्जेद्याः भल्लातक्यस्तथोत्तमाः १११

वराहमूर्द्धवत्कन्दो वाराहीकन्दसंज्ञकः
सौवर्चलं तु काचाभं सैन्धवं स्फटिकप्रभम् ११२

सुवर्णच्छविकं ज्ञेयं स्वर्णमाक्षिकमुत्तमम्
औड्रपुष्पप्रतीकाशा मनोह्वा चोत्तमा मता ११३

श्रेष्ठं शिलाजतु ज्ञेयं प्रक्षिप्तं न विशीर्यते
तोयपूर्णे कांस्यपात्रे प्रतानेन विवर्धते ११४

कर्पूरस्तुवरः स्निग्धः एला सूक्ष्फला वरा
श्वेतचन्दनमत्यन्तं सुगन्धि गुरुपूजितम् ११५

रक्तचन्दनमत्यन्तं लोहितं प्रवरं मतम्
काकतुण्डनिभः स्निग्धो गुरुः श्रेष्ठो गुरुर्मतः ११६

सुगन्धि लघु रूक्षं च सुरदारु वरं मतम्
सरलं स्निग्धमत्यर्थं सुगन्धि च गुणावहम् ११७

अतिपीता प्रशस्ता तु ज्ञेया दारुनिशा बुधैः
जातीफलं गुरु स्निग्धं समं शुभ्रान्तरं वरम् ११८

मृद्वीका सोत्तमा ज्ञेया या स्याद्गोस्तनसन्निभा
करमर्दफलाकारा मध्यमा सा प्रकीर्त्तिता ११९

खण्डं तु विमलं श्रेष्ठं चन्द्रकान्तसमप्रभम्
गव्याज्यसदृशं रुच्यं गन्धं मधु वरं मतम् १२०

शालीनां लोहितः शालि षष्टिकेषु च षष्टिकः
शूकधान्येष्वपि यवो गोधूमः प्रवरो मतः १२१

शिम्बीधान्ये वरो मुद्गो मसूरश्चाढकी तथा
रसेषु मधुरः श्रेष्ठो लवणेषु च सैन्धवः १२२

दाडिमामलकं द्राक्षा खर्जूरं च परूषकम्
राजादनं मातुलुंगं फलवर्गेषु शस्यते १२३

पत्रशाकेषु वास्तूकं जीवन्ती पोतिका वरा
पटोलं फलशाकेषु कन्दशाकेषु सूरणम् १२४

एणः कुरङ्गो हरिणो जाङ्गलेषु प्रशस्यते
पक्षिणां तित्तिरिर्लावो वरो मत्स्येषु रोहितः १२५

हरिणस्ताम्रवर्णः स्यादेणः कृष्णतया मतः
कुरङ्गस्ताम्र उद्दिष्टो हरिणाकृतिको महान् १२६

जलेषु दिव्यं दुग्धेषु गव्यमाज्येषु गोभवम्
तैलेषु तिलजं तैलमैक्षवेषु सिता हिता १२७

शिम्वीषु माषान्गरीष्मर्तौ लवणेष्वौषरं त्यजेत्
फलेषु लकुचं शाके सार्षपं न हितं मतम् १२८

गोमांसं ग्राम्यमांसेषु न हितं महिषीवसा

मेषीपयः कुसुम्भस्य तैलं त्याज्यं च फाणितम् १२९

मत्स्यमानूपमांसं च दुग्धयुक्तं विवर्जयेत्
कपोतं सर्षपस्नेहभर्जितं परिवर्जयेत् १३०

मत्स्यानिक्षोर्विकारेण तथा क्षौद्रेण वर्जयेत्
सक्तून्मांसपयोयुक्तानुष्णैर्दधि विवर्जयेत् १३१

उष्णैर्नभोऽम्बुना क्षौद्रं पायसं कृसरान्वितम्
रम्भाफलं त्यजेत्तक्रदधिबिल्वफलान्वितम् १३२

दशाहमुषितं सर्पिः कांस्ये मधुघृतं समम्
कृतान्नं च कषायं च पुनरुष्णीकृतं त्यजेत् १३३

एकत्र बहुमांसानि विरुध्यन्ते परस्परम्
मधु सर्पिर्वसा तैलं पानीयं वा पयस्तथा १३४

लवणं सैन्धवं प्रोक्तंचन्दनं रक्तचन्दनम्
चूर्णलेहासवस्नेहाः साध्या धवलचन्दनैः
कषायलेपयोः प्रायो युज्यते रक्तचन्दनम् १३५

अन्तः सम्मार्जने ज्ञेया ह्यजमोदा यवानिका
बहिः सम्मार्जने सैव विज्ञातव्याऽजमोदिका १३६

पयः सर्पिः प्रयोगेषु गव्यमेव हि गृह्यते
शकृद्रसो गोमयको मूत्रं गोमूत्रमुच्यते १३७

चित्रकाभावतोदन्ती क्षारः शिखरिजोऽथवा
अभावे धन्वयासस्य प्रेक्षेप्यातु दुरालभा १३८

तगरस्याप्यभावे तु कुष्ठं दद्याद्विषग्वरः

मूर्वाऽभावे त्वचो ग्राह्या जिङ्गिनीप्रभवा बुधैः १३९

अहिंस्त्रया अभावे तु मानकन्दः प्रकीर्त्तितः
लक्ष्मणाया अभावे तु नीलकण्ठशिखा मता १४०

वकुलाभावतो देयं कह्लारोत्पलपङ्कजम्
नीलोत्पलस्याभावे तु कुमुदं देयमिष्यते १४१

जातीपुष्पं न यत्रास्ति लवंगं तत्र दीयते
अर्कपर्णादिपयसो ह्यभावे तद्रसो मतः १४२

पौष्करा भावतः कुष्ठं तथा लाङ्गल्यभावतः
स्थौणेयकस्याभावे तु मिषग्भिर्दीयते गदः १४३

चविकागजपिप्पल्यौ पिप्लीमूलवत्स्मृतौ १४४

अभावे सोमराज्यास्तु प्रपुन्नाडफलं मतम्
यदि न स्याद्दारुनिशा तदा देया निशा बुधैः १४५

रसाञ्जनस्याभावे तु दार्वीक्वाथः प्रयुज्यते
सौराष्ट्र्यभावतो देया स्फटिका तद्गुणा जनैः १४६

तालीसपत्रकाभावे स्वर्णताली प्रशस्यते
भाङ्ग्यभावे तु तालीसं करटकारीजटाऽथवा १४७

रुचकाभावतो दद्याल्लवणं पांशुपूर्वकम्
अभावे मधुयष्ट्यास्तु धातकीं च प्रयोजयेत् १४८

अम्लवेतसकाभावे चुक्रं दातव्यमिष्यते
द्राक्षा यदि न लभ्येत प्रदेयं काश्मरीफलम् १४९

तयोरभावे कुसुमं मधूकस्य मतं बुधैः

लवङ्गंकुसुमं देयं नखस्याभावतः पुनः १५०

कस्तूर्यभावे कङ्कोलं क्षेपणीयं विदुर्बुधाः
कङ्कोलस्याप्यभावे तु जातीपुष्पं प्रदीयते १५१

सुगन्धिमुस्तकं देयं कर्पूराभावतो बुधैः
कर्पूराभावतो देयं ग्रन्थिपर्णं विशेषतः १५२

कुङ्कुमाभावतो दद्यात्कुसुम्भकुसुमं नवम्
श्रीखण्डचन्दनाभावे कर्पूरं देयमिष्यते १५३

अभावे त्वेतयोर्वैद्यः प्रक्षिपेद्रक्तचन्दनम्
रक्तचन्दनकाभावे नवोशीरं विदुर्बुधाः १५४

मुस्ता चातिविषाभावे शिवाऽभावे शिवा मता
अभावे नागपुष्पस्य पद्मकेशरमिष्यते १५५

मेदाजीवककाकोलीऋद्धिद्वन्द्वेऽपि वाऽसति
दरीविदार्यश्वगन्धावाराहीश्च क्रमात् क्षिपेत् १५६

वाराह्याश्च तथाऽभावे चर्मकारालुको मतः
वाराहीकन्दसंज्ञस्तु पश्चिमे गृष्टिसंज्ञकः १५७

वारीहीकन्द एवान्यश्चर्मकारालुको मतः
अनूपसम्भवे देशे वराह इव लोमवान् १५८

भल्लातकासहत्वे तु रक्तचन्दनमिष्यते
भल्लाताभावतश्चित्रं नलश्चेद्गोरभावतः १५९

सुवर्णाभावतः स्वर्णमाक्षिकं प्रक्षिपेद् बुधः
श्वेतं तु माक्षिकं ज्ञेयं बुधै रजतवद् ध्रुवम् १६०

माद्विकस्याप्यभावे तु प्रदद्यात्स्वर्णगैरिकम्
सुवर्णमथ वा रौप्यं मृतं यत्र न लभ्यते १६१

तत्र कान्तेन कर्माणि भिषक्कुर्याद्विचक्षणः
कान्ताभावे तीक्ष्णलोहं योजयेद्वैद्यसत्तमः १६२

अभावे मौक्तिकस्यापि मुक्ताशुक्तिं प्रयोजयेत्
मधु यत्र न लभ्येत तत्र जीर्णगुडो मतः १६३

मत्स्यण्डयभावतो दद्युर्भिषजः सितशर्कराम्
असम्भवे सितायास्तु बुधैः खण्डं प्रयुज्यते १६४

क्षीराभावे रसो मौद्गो मासूरो वा प्रदीयते
अत्र प्रोक्तानि वस्तूनि यानि तेषु च तेषु च १६५

योज्यमेकतराभावे परं वैद्येन जानता
रसवीर्यविपाकाद्यैः समं द्रव्यं विचिन्त्य च १६६

युञ्ज्यात्तद्विधमन्यच्च द्रव्याणां तु रसादिवित्
योगे यदप्रधानं स्यात्तस्य प्रतिनिधिर्मतः १६७

यत्तु प्रधानं तस्यापि सदृशं नैव गृह्यते
व्याधेरयुक्तं यद्द्रव्यं गणोक्तमपि तत्त्यजेत्
अनुक्तमपि युक्तं यद्योजयेत्तद्रसादिवित् १६८

द्रव्ये रसो गुणो वीर्यं विपाकः शक्तिरेव च
पदार्थाः पञ्च तिष्ठन्ति स्वं स्वं कुर्वन्ति कर्म च १६९

रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः
षड् द्रव्यमाश्रितास्ते च यथापूर्वं बलावहाः १७०

तत्राद्या मारुतं घ्नन्ति त्रयस्तिक्तादयः कफम्
कषायतिक्तमधुराः पित्तमन्ये तु कुर्वते १७१

ये रसा वातशमना भवन्ति यदि तेषु वै
रौक्ष्यलाघवशैत्यानि न ते हन्युः समीरणम् १७२

ये रसा पित्तशमना भवन्ति यदि तेषु वै
तीक्ष्णोष्णलघुताश्चैव नैते तत्कर्मकारिणः १७३

ये रसाः श्लेष्मशमना भवन्ति यदि तेषु वै
स्नेहगौरवशैत्यानि न ते हन्युः कफं तदा १७४

मधुरो हि रसः शीतो धातुस्तन्यबलप्रदः
चक्षुष्यो वातपित्तघ्नः कुर्यात्स्थौल्यमलकृमीन् १७५

विषघ्नः पिच्छिलश्चापि स्निग्धः प्रीत्यायुषोर्हितः
बालबृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसाम् १७६

प्रशस्तो बृंहणः कण्ठ्यो गुरुः सन्धानकृन्मतः १७७

सोऽतियुक्तो ज्वरश्वासगलगण्डार्बुदकृमीन्
स्थौल्याग्निमान्द्यमेहांश्च कुर्यान्मेदःकफामयान् १७८

रसोऽम्ल पाचनो रुच्यः पित्तश्लेष्मास्रदो लघुः
लेखितोष्णो बहिः शीतः क्लेदनः पवनापहः १७९

स्निग्धस्तीक्ष्णः सरः शुक्रविबन्धानाहदृष्टिहा
हर्षणो रोमदन्तानामक्षिभ्रूविनिकोचनः १८०

सोऽतियुक्तो भ्रमं कुर्यात्तृड्दाहतिमिरज्वरान्
कण्डूपाण्डुत्ववीसर्पशोथविस्फोटकुष्ठकृत् १८१

लवणः शोधनो रुच्यः पाचनः कफपित्तदः
पुंस्त्ववातहरः कायशैथिल्यमृदुताकरः
बलघ्न आस्यजलदः कपोलगलदाहकृत् १८२

सोऽति युक्तो ऽद्विपाकास्त्रपित्त कोठक्षतादिकृत्
वलीपलितखालित्यकुष्ठवीसर्पतृट्प्रदः १८३

कटुरुष्णश्च तीक्ष्णश्च विशदो वातपित्तकृत्
श्लेष्महृल्लघुराग्नेयः कृमिकण्डूविषापहः १८४

शुक्रस्तन्यहरश्चापि मेदःस्थौल्यापकर्षणः
अश्रुदो नासिकाऽस्याद्विजिह्वाऽग्रोद्वेजको मतः १८५

दीपनः पाचनो रुच्यो नासिकाशोषणो भृशम्
क्लेदमेदोवसामज्ञशकृन्मूत्रोपशोषणः १८६

स्रोतः प्रकाशको रूक्षः मेध्यो वर्चोविबन्धकृत् १८७

सोऽतियुक्तो भ्रान्तिदाहमुखताल्वोष्ठशोषकृत्
कण्ठादिपीडामूर्च्छाऽन्तर्दाहदो बलकान्तिहृत् १८८

तिक्तः शीतस्तृषामूर्च्छाज्वरपित्तकफाञ्जयेत्
कृमिकुष्ठविषोत्क्लेददाहरक्तगदापहः १८९

रुच्यः स्वयमरोचिष्णुः कण्ठस्तन्यविशोधनः
वातलोऽग्निकरो नासाशोषणो रूक्षणो लघुः १९०

सोऽतियुक्तः शिरःशूलमन्यास्तम्भश्रमार्त्तिकृत्
कम्पमूर्च्छातृषाकारी बलशुक्रक्षयप्रदः १९१

कषायो रोपणो ग्राही स्तम्भनः शोधनस्तथा

लेखनः पीडनः सौम्यः शोषणो वातकोपनः १९२

कफशोणितपित्तघ्नो रूक्षः शीतो लघुर्मतः
त्वक्प्रसाधन ग्रामस्य स्तम्भनो विशदो मतः
जिह्वायां जाडयकृत्कण्ठस्रोतसां च विबन्धकृत् १९३

सोऽतियुक्तो ग्रहाध्मानहृत्पीडाक्षेपणादिकृत् १९४

मधुरं श्लेष्मलंप्रायो जीर्णशालियवादृते
मुद्गाद्गोधूमतः क्षौद्रात्सिताया जाङ्गलामिषात् १९५

ग्रम्लं पित्तकरं प्रायो विना धात्रीं च दाडिमीम्
लवणं प्रायशो द्वेषि नेत्रयोः सैन्धवं विना १९६

प्रायः कटु तथा तिक्तमवृष्यं वातकोपनम्
शुण्ठी कृष्णारसोनानि पटोलममृतां विना १९७

पिप्पलीनागरं वृष्यं कटु चावृष्यमुच्यते
प्रायशः स्तम्भनं प्रोक्तं कषायमभयां विना १९८

सामान्येनात्र निर्दिष्टा गुणाः षड्रससम्भवाः
रसानां योगतस्तु स्यादन्य एव गुणोदयः १९९

संयोगाद्विषतां याति सममाज्येन माक्षिकम्
ग्रमृतत्वं विषं याति सर्पदष्टस्य वै यथा २००

लघुर्गुरुस्तथा स्निग्धो रूक्षस्तीक्ष्ण इति क्रमात्
नभोभूवारिवातानां वह्नेरेते गुणाःस्मृताः २०१

लघु पथ्यं परं प्रोक्तं कफघ्नं शीघ्रपाकि च २०२

गरु वातहरं पुष्टिश्लेष्मकृच्चिरपाकि च

स्निग्धं वातहरं श्लेष्मकारि वृष्यं बलावहम्
रूक्षं समीरणकरं परं कफहरं मतम् २०३

तीक्ष्णं पित्तकरं प्रायो लेखनं कफवातहृत्
सुश्रुते तु गुणा एते विंशतिस्तान्ब्रुवे शृणु २०४

गुरुर्लघुः स्निग्धरूक्षौ तीक्ष्णः श्लक्ष्णः स्थिरः सरः
पिच्छिलो विशदः शीत उष्णश्च मृदुकर्कशौ
स्थूलः सूक्ष्मो द्रवः शुष्क आशुर्मन्दः स्मृता गुणाः २०५

श्लक्ष्णः स्नेहं विनाऽपि स्यात्कठिनोऽपि हि चिक्कणः २०६

स्थिरो वातमलस्तम्भी सरस्तेषां प्रवर्तकः
पिच्छिलस्तन्तुलो बल्यः सन्धानः श्लेष्मलो गुरुः २०७

क्लेदच्छेदकरः ख्यातो विशदो व्रणरोपणः
शीतस्तु ह्लादनःस्तम्भी मूर्च्छातृटस्वेददाहनुत्
उष्णो भवति शीतस्य विपरीतश्च पाचनः २०८

स्थूलः स्थौल्यकरो देहे स्रोतसामवरोधकृत् २०९

देहस्य सूक्ष्मच्छिद्रेषु विशेद्यत्सूक्ष्ममुच्यते
द्रवः क्लेदकरो व्यापी शुष्कस्तद्विपरीतकः २१०

आशुराशुकरो देहे धावत्यम्भसि तैलवत्
मन्दः सकलकार्येषु शिथिलोऽल्पोऽपि कथ्यते २११

पचेन्नामं वह्निकृद्यद्दीपनं तद्यथा मिसिः २१२

पचत्यामं न वह्निं च कुर्याद्यत्तद्धि पाचनम्
नागकेशरवद्विद्याच्चित्रोदीपनपाचनः २१३

नशोधयति यद्दोषान्समान्नोदीरयत्यपि
समीकरोति विषमाञ्छमनं तद्यथाऽमृता २१४

कृत्वा पाकं मलानां च भित्वा बन्धमधो नयेत्
तद्धानुलोमनं ज्ञेयं यथा प्रोक्ता हरीतकी २१५

पक्तव्यं यदपक्त्वैव श्लिष्टं कोष्ठे मलादिकम्
नयत्यधः स्रंसनं तद्यथा स्यात्कृतमालकम् २१६

मलादिकमबद्धं यद्बद्धं वा पिण्डितं मलैः
भित्वाऽध पातयति यद्भेदनं कटुकी यथा २१७

विपक्वं यदपक्वं वा मलादि द्रवतां नयेत्
रेचयत्यपि तज्ज्ञेयं रेचनं त्रिवृता यथा २१८

अपक्वं पित्तश्लेष्मान्नं बलादूर्ध्वं नयेत्तु यत्
वमनं तद्धि विज्ञेयं मदनस्य फलं यथा २१९

स्थानाद्बहिर्नयेदूर्ध्वमधो वा मलसञ्चयम्
देहसंशोधनं तत्स्याद् देवदालीफलं यथा २२०

दीपनं पाचनं यत्स्यादुष्णत्वाद्द्रवशोषकम्
ग्राहि तच्च यथा शुण्ठी जीरकं गजपिप्पली २२१

रौक्ष्याच्छैत्यात्कषायत्वाल्लघुपाकाच्च यद्भवेत्
वातकृत्स्तम्भनं तत्स्याद्यथा वत्सकटुरटुकौ २२२

श्लिष्टान्कफादिकान्दोषानुन्मूलयति यद्बलात्
छेदनं तद्यथा क्षारा मरिचानि शिलाजतु २२३

धातून्मलान् वा देहस्य विशोध्योल्लेखयेच्च यत्

लेखनं तद्यथा क्षौद्रं नीरमुष्णं वचा यवाः २२४

यस्माद् द्रव्याद्भवेत्स्त्रीषु हर्षो वाजीकरं हि तत्
यथाऽश्वगन्धामुसली शर्करा च शतावरी २२५

यस्माच्छुक्रस्य वृद्धिः स्याच्छुक्रलं हि तदुच्यते
यथा नागबलाऽद्या स्युर्बीजं च कपिकच्छुजम् २२६

दुग्धं माषाश्च भल्लातफलमज्जामलानि च
एतानि जनकानि स्यू रेचकानि च रेतसः २२७

प्रवर्तिनी स्त्री शुक्रस्य रेचनं बृहतीफलम्
जातीफलं स्तम्भकं स्यात्कालिङ्गं क्षयकारि च २२८

रसायनन्तु तज्ज्ञेयं यज्जराव्याधिनाशनम्
यथा हरीतकी दन्ती गुग्गुलुश्च शिलाजतु २२९

पूर्वं व्याप्याखिलं कायं ततः पाकञ्च गच्छति
व्यवायि तद् यथा भङ्गा फेनञ्चाहि समुद्भवम् २३०

सन्धिबन्धांस्तु शिथिलान्यत्करोति विकाशि तत्
विशोष्यौजश्च धातुभ्यो यथा क्रमुककोद्रवौ २३१

बुद्धिं लुम्पति यद् द्रव्यं मदकारि तदुच्यते
तमोगुणप्रधानञ्च यथा मद्यं सुराऽदिकम् २३२

व्यवायि च विकाशि स्याच्छ्लेष्मच्छेदि मदावहम्
आग्नेयं जीवितहरं योगवाहि स्मृतं विषम् २३३

निजवीर्य्येण यद् द्रव्यं स्रोतोभ्यो दोषसञ्चयम्
निरस्यति प्रमाथि स्यात्तद्यथा मरिचं वचा २३४

पैच्छिल्याद्गौरवाद् द्रव्यं रुद्ध्वा रसवहाः शिराः
धत्ते यद्गौरवं तत्स्यादभिष्यन्दि यथा दधि २३५

विदाहि द्रव्यमुद्गारमम्लं कुर्यात्तथा तृषाम्
हृदि दाहं च जनयेत्पाकं गच्छति तच्चिरात् २३६

गृह्णाति योगवाहि द्रव्यं संसर्गिवस्तुगुणान्
पच्यमानं यथैतन्मधुजलतैलाज्यसूतलोहादिः २३७

उष्णशीतगुणोत्कर्षाद् बुधैवीर्यं द्विधा स्मृतम्
यत्सर्वमग्निषोमीयं दृश्यते भुवनत्रयम् २३८

उष्णं वातकफौ हन्यात् पित्तं तु तनुते जराम्
शीतं वातकफातङ्कान्कुरुते पित्तहृत्परम् २३९

तत्रोष्णं भ्रमतृड्ग्लानिस्वेददाहाशुपाकताम्
शमञ्च वातकफयो करोति शिशिरं पुनः
ह्लादनं जीवनं स्तम्भं प्रसादं रक्तपित्तयोः २४०

जाठरेणाग्निना योगाद्यदुदेति रसान्तरम्
रसानां परिणामान्ते स विपाक इति स्मृतः २४१

मिष्टः पटुश्च मधुरमम्लोऽम्ल पच्यते रसः
कटुतिक्तकषायाणां पाकः स्यात्प्रायशः कटुः २४२

श्लेष्मकृन्मधुरः पाको वातपित्तहरो मतः
अम्लस्तु कुरुते पित्तं वातश्लेष्मगदापहः २४३

कटुः करोति पवनं कफं पित्तञ्च नाशयेत्
विशेष एवं रसतो विपाकानां निदर्शितः २४४

रसादिसाम्ये यत्कर्म विशिष्टं तत्प्रभावजम्

दन्ती रसाद्यैस्तुल्यापि चित्रकस्य विरेचनी २४५

मधूकस्य च मृद्वीका घृतं क्षीरस्य दीपनम्
प्रभावस्तु यथा धात्री लकुचस्य रसादिभिः २४६

समाऽपि कुरुते दोषत्रितयस्य विनाशनम् २४७

क्वचित्तुकेवलं द्रव्यं कर्म कुर्यात्प्रभावतः
ज्वरं हन्ति शिरोबद्धा सहदेवीजटा यथा २४८

विरुद्धगुणसंयोगे भूयसाऽल्प हि जीयते
रसं विपाकस्तौ वीर्यं प्रभावस्तान्व्यपोहति २४९

इति मिश्रप्रकरणे मिश्रवर्गः प्रथमः समाप्तः १

Bhāva Prakāśha, by Bhav Mishra, edited by Brahmashankar Mishra, 1969 edition.
Typed by Pramod Sharma, M.A.
Proofread by Maya Nand Sastri, Ved Vyakaranacharya.
Font conversion by Claude Setzer and Ralph Bunker.
Formatted for Maharishi University of Management Vedic Literature Collection

भाव प्रकाशः

पूर्वखण्डे द्वितीयो भागः

तत्र सप्तमं परिभाषादिप्रकरणम् ७

न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित्
अतः प्रयोगकार्यार्थं मानमत्रोच्यते मया १
चरकस्य मतं वैद्यैराद्यैर्यस्मान्मतं ततः
विहाय सर्वमानानि मागधं मानमुच्यते २
त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः
त्रसरेणुस्तु पर्यायनाम्ना वंशी निगद्यते ३
जालान्तरगतैः सूर्यकरैर्वंशी विलोक्यते
षड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका ४
तिसृभी राजिकाभिश्च्न सर्षपः प्रोच्यते बुधैः
यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम् ५
षड्भिस्तु रक्तिकाभिः स्यान्माषको हेमधानकौ
माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते ६
टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ७
कोलद्वयन्तुं कर्षः स्यात्स प्रोक्तः पाणिमानिका
अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम् ८
विडालपदकं चैव तथा षोडशिका मता
करमध्यो हंसपदं सुवर्णं कवलग्रहः ९
उदुम्बरश्च पर्यायैः कर्षमेव निगद्यते
स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा १०
शुक्तिभ्याञ्च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका
प्रकुञ्चः षोडशी बिल्वं पलमेवात्र कीर्त्यते ११
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतञ्च निगद्यते
प्रसृतिभ्यामञ्जलि स्यात्कुडवोऽर्द्धशरावकः १२
अष्टमानञ्च स ज्ञेयः कुडवाभ्याञ्च मानिका
शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः १३
शरावाभ्यां भवेत्प्रस्थश्चतुः प्रस्थस्तथाऽढकः

© 2003 Cosmic Software and Vedic Engineering. This text is made available exclusively for on-line use, and for printing individual copies for personal use. Distribution of hard copies, or distribution of electronic files via the internet is expressly prohibited. For licensing, and for an editable text version on CD-ROM, please contact cssetzer@yahoo.com.

भाजनं कांस्यपात्रं च चतुःषष्टिपलश्च सः १४
चतुर्भिराढकैर्द्रोणः कलशो नल्वणोऽमणः
उन्मानञ्चघटो राशिर्द्रोणपर्यायसंज्ञितः १५
द्रोणाभ्यां शूर्पकुम्भौ च चतुःषष्टिशरावकः
शूर्पाभ्याञ्च भवेद् द्रोणी वाहो गोणी च सा स्मृता १६
द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः
चतुःसहस्रपलिका षरणवत्यधिका च सा १७
पलानां द्विसहस्रञ्च भार एकः प्रकीर्त्तितः
तुलापलशतं ज्ञेयं सर्वत्रैवैष निश्चयः १८
माषटङ्काक्षबिल्वानि कुडवप्रस्थमाढकम्
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणम् १९
गुञ्जाऽदिमानमारभ्य यावत्स्यात्कुडवस्थितिः
द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम् २०
प्रस्थादिमानमारभ्य द्विगुणं तद् द्रवार्द्रयोः
मानं तथा तुलायास्तु द्विगुणं न क्वचित्स्मृतम् २१
मृद्वृत्तवेणुलोहादेर्भाण्डं यच्चतुरङ्गुलम्
विस्तीर्णञ्च तथोच्चञ्च तन्मानं कुडवं वदेत् २२
इति मागधमानं समाप्तम्
यतो मन्दाग्नयो ह्रस्वा हीनसत्त्वा नराः कलौ
अतस्तु मात्रा तद्योग्या प्रोच्यते सुज्ञसंमता २३
यवो द्वादशभिर्गौरसर्षपैः प्रोच्यते बुधैः
यवद्वयेन गुञ्जा स्यात्त्रिगुञ्जो वल्ल उच्यते २४
माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत्क्वचित्
चतुर्भिर्माषकैः शाणः स निष्कष्टङ्क एव च २५
गद्याणो माषकैः षड्भिः कर्षः स्याद्दशमाषकैः
चतुष्कर्षैः पलं प्रोक्तं दशशाणमितं बुधैः २६
चतुष्पलैश्च कुडवः प्रस्थाद्याः पूर्ववन्मताः
स्थितिर्नास्त्येव मात्रायाः कालमग्निं वयो बलम् २७
प्रकृतिं दोषदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत्
नाल्पं हन्त्यौषधं व्याधिं यथाऽम्भोऽल्प महानलः

अतिमात्रं च दोषाय यथा शस्ये बहूदकम् २८

इति कालिङ्गमानं समाप्तम्

इति श्रीमिश्रलटकन तनय श्रीमिश्रभाव विरचिते भावप्रकाशे
परिभाषादिप्रकरणे
प्रथमं मानपरिभाषाख्यं प्रकरणं समाप्तम् १

अथ द्वितीयं भेषजविधानप्रकरणम् २

स्वरसश्च तथा कल्कः क्वाथश्च हिमफाणटकौ
ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम् १
अहतात्तत्क्षणाकृष्टाद् द्रव्यात्क्षुण्णात्समुद्भवेत्
वस्त्रनिष्पीडितो यश्च स्वरसो रस उच्यते २
कुडवं चूर्णितं द्रव्यं क्षिप्तञ्च द्विगुणे जले
अहोरात्रं स्थितं तस्माद्भवेद्वा रस उत्तमः ३
आदाय शुष्कद्रव्यं वा स्वरसानामसंभवे
जलेऽष्टगुणिते साध्यं पादशिष्टं च गृह्यते ४
स्वरस्य गुरुत्वाच्च पलमर्द्धं प्रयोजयेत्
निशोषितं चाग्निसिद्धं पलमात्रं रसं पिबेत् ५
सितामधुगुडक्षाराज्जीरकं लवणं तथा
घृतं तैलञ्च चूर्णादीन् कोलमात्रान् रसे क्षिपेत् ६
करिडतं तण्डुलपलं जलेऽष्टगुणिते क्षिपेत्
भावयित्वा जलं ग्राह्यं देयं सर्वत्र कर्मसु ७
क्षुण्णं द्रव्यपलं सम्यक् षड्भिर्नीरपलैः प्लुतम्
निशोषितं हिमः स स्यात्तथा शीतकषायकः
तस्य मानं मतं पाने पलद्वयमितं बुधैः ८
जले चतुष्पले शीते क्षुण्णं द्रव्यपलं क्षिपेत्
मृत्पात्रे मन्थयेत् सम्यक् तस्माच्च द्विपलं पिबेत् ९
क्षुण्णे द्रव्यपले सम्यग्जलमुष्णं विनिक्षिपेत्
मृत्पात्रे कुडवोन्मानं ततस्तु स्त्रावयेत्पटात् १०
स स्याच्चूर्णद्रवः फाणटस्तन्मानं द्विपलोन्मितम्
क्षौद्रं सितागुडादींस्तु कर्षमात्रान्विनिक्षिपेत् ११

द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत्
तदेव कल्को विज्ञेयस्तन्मानं कर्षसम्मितम् १२
कल्के मधुघृतं तैलं देयं द्विगुणमात्रया
सितां गुडं समं दद्याद् द्रवो देयश्चतुर्गुणः १३
अत्यन्तशुष्कं यद् द्रव्यं सुपिष्टं वस्त्रगालितम्
तत्स्याच्चूर्णं रजः क्षोदस्तन्मात्रा कर्षसम्मिता १४
चूर्णे गुडः समो देयः शर्करा द्विगुणा मता
चूर्णेषु भर्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत् १५
लिहेच्चूर्णं द्रवैः सर्वैर्घृताद्यैर्द्विगुणोन्मितैः
पिबेच्चतुर्गुणैरेवं चूर्णमालोडितं द्रवैः १६
चूर्णावलेहगुटिकाकल्कानामनुपानकम्
पित्तवातकफातङ्के त्रिद्व्येकपलमाहरेत् १७
यथा तैलं जले क्षिप्तं क्षणेनैव विसर्पति
अनुपानबलादङ्गे तथा सर्पति भेषजम् १८
द्रवेण यावता सम्यक् चूर्णं सर्वं प्लुतं भवेत्
भावनायाः प्रमाणं तु चूर्णे प्रोक्तं भिषग्वरैः १९
पुटपाकस्य कल्कस्य स्वरसो गृह्यते यतः
अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया २०
पुटपाकस्य पाकोऽय लेपस्याङ्गारवर्णता
लेपश्च द्व्यङ्गुलं स्थूलं कुर्याद् द्व्यङ्गुलमात्रकम् २१
काश्मरीवटजम्ब्वादिपत्रैर्वेष्टनमुत्तमम् २२
पलमात्रो रसो ग्राह्यः कर्षमानं मधु क्षिपेत्
कल्कचूर्णद्रवाद्यास्तु देयाः कोलमिता बुधैः २३
अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा
अथवा क्वथनेनैव सिद्धमुष्णोदकं भवेत् २४
श्लेष्मामवातमेदोघ्नं वस्तिशोधनदीपनम्
कासश्वासज्वरान् हन्ति पीतमुष्णोदकं निशि २५
क्षीरमष्टगुणं द्रव्यात्क्षीरान्नीरं चतुर्गुणम्
क्षीरावशेषं तत्पीतं शूलमामोद्भवं जयेत् २६
पानीयं षोडशगुणं क्षुरणे द्रव्यपले क्षिपेत्

मृत्पात्रे क्वाथयेद् ग्राह्यमष्टमांशावशेषितम् २७
कर्षादौ तु पलं यावद् दद्यात्षोडशिकं जलम्
ततस्तु कुडवं यावत्तोयमष्टगुणं भवेत्
चतुर्गुणमतश्चोर्ध्वं यावत् प्रस्थादिकं जलम् २८
तज्जलं पाययेद्धीमान्कोष्णं मृद्वग्निसाधितम्
शृतः क्वाथः कषायश्च निर्यूहः स निगद्यते २९
मात्रोत्तमा पलेन स्यात्त्रिभिरद्धैस्तु मध्यमा
जघन्या च पलार्द्धेन स्नेहक्वाथौषधेषु च ३०
क्वाथ्यद्रव्यपले वारि द्विरष्टगुणमिष्यते
चतुर्भागावशिष्टन्तु पेयं जलचतुष्टयम् ३१
दीप्तानलं महाकायं पाययेदञ्जलि जलम्
अन्ये त्वर्द्धं परित्यज्य प्रसृतिं तु चिकित्सकाः ३२
क्वाथत्यागमनिच्छन्तस्त्वष्टभागावशेषितम्
पारम्पर्योपदेशेन वृद्धवैद्याः पलद्वयम् ३३
क्वाथे क्षिपेत्सितामंशैश्चतुर्थाष्टमषोडशैः
वातपित्तकफातङ्के विपरीतं लघु स्मृतम् ३४
जीरकं गुग्गुलं क्षारं लवणं च शिलाजतु
हिङ्गु त्रिकटुकञ्चैव क्वाथे शाणोन्मितं क्षिपेत् ३५
क्षीरं घृतं गुडं तैलं मूत्रं चान्यद् द्रवं तथा
कल्कं चूर्णादिकं क्वाथे निक्षिपेत् कर्षसम्मितम् ३६
तत्रोपविश्य विश्रान्तः प्रसन्नवदनेक्षणः
औषधं हेमरजतमृद्भाजनपरिस्थितम् ३७
पिबेत् प्रसन्नहृदयः पीत्वा पात्रमधोमुखम्
विधायाचम्य सलिलं ताम्बूलाद्युपयोजयेत् ३८
क्वाथादेर्यत्पुनः पाकाद् घनत्वं सा रसक्रिया
सोऽवलेहश्च लेहश्च तन्मात्रा स्यात्पलोन्मिता ३९
सिता चतुर्गुणा कार्या चूर्णाच्च द्विगुणो गुडः
द्रवं चतुर्गुणं दद्यादिति सर्वत्र निश्चयः ४०
सुपक्वे तन्तुमत्त्वं स्यादवलेहेऽप्सु मज्जनम्
स्थिरत्वं पीडिते मुद्रा गन्धवर्णरसोद्भवः ४१

दुग्धमिक्षुरसं यूषं पञ्चमूलकषायकम्
वासाक्वाथं यथायोग्यमनुपानं प्रशस्यते ४२
वटका अथ कथ्यन्ते तन्नाम गुटिका वटी
मोदको वटिका पिण्डी गुडो वर्त्तिस्तथोच्यते ४३
लेहवत्साध्यते वह्नौ गुडो वा शर्कराऽथवा
गुग्गुल्लुर्वा क्षिपेत्तत्र चूर्णं तन्निर्मिता वटी ४४
कुर्यादवह्निसिद्धेन क्वचिद् गुग्गुलुना वटीम्
द्रवेण मधुना वाऽपि गुटिकां कारयेद् बुधः ४५
सिता चतुर्गुणा देया वटीषु द्विगुणो गुडः
चूर्णे चूर्णसमः कार्यो गुग्गुलुर्मधु तत्समम् ४६
द्रवं तु द्विगुणं देयं मोदकेषु भिषग्वरैः ४७
कर्षप्रमाणं तन्मात्रा बलं दृष्ट्वा प्रयुज्यते ४८
कल्काच्चतुर्गुणीकृत्य घृतं वा तैलमेव च
चतुर्गुणद्रवे साध्यं तस्य मात्रा पलोन्मिता ४९
निक्षिप्य क्वाथयेत्तोयं क्वाथ्यद्रव्याच्चतुर्गुणम्
पादशिष्टं गृहीत्वा तु स्नेहं तेनैव साधयेत् ५०
चतुर्गुणं मृदुद्रव्ये कठिनेऽष्टगुणं जलम्
मृद्वादिक्वाथ्यसंघाते दद्यादष्टगुणं पयः
अत्यन्त कठिने द्रव्ये नीरं षोडशिकं मतम् ५१
प्रस्थादितः क्षिपेन्नीरं खारीं यावच्चतुर्गुणम् ५२
अम्बुक्वाथरसैर्यत्र पृथक् स्नेहस्य साधनम्
कल्कस्यांशं तत्र दद्याच्चतुर्थ षष्ठमष्टमम् ५३
दुग्धेदध्नि रसे तक्रे कल्को देयोऽष्टमांशकः
कल्काच्च सम्यक् पाकार्थं तोयमत्र चतुर्गुणम् ५४
द्रवाणि यत्र स्नेहेषु पञ्चादीनि भवन्ति हि
तत्र स्नेहसमान्याहुर्यथापूर्वं चतुर्गुणम् ५५
द्रव्येण केवलेनैव स्नेहपाको भवेद् यदि
तत्राम्बुपिष्टः कल्कः स्याज्जलं चात्र चतुर्गुणम् ५६
क्वाथेन केवलेनैव पाको यत्रोदितः क्वचित्
क्वाथ्यद्रव्यस्य कल्कोऽपि तत्र स्नेहे प्रयुज्यते ५७

कल्कहीनस्तु यः स्नेहः स साध्यः केवले द्रवे ५८
पुष्पकल्कस्तु यः स्नेहस्तत्र तोयं चतुर्गुणम्
स्नेहात् स्नेहाष्टमांशश्च पुष्पकल्कः प्रयुज्यते ५९
वर्त्तिवत्स्नेहकल्कः स्याद् यदाऽङ्गुल्या विवर्त्तितः
शब्दहीनोऽग्निनिक्षिप्तःस्नेहः सिद्धो भवेत्तदा ६०
यदा फेनोद्गमस्तैले फेनशान्तिश्च सर्पिषि
वर्णगन्धरसोत्पत्तिः स्नेहः सिद्धो भवेत्तदा ६१
स्नेहपाकस्त्रिधा प्रोक्तो मृदुर्मध्यः खरस्तथा
ईषत्सरसकल्कस्तु स्नेहपाको मृदुर्भवेत् ६२
मध्यपाकस्य सिद्धिश्च कल्के नीरसकोमले
ईषत्कठिनकल्कश्च स्नेहपाको भवेत्खरः ६३
तदूर्ध्वं दग्धपाकः स्याद्दाहकृन्निष्प्रयोजनः
आमपाकश्च निर्वीर्यो वह्निमान्द्यकरो गुरुः ६४
नस्यार्थं स्यान्मृदुः पाको मध्यमः सर्वकर्मसु
अभ्यङ्गार्थः खरः प्रोक्तो युञ्ज्यादेवं यथोचितम् ६५
घृततैलगुडादींश्च साधयेन्नैकवासरे
प्रकुर्वुन्त्युषितास्त्वेते विशेषाद् गुणसञ्चयम् ६६
द्रवेषु चिरकालस्थं द्रव्यं यत्सन्धितं भवेत्
आसवारिष्टभेदैस्तु प्रोच्यते भेषजोचितम् ६७
यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः
अरिष्टः क्वाथसाध्यः स्यात्तयोर्मानं पलोन्मितम् ६८
अनुक्तमानारिष्टेषु द्रवाद् द्रोणं गुडात्तुलाम्
क्षौद्रं क्षिपेद् गुडादर्द्धं प्रक्षेपं दशमांशिकम् ६९
ज्ञेयः शीतरसः सीधुरपक्वमधुरद्रवैः
सिद्धः पक्वरसः सीधुः सम्पक्वमधुरद्रवैः ७०
परिपक्वान्नसन्धानात्समुत्पन्नां सुरां जगुः
सुरामण्डः प्रसन्ना स्यात्ततः कादम्वरी घना ७१
तदधो जगलो ज्ञेयो मेदको जगलाद्घनः
वक्कसो हृतसारः स्यात्सुराबीजं तु किण्वकम् ७२
यत्तालखर्जूररसैः सन्धिता सा हि वारुणी ७३

कन्दमूलफलादीनि सस्नेहलवणानि च
यत्र द्रवेऽभिषूयन्ते तच्छुक्तमभिधीयते ७४
विनष्टमम्लतां यातं मद्यं वा मधुरद्रवः
विनष्टः सन्धितो यस्तु तच्चुक्रमभिधीयते ७५
गुडाम्बुना सतैलेन कन्दशाकफलैस्तथा
संधितं चाम्लतां यातं गुडचुक्रं प्रचक्ष्यते
एवमेव हि शुक्तं स्यान्मृद्वीकासम्भवं तथा ७६
तुषाम्बु सन्धितं ज्ञेयमामैर्विदलितैर्यवः
यवैस्तु निस्तुषैः पक्वैः सौवीरं साधितं भवेत् ७७
आरनालन्तु गोधूमैरामैः स्यान्निस्तुस्तुषीकृतैः
पक्वैर्वा संहितं तत्तु सौवीरसदृशं गुणैः ७८
कुल्माषधान्यमण्डादिसहितं काञ्जिकं विदुः
शिण्डाकी संहिता ज्ञेया मूलकैः सर्षपादिभिः ७९

इति श्रीमिश्रलटकन तनय श्रीमिश्रभाव विरचिते भावप्रकाशे
परिभाषादिप्रकरणे
द्वितीयं भेषजविधानप्रकरणं समाप्तम् २

अथ तृतीयं धात्वादिशोधनमारण विधिप्रकरणम् ३

दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम्
तारशुल्बोज्झितं स्निग्धं कोमलं गुरु हेम सत् १
तच्छेदे कठिनं रूक्षं विवर्णं समलं दलम्
दाहे छेदे सितं श्वेतं कषे स्फुटं लघु त्यजेत् २
पत्तलीकृतपत्राणि हेम्नो वह्नौ प्रतापयेत्
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ३
गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा
एवं हेम्नः परेषाञ्च धातूनां शोधनं भवेत् ४
बलं सवीर्य्यं हरते नराणां रोगव्रजं पोषयतीह काये
असौख्यकार्येव सदा सुवर्णमशुद्धमेतन्मरणञ्च कुर्यात् ५
स्वर्णस्य द्विगुणं सूतमम्लेन सह मर्दयेत्
तद्गोलकसमं गन्धं निदध्यादधरोत्तरम् ६

गोलकञ्च ततो रुद्ध्वा शरावदृढसम्पुटे
त्रिंशद्वनोपलैर्दद्यात्पुटान्येवं चतुर्दश
निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः ७
काञ्चने गलिते नागं षोडशांशेन निक्षिपेत्
चूर्णयित्वा तथाम्लेन घृष्ट्वा कृत्वा तु गोलकम् ८
गोलकेन समं गन्धं दत्त्वा चैवाधरोत्तरम् ९
शरावसम्पुटे धृत्वा पुटेत् त्रिंशद्वनोपलैः
एवं सप्तपुटैर्हेम निरुत्थं भस्म जायते १०
काञ्चनाररसैर्घृष्ट्वा समसूतकगन्धयोः
कज्जलद्यं हेमपत्राणि लेपयेत्समया तथा ११
काञ्चनारत्वचः कल्कैर्मूषायुग्मं प्रकल्पयेत्
धृत्वा तत्संपुटे गोलं मृण्मूषासम्पुटे च तत् १२
निधाय सन्धिरोधं च कृत्वा संशोष्य गोलकम्
वह्निं खरतरं कुर्यादेवं दत्त्वा पुटत्रयम् १३
निरुत्थं जायते भस्म सर्वकर्मसु योजयेत्
काञ्चनारप्रकारेण लाङ्गली हन्ति काञ्चनम् १४
ज्वालामुखी तथा हन्याद् यथा हन्ति मनःशिला १५
शिलासिन्दूरयोश्चूर्णं समयोरर्कदुग्धकैः
सप्तधा भावनां दद्याच्छोषयेच्च पुनः पुनः १६
ततस्तु गलिते हेम्नि कल्कोऽय दीयते समः
पुनर्धमेदतितरां यथा कल्को विलीयते
एवं वेलात्रयं दद्यात्कल्कं हेममृतिर्भवेत् १७
सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनम्
स्वादु तिक्तं च तुवरं पाके च स्वादु पिच्छिलम् १८
पवित्रं बृंहणं नेत्र्यं मेधास्मृतिमतिप्रदम्
हृद्यामायुष्करं कान्तिवाग्विशुद्धिस्थिरत्वकृत्
विषद्वयक्षयोन्मादत्रिदोषज्वरशोषजित् १९
असम्यङ्मारितं स्वर्णं बलं वीर्यं च नाशयेत्
करोति रोगान् मृत्युं च तद्धन्याद् यत्नतस्ततः २०
लोहादेरनपुनर्भावस्तद्गुणत्वं गुणाढ्यता

सलिले तरणं चापि तत्सिद्धिः पुटनाद्भवेत् २१
गम्भीरे विस्तृते कुण्डे द्विहस्ते चतुरस्त्रके
वनोपलसहस्रेण पूरिते पुटनौषधम् २२
कोष्ठे रुद्धं प्रयत्नेन गोविष्ठोपरि धारयेत्
वनोपलसहस्रार्द्धं कोष्ठिकोपरि निक्षिपेत् २३
वह्निं विनिक्षिपेत्तत्र महापुटमिति स्मृतम् २४
सपादहस्तमानेन कुण्डे निम्ने तथाऽयते
वनोपलसहस्रेण पूर्णे मध्ये विधारयेत् २५
पुटनद्रव्यसंयुक्तां कोष्टिकां मुद्रितां मुखे
अधोऽधानि करण्डानि अर्धान्युपरि निक्षिपेत्
एतद्गजपुटं प्रोक्तं ख्यातं सर्वपुटोत्तमम् २६
अरत्निमात्रके कुण्डे पुटं वाराहमुच्यते
वितस्तिमात्रके खाते कथितं कौक्कुटं पुटम् २७
षोडशाङ्गुलके खाते कस्यचित्कौक्कुटं पुटम् २८
यत्पुटं दीयते खाते ह्यष्टसंख्यैर्वनोपलैः
कपोतपुटमेतत्तु कथितं पुटपण्डितैः २९
गोष्ठान्तर्गोखुरक्षुण्णं शुष्कं चूर्णितगोमयम्
गोबरं तत्समाख्यातं वरिष्ठं रससाधने ३०
बृहद्भाण्डस्थितैर्यत्र गौबरैर्दीयते पुटम्
तद् गोबरपुटं प्रोक्तं भिषग्भिः सूतभस्मनि ३१
बृहद्भाण्डे तुषैः पूर्णे मध्ये मूषां विधारयेत्
क्षिप्त्वाऽग्नि मुद्रयेद्भाण्डं तद्भाण्डपुटमुच्यते ३२
भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपिके
कूपिकाकण्ठपर्यन्तं वालुकाभिश्च पूरिते ३३
भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते
बालुकायन्त्रमेतद्धि यन्त्रं तत्र बुधैः स्मृतम् ३४
निबद्धमौषधं सूतं भूर्जे तत्त्रिगुणे वरे
रसपोटलिकां काष्ठे दृढं बद्ध्वा गुणेन हि ३५
सन्धानपूर्णकुम्भान्तःस्वावलम्बनसन्धितम्
अधस्ताज्ज्वालयेदग्निं तत्तदुक्तक्रमेण हि

दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि ३६
साम्बुस्थालीमुखे बद्धे वस्त्रे स्वेद्यं निधाय च
पिधाय पच्यते तत्र तद् यन्त्रं स्वेदनं स्मृतम् ३७
अधःस्थाल्यां रसं क्षिप्त्वा विदध्यात्तन्मुखोपरि
स्थालीमूर्ध्वमुखीं सम्यङ्निरुध्य मृदुमृत्स्नया ३८
ऊर्ध्वस्थाल्यां जलं क्षिप्त्वा चुल्ल्यामारोप्य यत्नतः
अधस्ताज्ज्वालयेदग्निं यावत्प्रहरपञ्चकम् ३९
स्वाङ्गशीतं ततो यन्त्राद् गृह्णीयाद्रसमुत्तमम्
विद्याधराभिधं यन्त्रमेतत्तज्ज्ञैरुदाहृतम् ४०
बालुकाभिः समस्ताङ्गं गर्त्ते मूषां रसान्विताम्
दीप्तोपलैः संवृणुयाद् यन्त्रं भूधरनामकम् ४१
यन्त्रं डमरुसंज्ञं स्यात्तत्स्थाल्या मुद्रिते मुखे ४२
गुरु स्निग्धं मृदु श्वेतं दाहे छेदे घनत्वमम्
वर्णाढ्यं चन्द्रवत् स्वच्छं तारं नवगुणं शुभम् ४३
कठिनं कृत्रिमं रूक्षं रक्तं पीतदलं लघु
दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ४४
पत्तलीकृतपत्राणि तारस्याग्नौ प्रतापयेत्
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ४५
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा
एवं रजतपत्राणां विशुद्धिः संप्रजायते ४६
रूप्यं त्वशुद्धं प्रकरोति तापं विबन्धकं वीर्यबलक्षयं च
देहस्य पुष्टिं हरते तनोति रोगांस्ततः शोधनमस्य कुर्यात् ४७
भागैकं तालकं मर्द्यं याममम्लेन केनचित्
तेन भागत्रयं तारपत्राणि परिलेपयेत् ४८
धृत्वा मूषापुटे रुद्ध्वा पुटेत्त्रिंशद्वनोपलैः
समुद्धृत्य पुनस्तालं दत्त्वा रुद्ध्वा पुटे पचेत्
एवं चतुर्दशपुटैस्तारं भस्म प्रजायते ४९
स्नुहीक्षीरेण सम्पिष्टं माक्षिकं तेन लेपयेत् ५०
तालकस्य प्रकारेण तारपत्राणि बुद्धिमान्
पुटेच्चतुर्दशपुटैस्तारं भस्म प्रजायते ५१

रौप्यं शीतं कषायं च स्वादुपाकरसं सरम्
वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित्
प्रमेहादिकरोगांश्च नाशयत्यचिराद्ध्रुवम् ५२
जपाकुसुमसङ्काशं स्निग्धं गुरु घनच्छमम्
लोहनागोज्झितं ताम्रं मारणाय प्रशस्यते ५३
कृष्णं रूच्छमतिस्वच्छं श्वेतं चापि घनासहम्
लोहनागयुतं चेति शुल्वं दुष्टं प्रकीर्त्तितम् ५४
पत्तलीकृतपत्राणि ताम्रस्याग्नौ प्रतापयेत्
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ५५
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा
एवं ताम्रस्य पत्राणां विशुद्धिः संप्रजायते ५६
एको दोषो विषे ताम्रे त्वशुद्धेऽष्टौ भ्रमो वमिः
विरेकस्वेद उत्क्लेदो मूर्च्छा दाहोऽरुचिस्तथा ५७
न विषं विषमित्याहुस्ताम्रन्तु विषमुच्यते
एको दोषो विषे ताम्रे त्वष्टौ दोषाः प्रकीर्त्तिताः ५८
सूच्छमाणि ताम्रपत्राणि कृत्वा संस्वेदयेद् बुधः
वासरत्रयमम्लेन ततः खल्वे विनिच्छिपेत् ५९
पादांशं सूतकं दत्त्वा याममम्लेन मर्दयेत्
ततः उद्धृत्य पत्राणि लेपयेद् द्विगुणेन च ६०
गन्धकेनाम्लघृष्टेन तस्य कुर्याच्च गोलकम्
ततः पिष्ट्वा च मीनाच्छीं चाङ्गेरीं वा पुनर्नवाम् ६१
तत्कल्केन बहिर्गोलं लेपयेद्द्वयङ्गुलोन्मितम्
धृत्वा तद् गोलकं भाण्डे शरावेण च रोधयेत् ६२
बालुकाभिः प्रपूर्याथ विभूतिलवणाम्बुभिः
दत्वा भाण्डमुखे मुद्रां ततश्चुल्ल्यां विपाचयेत् ६३
क्रमवृद्ध्याऽग्निना सम्यग्यावद्यामचतुष्टयम्
स्वाङ्गशीतं समुद्धृत्य मर्दयेच्छूरणद्रवैः ६४
यामैकं गोलकं तच्च विच्छिपेच्छूरणोदरे
मृदा लेपस्तु कर्त्तव्यः सर्वतोऽङ्गुष्ठमात्रकः ६५
पाच्यं गजपुटे च्छिप्तं मृतं भवति निश्चितम् ६६

वमनं च विरेकं च भ्रमं क्लममथारुचिम्
विदाहं स्वेदमुत्क्लेदं न करोति कदाचन ६७
ताम्रं कषायं मधुरं सतिक्तमम्लञ्च पाके कटु सारकं च
पित्तापहं श्लेष्महरं च शीतं तद्रोपणं स्याल्लघु लेखनं च ६८
पाण्डूदरार्शोज्वरकुष्ठकासश्वासक्षयान्पीनसमम्लपित्तम्
शोथं कृमीञ्शूलमपाकरोति प्राहुर्बुधा बृंहणमल्पमेतत् ६९
एको दोषो विषे ताम्रे त्वसम्यङ्निरिते पुनः
दाहः स्वेदोऽरुचिर्मूर्च्छोत्क्लेदो रेको वमिर्भ्रमः ७०
वङ्गं च गिरिजं तच्च खुरकं मिश्रकं द्विधा
तयोस्तु खुरकं श्रेष्ठं मिश्रकं त्वहितं मतम् ७१
वङ्गं विधत्ते खलु शुद्धिहीनमाक्षेपकम्पौ च किलासगुल्मौ
कुष्ठानि शूलं किल वातशोथं पाण्डुं प्रमेहञ्च भगन्दरञ्च ७२
विषोपमं रक्तविकारवृन्दं क्षयञ्च कृच्छ्राणि कफज्वरञ्च
मेहाश्मरीविद्रधिमुष्करोगान् नागोऽपि कुर्यात्कथितान्विकारान् ७३
वङ्गनागौ प्रतप्तौ च गलितौ तौ निषेचयेत्
त्रिधा त्रिधा विशुद्धिः स्याद्रविदुग्धेऽपि च त्रिधा ७४
मृत्पात्रे द्राविते वङ्गे चिञ्चाऽश्वत्थत्वचो रजः
पिष्ट्वा वङ्गचतुर्थांशमथोदर्व्या प्रचालयेत् ७५
ततो द्वियाममात्रेण वङ्गं भस्म प्रजायते
अथ भस्मसमं तालं क्षिप्त्वाऽम्लेन विमर्दयेत् ७६
ततो गजपुटे पक्त्वा पुनरम्लेन मर्दयेत्
तालेन दशमांशेन याममेकं ततः पुटेत्
एवं दशपुटैः पक्वं वङ्गं भवति मारितम् ७७
वङ्गं लघु सरं रूक्षं कुष्ठं मेहकफकृमीन्
निहन्ति पाण्डुं सश्वासं नेत्र्यमीषत्तु पित्तलम् ७८
सिंहो गजौघं तु यथा निहन्ति तथैव वङ्गोऽखिलमेहवर्गम्
देहस्य सौख्यं प्रबलेन्द्रियत्वं नरस्य पुष्टिं विदधाति नूनम् ७९
यशदं गिरिजं तस्य दोषाः शोधनमारणे
वङ्गस्येव हि बोद्धव्या गुणांस्तु गणयाम्यथ ८०
यशदं च सरं तिक्तं शीतलं कफपित्तहृत्

चक्षुष्यं परमं मेहान् पाण्डुं श्वासञ्च नाशयेत् ८१
तस्य साहजिका दोषा वङ्गस्येव निदर्शिताः
शोधनञ्चापि तस्येव भिषग्भिर्गदितं पुरा ८२
ताम्बूलरससम्पिष्टं शिलालेपात् पुनः पुनः
द्वात्रिंशद्भिः पुटैर्नागो निरुत्थं भस्म जायते ८३
अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निक्षिपेत्
मृत्पात्रे विद्रुतो नागो लोहदर्व्या प्रचालितः ८४
यामैकेन भवेद्भस्म तत्तुल्या स्यान्मनःशिला
काञ्जिकेन द्वयं पिष्ट्वा पचेद्वजपुटेन च ८५
स्वाङ्गशीतं पुनः पिष्ट्वा शिलया काञ्जिकेन च
पुनः पचेच्छरावाभ्यामेवं षष्टिपुटैर्मृतिः ८६
सीसं वङ्गगुणं ज्ञेयं विशेषान्मेहनाशनम् ८७
नागस्तु नागशततुल्यबलं ददाति व्याधिं च नाशयति जीवनमातनोति
वह्निं प्रदीपयति कामबलं करोति मृत्युञ्च नाशयति सन्ततसेवितः सः ८८
खञ्जत्वकुष्ठामयमृत्युकारी हृद्रोगशूलौ कुरुतेऽश्मरीञ्च
नानारुजानां च तथा प्रकोपं कुर्याच्च हल्लासमशुद्धलौहम् ८९
पत्तलीकृतपत्राणि लौहस्याग्नौ प्रतापयेत्
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ९०
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा
एवं लौहस्य पत्राणां विशुद्धिः संप्रजायते ९१
शुद्धं लौहभवं चूर्णं पातालगरुडीरसैः
मर्दयित्वा पुटेद्वह्नौ दद्यादेवं पुटत्रयम् ९२
पुटत्रयं कुमार्याश्च कुठारच्छिन्निकिरसैः
पुटषट्कं ततो दद्यादेवं तीक्ष्णमृतिर्भवेत् ९३
क्षिपेच्च द्वादशांशेन दरदं तीक्ष्णचूर्णतः
मर्दयेत्कन्यकाद्रावैर्यामयुग्मं ततः पुटेत्
एवं सप्तपुटैर्मृत्युं लौहचूर्णमवाप्नुयात् ९४
सत्योऽनुभूतो योगेन्द्रैः क्रमोऽन्यो लौहमारणे
कथ्यते रामराजेन कौतूहलधियाऽधुना ९५
सूतकाद् द्विगुणं गन्धं दत्त्वा कुर्याच्च कज्जलीम्

द्वयोः समं लौहचूर्णं मर्दयेत्कन्यकाद्रवैः ९६
यामयुग्मं ततः पिण्डं कृत्वा ताम्रस्य पात्रके
घर्मे धृत्वा रुबूकस्य पत्रैराच्छादयेद्बुधः ९७
यामत्रयाद्भवेदुष्णं धान्यराशौ न्यसेत्ततः
दत्त्वोपरि शरावं तु त्रिदिनान्ते समुद्धरेत् ९८
पिष्ट्वा च गालयेद्वस्त्रादेवं वारितरं भवेत्
दाडिमस्य दलं पिष्ट्वा तच्चतुर्गुणवारिणा ९९
तद्रसेनायसं चूर्णं सन्नीय प्लावयेदिति
आतपे शोषयेत्तच्च पुटेदेवं पुनः पुनः १००
एकविंशतिवारैस्तन्म्रियते नात्र संशयः
एवं सर्वाणि लौहानि स्वर्णादीन्यपि मारयेत् १०१
लौहं तिक्तं सरं शीतं कषायं मधुरं गुरु
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत् १०२
कफं पित्तं गरं शूलं शोफार्शः प्लीहपाण्डुताः
मेदोमेहकृमीन् कुष्ठं तत्किट्टं तद्वदेव हि १०३
गुञ्जामेकां समारभ्य यावत्स्युर्नवरक्तिकाः
तावल्लौहं समश्नीयाद्यथादोषानलं नरः १०४
कूष्माण्डं तिलतैलं च माषान्नं राजिकां तथा
मद्यमम्लरसञ्चैव वर्जयेल्लौहसेवकः १०५
शिलागन्धार्कदुग्धाक्ताः स्वर्णाद्याः सर्वधातवः
म्रियन्ते द्वादशपुटैः सत्यं गुरुवचो यथा १०६
मन्दानलत्वं बलहानिमुग्रां बिष्टम्भितां नेत्रगदान् सकुष्ठान्
मालां तथैव व्रणपूर्विकाञ्च कुर्यादशुद्धं खलु माक्षिकञ्च १०७
माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च
मातुलुङ्गद्रवैर्वाऽथ जम्बीरस्य द्रवैः पचेत् १०८
चालयेल्लौहजे पात्रे यावत्पात्रं सुलोहितम्
भवेत्ततस्तु संशुद्धिं स्वर्णमाक्षिकमृच्छति १०९
कुलत्थस्य कषायेण घृष्ट्वा तैलेन वा पुटेत्
तक्रेण वाऽजमूत्रेण म्रियते स्वर्णमाक्षिकम् ११०
स्वर्णमाक्षिकवद्दोषा विज्ञेयास्तारमाक्षिके

अतस्तद्दोषशान्त्यर्थं शोधनं तस्य कथ्यते १११
कर्कोटीमेषशृङ्ग्युत्थैर्द्रवैर्जम्बीरजैर्दिनम्
भावयेदातपे तीव्रे विमला शुद्ध्यति ध्रुवम् ११२
कुलत्थस्य कषायेण घृष्ट्वा तैलेन वा पुटेत्
मरणं वाऽजमूत्रेण तारमाक्षिकमृच्छति ११३
न केवलं स्वर्णरूप्यगुणास्तापीजयोर्मताः
द्रव्यान्तरस्य संसर्गात्सन्त्यन्येऽपि गुणास्तयोः ११४
माक्षिकं मधुरं तिक्तं स्वर्यं वृष्यं रसायनम् ११५
चक्षुष्यं वस्तिरुक्कुष्ठपाण्डुमेहविषोदरम्
अर्शः शोफं क्षयं कण्डूं त्रिदोषञ्च नियच्छति ११६
विष्ठया मर्दयेत्तुत्थं मार्जारककपोतयोः
दशांशं टङ्कणं दत्त्वा पचेल्लघुपुटे ततः
पुटं दध्ना पुटं क्षौद्रैर्देयं तुत्थविशुद्धये ११७
तुत्थकं कटुकं क्षारं कषायं वामकं लघु ११८
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत्
विषाश्मकुष्ठकण्डूघ्नं तद्गुणं खर्परं मतम् ११९
पत्तलीकृतपत्राणि कांस्यस्याग्नौ प्रतापयेत्
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके १२०
गोमूत्रे च कुलत्थानां कषायेऽत्र त्रिधा त्रिधा
एवं कांस्यस्य रीतेश्च विशुद्धिः सम्प्रजायते १२१
अर्कक्षीरेण सम्पिष्टो गन्धकस्तेन लेपयेत्
समेन कांस्यपत्राणि शुद्धान्यम्लद्रवैर्मुहुः १२२
ततो मूषापुटे धृत्वा पचेद्गजपुटेन च
एवं पुटद्वयात् कांस्यं रीतिश्च म्रियते ध्रुवम् १२३
कांस्यं कषायं तीक्ष्णोष्णं लेखनं विशदं सरम्
गुरु नेत्रहितं रूक्षं कफपित्तहरं परम् १२४
रीतिका तु भवेद्रूक्षा सतिक्ता लवणा रसे
शोधनी पाण्डुरोगघ्नी कृमिहृन्नातिलेखनी १२५
दुग्धाम्लयोगतस्तस्य विशुद्धिर्गदिता बुधैः १२६
सिन्दूर उष्णो वीसर्पकुष्ठकण्डूविषापहः

भग्नसन्धानजननो व्रणशोधनरोपणः १२७
गोमूत्रगन्धवत्कृष्णं स्निग्धं मृदु तथा गुरु
तिक्तं कषायं शीतञ्च सर्वश्रेष्ठं तदायसम् १२८
विन्ध्यादौ बहुलं तत्तु यत्र लौहं यतोऽधिकम्
तच्छोधनमृते व्यर्थमनेकमलमेलनात् १२९
शिलाजतु समानीय सूक्ष्मं खण्डं विधाय च
निक्षिप्यात्युष्णपानीये यामैकं स्थापयेत्सुधीः १३०
मर्दयित्वा ततो नीरं गृह्णीयाद्वस्त्रगालितम्
स्थापयित्वा च मृत्पात्रे धारयेदातपे बुधः १३१
उपरिस्थं घनं यत्स्यात्तत्क्षिपेदन्यपात्रके
एवं पुनः पुनर्नीतं द्विमासाभ्यां शिलाजतु १३२
भवेत्कार्यक्षमं वह्नौ क्षिप्तं लिङ्गोपमं भवेत्
निर्धूमञ्च ततः शुद्धं सर्वकर्मसु योजयेत् १३३
व्याधिव्याधितसात्म्यं समनुसरन् भावयेदयःपात्रे
प्राक् केवलजलधौतं शुष्कं क्वाथैस्ततो भाव्यम् १३४
तुल्यं गिरिजेन जले वसुगुणिते भावनौषधं क्वाथ्यम्
तत्क्वाथे पादांशे पूतोष्णे प्रक्षिपेद्गिरिजम् १३५
तत्समरसतां यातं संशुष्कं प्रक्षिपेद्रसे भूयः
स्वैः स्वैवं क्वाथैर्भाव्यं वारान् भवेत् सप्त १३६
अथ स्निग्धस्य शुद्धस्य वृतं तिक्तकसाधितम्
त्र्यहं युञ्जीत गिरिजमेकैकेन तथा त्र्यहम् १३७
फलत्रयस्य यूषेण पटोल्या मधुकस्य च
शिलाजमेवं देहस्य भवत्यत्युपकारकम् १३८
लोहस्थितं निम्बगुडूचिसर्पिर्यवैर्यथावत्परिभावयेत्तत्
सन्तानिकाकीटपतङ्गदंशदुष्टौषधीदोषनिवारणाय १३९
उष्णे च काले रवितापयुक्ते व्यभ्रे निवाते समभूमिभागे
चत्वारि पात्राणयसितायसानि न्यस्यातपे तत्र कृतावधानः १४०
शिलाजतु श्रेष्ठमवाप्य पात्रे प्रक्षिप्य तस्माद् द्विगुणञ्च तोयम्
उष्णं तदूर्ध्वं क्वथितञ्च दत्त्वा विशोधयेत्तन्मृदितं यथावत् १४१
ततस्तु यत्कृष्णमुपैति चोर्ध्वं सन्तानिकावद्रविरश्मितप्तम्

पात्रे तदन्यत्र ततो निदध्यात्तत्रापरं कोष्णजलं क्षिपेच्च १४२
पुनश्च तस्मादपरत्र पात्रे पश्चाच्च पात्रादपरत्र भूयः
यदा विशुद्धं जलमेवमूर्ध्वं कृष्णं समस्तं मलमेत्यधस्तात्
तदा त्यजेत्तत्सलिलं मलञ्च शिलाजतु स्याज्जलशुद्धमेवम् १४३
शिलाजतु स्मृतं तिक्तं कटूष्णं कटुपाकि च
रसायनं योगवाहि श्लेष्ममेहाश्मशर्कराः १४४
मूत्रकृच्छ्रं क्षयं श्वासं शोथमर्शांसि पाण्डुताम्
वातरक्तं तथा कुष्ठमपस्मारोदरं हरेत् १४५
नानाधान्यैर्यथाप्राप्तैस्तुषवर्जैर्जलान्वितैः
मृद्भाण्डं पूरितं रक्षेद्यावदम्लत्वमाप्नुयात् १४६
तन्मध्ये भृङ्गराड् मुण्डी विष्णुक्रान्ता पुनर्नवा
मीनाक्षी चैव सर्पाक्षी सहदेवी शतावरी १४७
त्रिफला गिरिकर्णी च हंसपादी च चित्रकम्
समूलं कुट्टयित्वा तु यथालाभं विनिक्षिपेत् १४८
पूर्वाम्लभाण्डमध्ये तु धान्याम्लकमिदं स्मृतम्
स्वेदनादिषु सर्वत्र रसराजस्य योजयेत्
अत्यम्लमारनालं वा तदभावे प्रयोजयेत् १४९
त्र्यूषणं लवणं राजी रजनी त्रिफलाऽर्द्रकम्
महाबला नागबला मेघनादः पुनर्नवा १५०
मेषशृङ्गी चित्रकञ्च नवसारं समं समम्
एतत्समस्तं व्यस्तं वा पूर्वाम्लेनैव पेषयेत् १५१
प्रलिम्पेत्तेन कल्केन वस्त्रमङ्गुलमात्रकम् १५२
तन्मध्ये निक्षिपेत्सूतं बद्ध्वा तत्त्रिदिनं पचेत्
दोलायन्त्रेऽम्लसंयुक्ते जायते स्वेदितो रसः १५३
मूलकानलसिन्धूत्थत्र्यूषणार्द्रकराजिकाः
रसस्य षोडशांशेन द्रव्यं युञ्ज्यात् पृथक्पृथक् १५४
द्रव्येष्वनुक्तमानेषु मतं मानमितं बुधैः
पट्टावृतेषु चैतेषु सूतं प्रक्षिप्य काञ्जिके १५५
स्वेदयेद्दिनमेकञ्च दोलायन्त्रेण बुद्धिमान्
स्वेदात्तीव्रो भवेत्सूतो मर्दनाच्च सुनिर्मलः १५६

इष्टिकाचूर्णचूर्णाभ्यामादौ मर्द्यो रसस्ततः
दध्ना गुडेन सिन्धूत्थराजिकागृहधूमकैः १५७
कुमारिकाचित्रकरक्तसर्षपैः कृतैः कषायैर्बृहतीविमिश्रितैः
फलत्रिकेणापि विमर्दितो रसो दिनत्रयं सर्वमलैर्विमुच्यते १५८
त्र्यूषणत्रिफलावन्ध्याकन्दैः क्षुद्राद्वयान्वितैः
चित्रकोर्णानिशाक्षारकन्याऽककनकद्रवैः १५९
सूतं कृतेन यूषेण वारान्सप्त विमर्दयेत्
इत्थं संमूर्च्छितः सूतस्त्यजेत्सप्तापि कञ्चुकान् १६०
मयूरग्रीवताप्याभ्यां नष्टपिष्टीकृतस्य च
यन्त्रे विद्याधरे कुर्याद्रसेन्द्रस्योर्ध्वपातनम् १६१
त्रिफलाशिग्रुशिखिभिर्लवणासुरिसंयुतैः
नष्टपिष्टं रसं कृत्वा लेपयेदूर्ध्वभाजनम् १६२
ततो दीप्तैरधः पातमुपलैस्तस्य कारयेत्
यन्त्रे भूधरसंज्ञे तु ततः सूतो विशुद्ध्यति १६३
स्वेदनादिक्रियाभिस्तु शोधितोऽसौ यदा भवेत्
तदा कार्याणि कुरुते प्रयोज्यः सर्वकर्मसु १६४
गृहकन्या हरति मलं त्रिफलाऽग्नि चित्रको विषं हन्ति
तस्मादेभिर्मिश्रैर्वारान् संमूर्च्छयेत्सप्त १६५
कुमारिकाचित्रकरक्तसर्षपैः कृतैः कषायैर्वृहतीविमिश्रितैः
फलत्रिकेणापि विमर्दितो रसो दिनत्रयं सर्वमलैर्विमुच्यते १६६
कुमार्या च निशाचूर्णैर्दिनं सूतं विमर्दयेत्
एवं कदर्थितः सूतः षण्ढो भवति निश्चितम् १६७
बह्वौषधिकषायेण स्वेदितः स बली भवेत्
सर्पाक्षीचिञ्चिकावन्ध्याभृङ्गाब्दैः स्वेदितो बली
ततः स पावकद्रावैः स्विन्नः स्यादतिदीप्तिमान् १६८
धूमसारं रसं तोरीं गन्धकं नवसादरम्
यामैकं मर्दयेदम्लैर्भागं कृत्वा समं समम् १६९
काचकूप्यां विनिक्षिप्य ताञ्च मृद्वस्त्रमुद्रया
विलिप्य परितो वक्त्रे मुद्रां दत्त्वा विशोषयेत् १७०
अधः सच्छिद्रपिठरीमध्ये कूपीं निवेशयेत्

पिठरीं बालुकापूरैर्भृत्वा चाकूपिकागलम् १७१
निवेश्य चुल्ल्यां तदधो बह्निं कुर्याच्छनैः शनैः
तस्मादत्यधिकं किञ्चित्पावकं ज्वालयेत्क्रमात् १७२
एवं द्वादशभिर्यामैम्रियते रस उत्तमः
स्फोटयेत्स्वाङ्गशीतं तमूर्ध्वगं गन्धकं त्यजेत् १७३
अधःस्थञ्च मृतं सूतं गृह्णीयात्तं तु मात्रया
यथोचितानुपानेन सर्वकर्मसु योजयेत् १७४
अपामार्गस्य बीजानां मूषायुग्मं प्रकल्पयेत्
तत्सम्पुटे क्षिपेत्सूतं मलयूदुग्धमिश्रितम् १७५
द्रोणपुष्पीप्रसूनानि विडङ्गमरिमेदकः
एतच्चूर्णमधश्चोर्ध्वं दत्त्वा मुद्रा प्रदीयते १७६
तद्गोलं स्थापयेत्सम्यङ् मृन्मूषासम्पुटे पचेत् १७७
एवमेकपुटेनैव सूतकं भस्म जायते
तत्प्रयोज्यं यथास्थाने यथामात्रं यथाविधि १७८
काकोदुम्बरिकादुग्धैः रसं किञ्चिद्विमर्दयेत्
तद्दुग्धघृष्टहिङ्गोश्च मूषायुग्मं प्रकल्पयेत् १७९
क्षिप्त्वा तत्संपुटे सूतं तत्र मुद्रां प्रदापयेत्
धृत्वा तद् गोलकं प्राज्ञो मृन्मूषासम्पुटेऽधिके
पचेद् गजपुटेनैव सूतकं याति भस्मताम् १८०
नागवल्लीरसैर्घृष्टः कर्कोटीकन्दगर्भितः
मृन्मूषासम्पुटे पक्वं सूतो यात्येव भस्मताम् १८१
तत्र पारदस्य संक्षिप्तं शोधनं कर्त्तव्यम्
शुद्धसूतसमं कुर्यात्प्रत्येकं गैरिकं सुधीः
इष्टिकां खटिकां तद्वत्स्फटिकां सिन्धुजन्म च १८२
वल्मीकं क्षारलवणं भाण्डरञ्जकमृत्तिकाम्
सर्वाण्येतानि संचूर्य्य वाससा चापि शोधयेत् १८३
एभिश्चूर्णैर्युतं सूतं यावद्यामं विमर्दयेत्
तच्चूर्णसहितं सूतं स्थालीमध्ये परिक्षिपेत् १८४
तस्याः स्थाल्या मुखे स्थालीमपरां धारयेत्समाम्
सवस्त्रकुट्टितमृदा मुद्रयेदनयोर्मुखम् १८५

संशोष्य मुद्रयेद्भूयो भूयः संशोष्य मुद्रयेत्
सम्यग्विशोष्य मुद्रां तां स्थालद्यं चुल्ल्यां विधारयेत् १८६
अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम्
अङ्गारोपरि तद्यन्त्रं रक्षेद्यत्नादहर्निशम् १८७
शनैरुद्घाटयेद्यन्त्रमूर्ध्वस्थालीगतं रसम्
कर्पूरवत्सुविमलं गृह्णीयाद् गुणवत्तरम् १८८
तद्देवकुसुमचन्दनकस्तूरीकुङ्कुमैर्युक्तम्
खादन् हरति फिरङ्गं व्याधिं सोपद्रवं सपदि १८९
विन्दति वह्नेर्दीप्तिं पुष्टिं वीर्यं बलं विपुलम्
रमयति रमणीशतकं रसकर्पूरस्य सेवकः सततम् १९०
शुद्धसूतस्य गृह्णीयाद्भिषग्भागचतुष्टयम्
शुद्धगन्धस्य भागैकं तावत्कृत्रिमगन्धकम् १९१
अथवा पारदस्यार्द्धं शुद्धगन्धकमेव हि
तयोः कज्जलिकां कुर्याद्दिनमेकं विमर्दयेत् १९२
मृत्तिका वाससा सार्द्धं कुट्टयेदतियत्नतः
तथा वारत्रयं सम्यक्काचकूपीं प्रलेपयेत् १९३
मृत्तिकां शोषयित्वा तु कूप्यां कज्जलिकां क्षिपेत्
तां कूपीं बालुकायन्त्रे स्थापयित्वा रसं पचेत् १९४
अग्निं निरन्तरं दद्याद्यावद्दिनचुतष्टयम्
गृह्णीयादूर्ध्वसंलग्नं सिन्दूरसदृशं रसम् १९५
इति सिन्दूररसः
पारदः कृमिकुष्ठघ्नो जयदो दृष्टिकृत्सरः
मृत्युहृच्च महावीर्यो योगवाही ज्वरापहः १९६
स्मृत्योजोरूपदो वृष्यो वृद्धिकृद्धातुवर्द्धनः
षण्ढत्वनाशनः शूरः खेचरः सिद्धिदःपरः १९७
पारदः सकलरोगहा स्मृतः षड्रसो निखिलयोगवाहकः
पञ्चभूतमय एष कीर्त्तितस्तेन तद्गुणगणैर्विराजते १९८
यस्य रोगस्य यो योगस्तेनैव सह योजितः
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् १९९
मेषीक्षीरेण दरदमम्लवर्गैश्च भावितम्

सप्तवारान्प्रयत्नेन शुद्धिमायाति निश्चितम् २००
तिक्तं कषायं कटु हिङ्गुलं स्यान्नेत्रामयघ्नं कफपित्तहारि
हृल्लासकण्डूज्वरकामलाश्च प्लीहामवातौ च गरं निहन्ति २०१
निम्बूरसैर्निम्बपत्ररसैर्वा याममात्रकम्
घृष्ट्वा दरदमूर्ध्वन्तु पातयेत्सूतयुक्तिवत् २०२
तत्रोर्ध्वपिठरीलग्नं गृह्णीयाद्रसमुत्तमम्
शुद्धमेव हि तं सूतं सर्वकर्मसु योजयेत् २०३
अशुद्धो गन्धकः कुर्यात्कुष्ठं पित्तरुजां भ्रमम्
हन्ति वीर्य्यं बलं रूपं तस्माच्छुद्धः प्रयुज्यते २०४
लौहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत्
तप्ते घृते तत्समानं क्षिपेद् गन्धकजं रजः २०५
विद्रुतं गन्धकं दृष्ट्वा तनुवस्त्रे विनिक्षिपेत्
यथा वस्त्राद्विनिःस्रुत्य दुग्धमध्येऽखिलं पतेत्
एवं स गन्धकः शुद्धः सर्वकर्मोचितो भवेत् २०६
गन्धकः कटुकस्तिक्तो वीर्य्योष्णस्तुवरः सरः २०७
पित्तलः कटुकः पाके कण्डूवीसर्पजन्तुजित्
हन्ति कुष्ठक्षयप्लीहकफवातान् रसायनः २०८
पीडां विधत्ते विविधां नराणां कुष्ठं क्षयं पाण्डुगदञ्च कुर्य्यात्
हृत्पार्श्वपीडां च करोत्यसह्यामशुद्धमभ्रं गुरु वह्निहृत्स्यात् २०९
कृष्णाभ्रकं धमेद्वह्नौ ततः क्षीरे विनिक्षिपेत्
भिन्नपत्रं तु तत्कृत्वा तण्डुलीयाम्लयोर्द्रवैः
भावयेदष्टयामं तदेवमभ्रं विशुद्ध्यति २१०
कृत्वा धान्याभ्रकं तथा शोषयित्वाऽथ मर्दयेत्
अर्कक्षीरैर्दिनं खल्वे चक्राकारं च कारयेत् २११
वेष्टयेदर्कपत्रैश्च सम्यग्गजपुटे पचेत्
पुनर्मर्द्यं पुनः पाच्यं सप्तवारान् पुनः पुनः २१२
ततो वटजटाक्वाथैस्तद्वद्देयं पुटत्रयम्
म्रियते नात्र सन्देहः प्रयोज्यं सर्वकर्मसु २१३
तुल्यं घृतं मृताभ्रेण लोहपात्रे विपाचयेत्
घृते जीर्णे तदभ्रन्तु सर्वयोगेषु योजयेत् २१४

पादांशशालिसंयुक्तमभ्रं बद्ध्वाऽथ कम्बले
त्रिरात्रं स्थापयेन्नीरे तत्क्लिन्नं मर्दयेत्करैः २१५
कम्बलाद्गलितं सूक्ष्मं बालुकारहितञ्च यत्
तद् धान्याभ्रमिति प्रोक्तमभ्रमारणसिद्धये २१६
अभ्रं कषायं मधुरं सुशीतमायुष्करं धातुविवर्द्धनञ्च
हन्यात् त्रिदोषं व्रणमेहकुष्ठं प्लीहोदरं ग्रन्थिविषकृमींश्च २१७
रोगान् हन्ति द्रढयति वपुर्वीर्यवृद्धिं विधत्ते
तारुण्याढ्यं रमयति शतं योषितां नित्यमेव
दीर्घायुष्काञ्जनयति सुतान् सिंहतुल्यप्रभावान्
मृत्योर्भीतिं हरति सुतरां सेव्यमानं मृताभ्रम् २१८
अशुद्धं तालमायुर्हत्कफमारुतमेहकृत्
तापस्फोटाङ्गसङ्कोचं कुरुते तेन शोधयेत् २१९
तालकं कणशः कृत्वा तच्चूर्णं काञ्जिके पचेत्
दोलायन्त्रेण यामैकं ततः कूष्माण्डजद्रवैः २२०
तिलतैले पचेद्यामं यामञ्च त्रिफलाजले
एवं यन्त्रे चतुर्यामं पक्वं शुद्ध्यति तालकम् २२१
सदलं तालकं शुद्धं पौनर्नवरसेन तु
खल्वे विमर्दयेदेकं दिनं पश्चाद्विशोधयेत् २२२
ततः पुनर्नवाक्षारैः स्थाल्यामर्द्धं प्रपूरयेत्
तत्र तद्गोलकं कृत्वा पुनस्तेनैव पूरयेत् २२३
आकण्ठं पिठरं तस्य पिधानं धारयेन्मुखे
स्थालद्यं चुल्ल्यां समारोप्य क्रमाद्वह्निं विवर्धयेत् २२४
दिनान्यन्तरशून्यानि पञ्च वह्निं प्रदापयेत् २२५
एवं तन्म्रियते तालं मात्रा तस्यैकरक्तिका
अनुपानान्यनेकानि यथायोग्यं प्रयोजयेत् २२६
हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम्
कण्डूकुष्ठास्यरोगास्त्रकफपित्तकचव्रणान् २२७
तालकं हरते रोगान्कुष्ठमृत्युज्वरापहम्
शोधितं कुरुते कान्तिं वीर्यवृद्धिं तथाऽयुषम् २२८
तालकस्यैव भेदोऽस्ति मनोगुप्तेतदन्तरम्

तालकं त्वतिपीतं स्याद्भवेद्रक्ता मनः शिला २२९
मनःशिला मन्दवलं करोति जन्तुं ध्रुवं शोधनमन्तरेण
मलस्य बन्धं किल मूत्ररोधं सशर्करं कृच्छ्रगदञ्च कुर्य्यात् २३०
पचेत्र्यहमजामूत्रे दोलायन्त्रे मनःशिलाम्
भावयेत्सप्तधा पित्तैरजायाः सा विशुद्ध्यति २३१
गुर्वी मनः शिला वरर्या सरोष्णा लेखनी कटुः
तिक्ता स्निग्धा विषश्वासकासभूतकफास्त्रनुत् २३२
नरमूत्रे च गोमूत्रे सप्ताहं रसकं पचेत्
दोलायन्त्रेण शुद्धः स्यात्ततः कार्येषु योजयेत् २३३
खर्परं कटुकं क्षारं कषायं वामकं लघु
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत्
विषाश्मकुष्ठकण्डूनां नाशनं परमं मतम् २३४
सूर्यावर्त्तो वज्रकन्दः कदली देवदालिका
शिग्रुः कोशातकी वन्ध्या काकमाची च बालकम् २३५
एषामेकरसेनैव त्रिक्षारैर्लवणैः सह
भावयेदम्लवर्गैश्च दिनमेकं प्रयत्नतः २३६
ततः पचेच्च तद्द्रावैर्दोलायन्त्रे दिनं सुधीः
एवं शुद्ध्यन्ति ते सर्वे प्रोक्ता उपरसा हि ये २३७
कङ्कुष्ठं गैरिकं शङ्खः कासीसं टङ्कणं तथा
नीलाञ्जनं शुक्तिभेदाः क्षुल्लकाः सवराटकाः २३८
जम्बीरवारिणा स्विन्नाः क्षालिताः कोष्णवारिणा
शुद्धिमायान्त्यमी योज्या भिषग्भिर्योगसिद्धये २३९
अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां तथा
पाण्डुत्वं पङ्गुलत्वञ्च तस्मात्संशोध्य मारयेत् २४०
कुलत्थकोद्रवक्वाथे दोलायन्त्रे विपाचयेत्
व्याघ्रीकन्दगतं वज्रं त्रिदिनात्तद्विशुद्ध्यति २४१
गृहीत्वाऽह्नि शुभे वज्रंव्याघ्रीकन्दोदरे क्षिपेत्
महिषीविष्ठया लिप्त्वा कारीषाग्नौ विपाचयेत् २४२
त्रियामायां चतुर्यामं यामिन्यन्तेऽश्वमूत्रके
सेचयेत्पाचयेदेवं सप्तरात्रेण शुद्ध्यति २४३

हिंगुसैन्धवसंयुक्ते क्षिपेत्क्वाथे कुलत्थजे
तप्तं तप्तं पुनर्वज्रं भवेद्भस्म त्रिसप्तधा २४४
मेषशृङ्गभुजङ्गास्थिकूर्मपृष्ठाम्लवेतसान् २४५
शशदन्तं समं पिष्ट्वा वज्रीक्षीरेण गोलकम्
कृत्वा तन्मध्यगं वज्रं म्रियते ध्मातमेव हि २४६
आयुः पुष्टिं बलं वीर्यं वर्णं सौख्यं करोति च
सेवितं सर्वरोगघ्नं मृतं वज्रं न संशयः २४७
वज्रवत्सर्वरत्नानि शोधयेन्मारयेत्तथा
शुद्धानां मारितानाञ्च तेषां शृणु गुणानपि २४८
मणयो वीर्यतः शीता मधुरास्तुवरा रसात्
चक्षुष्या लेखनाश्चापि सारका विषहारकाः
धारणात्ते तु मङ्गल्या ग्रहदृष्टिहरा अपि २४९
सिन्धुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा
यत्पार्श्वे न तरोर्वृद्धिर्वत्सनाभः स भाषितः २५०
गोमूत्रे त्रिदिनं स्थाप्यं विषं तेन विशुद्ध्यति
रक्तसर्षपतैलाक्ते तथा धार्यञ्च वाससि २५१
ये गुणा गरले प्रोक्तास्ते स्युर्हीना विशोधनात्
तस्माद्विषं प्रयोगे तु शोधयित्वा प्रयोजयेत् २५२
विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च
आग्नेयं वातकफहृद्योगवाहि मदावहम् २५३
तदेव युक्तियुक्तन्तु प्राणदायि रसायनम्
योगवाहि परं वातश्लेष्मजित्सन्निपातहृत् २५४
अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरकः
गुञ्जाऽहिफेनो धत्तूरः सप्तोपविषजातयः २५५
गुणहीनं भवेद्वर्षादूर्ध्वं तद्रूपमौषधम्
मासद्वयात्तथा चूर्णं लभते हीनवीर्यताम् २५६
हीनत्वं गुटिकालेहौ लभेते वत्सरं यदि
हीनाः स्युर्घृततैलाद्याश्चतुर्मासाधिकास्तथा २५७
घृतमब्दात्परं पक्वं हीनवीर्यत्वमाप्नुयात्
तैलं पक्वमपक्वञ्च चिरस्थायि गुणाधिकम् २५८

ओषध्यो लघुपाकाः स्युर्निर्वीर्या वत्सरात्परम्
पुराणाः स्युर्गुणैर्युक्ता आसवा धातवो रसाः २५९

इति श्रीमिश्रलटकन तनय श्रीमिश्रभाव विरचिते भावप्रकाशे
परिभाषादिप्रकरणे
तृतीयं धात्वादिशोधनमारणविधिप्रकरणं समाप्तम् ३

अथ चतुर्थं स्नेहपानविधिप्रकरणम् ४

स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा
मज्जा च तं पिवेन्मर्त्यः किञ्चिदभ्युदिते रवौ १
स्थावरो जङ्गमश्चैव द्वियोनिः स्नेह उच्यते
तिलतैलं स्थावरेषु जङ्गमेषु घृतं वरम्
द्वाभ्यां त्रिभिश्चतुर्भिर्वा यमकस्त्रिवृतो महान् २
पिबेत् त्र्यहं चतुरहं पञ्चाहं षडहानि वा ३
दोषकालवयोवह्निबलान्यालोक्य योजयेत्
हीनाङ्गमध्यमां ज्येष्ठां मात्रां स्नेहस्य बुद्धिमान् ४
अमात्रया तथाऽकाले मिथ्याऽहारविहारतः
स्नेहः करोति शोथार्शस्तन्द्रानिद्राविसंज्ञताः ५
देया दीप्ताग्नये मात्रा स्नेहस्यैकपलोन्मिता
मध्यमाय त्रिकर्षा स्याज्जघन्याय द्विकार्षिकी ६
अथवा स्नेहमात्राः स्युस्तिस्रोऽन्या सर्वसम्मताः
अहोरात्रेण महती जीर्यत्यह्नि तु मध्यमा
जीर्यत्यल्पा दिनार्द्धेन सा विज्ञेया सुखावहा ७
अल्पा स्याद्दीपनी वृष्या स्वल्पदोषे प्रपूजिता ८
मध्यमा स्नेहनी ज्ञेया वृंहणी भ्रमहारिणी
ज्येष्ठा कुष्ठविषोन्मादग्रहापस्मारनाशिनी ९
या मात्रा प्रथमे यामे गते जीर्यति वासरे
सा मात्रा दीपयत्यग्निमल्पदोषे च पूजिता १०
या मात्रा वासरस्यार्द्धे व्यतीते परिजीर्यति
सा वृष्या बृंहणी च स्यान्मध्यदोषे प्रपूजिता ११
या मात्रा चरमे यामे स्थितेऽह्न परिजीर्यति

सा मात्रा स्नेहनी ज्ञेया बहुदोषेषु पूजिता १२
केवलं पैत्तिके सर्पिर्वातिके लवणान्वितम्
देयं वहुकफे वह्निव्योषक्षारसमन्वितम् १३
रूक्षक्षतविषार्त्तानां वातपित्तविकारिणाम्
हीनमेधास्मृतीनां च सर्पिष्पानं प्रशस्यते १४
कृमिकोष्ठानिलाविष्टाः प्रवृद्धकफमेदसः
पिबेयुस्तैलसात्म्याश्च तैलं दाढर्यार्थिनस्तु ये १५
व्यायामकर्षिताः शुष्करेतोरक्ता महारुजः
महाग्निमारुतप्राणा वसायोग्या नराः स्मृताः १६
क्रूराशयाः क्लेशसहा वातार्त्ता दीप्तवह्नयः
मज्जानञ्च पिबेयुस्ते सर्पिर्वा सर्वतो हितम् १७
शीतकाले दिवा स्नेहमुष्णकाले पिबेन्निशि
वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा १८
नस्याभ्यञ्जनगण्डूषमूर्ध्वकर्णाक्षितर्पणे
तैलं घृतं वा युञ्जीत दृष्ट्वा दोषबलाबलम् १९
घृते कोष्णं जलं पेयं तैले यूषः प्रशस्यते
वसामज्ज्ञोः पिबेन्मण्डमनुपानं सुखावहम् २०
स्नेहद्विषः शिशून्वृद्धान्सुकुमारान्कृशानपि
तृष्णालुकानुष्णकाले सह भक्तेन पाययेत् २१
सर्पिष्मती बहुतिला यवागूः स्वल्पतण्डुला
सुखोष्णा सेव्यमाना तु सद्यः स्नेहनकारिणी २२
शर्कराचूर्णसंयुक्ते दोहनस्थे घृते तु गाम्
दुग्ध्वा क्षीरं पिबेद्रूक्षः सद्यः स्नेहनमुत्तमम् २३
मिथ्याऽचाराद् बहुत्वाच्च यस्य स्नेहो न जीर्यति
विष्टभ्य वाऽपि जीर्येत वारिणोष्णेन वामयेत् २४
स्नेहस्याजीर्णशङ्कायां पिबेदुष्णोदकं नरः
तेनोद्गारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा २५
स्नेहेन पैत्तिकस्याग्निर्यदा तीक्ष्णतरीकृतः
तदाऽस्योदीरयेत् तृष्णां विषमां तस्य पाययेत्
शीतलं पायसं तेन तृष्णा तस्य प्रशाम्यति २६

अजीर्णी वर्जयेत्स्नेहमुदरी तरुणज्वरी
दुर्बलोऽरोचकी स्थूलो मूर्च्छालो मेहपीडितः २७
दत्तवस्तिविरिक्तश्च वान्तस्तृष्णाश्रमान्वितः
अकालप्रसवा नारी दुर्दिने च विवर्जयेत् २८
स्वेद्यसंशोध्यमद्यस्त्रीव्यायामासक्तचित्तकाः २९
वृद्धबालकृशा रूक्षाः क्षीणास्त्राः क्षीणरेतसः
वातार्त्तास्तिमिरार्त्ता ये तेषां स्नेहनमुत्तमम् ३०
वातानुलोम्यं दीप्ताग्निर्वर्चः स्निग्धमसंहतम्
मृदुस्निग्धाङ्गताऽग्लानिः स्नेहद्वेषोऽथ लाघवम्
विमलेन्द्रियता सम्यक् स्निग्धे रूक्षे विपर्ययः ३१
भक्तद्वेषो मुखस्त्रावो गुदे दाहः प्रवाहिका
तन्द्राऽतीसारपाण्डुत्वं भृशं स्निग्धस्य लक्षणम् ३२
रूक्षस्य स्नेहनं स्नेहैरतिस्निग्धस्य रूक्षणम्
श्यामाकचणकाद्यैश्च तक्रपिण्याकसक्तुभिः ३३
दीप्ताग्निः शुद्धकोष्ठश्च पुष्टधातुर्दृढेन्द्रियः
निर्जरो बलवर्णाढ्यः स्नेहसेवी भवेन्नरः ३४
स्नेहे व्यायामसंशीतवेगाघातप्रजागरान्
दिवास्वप्नमभिष्यन्दि रूक्षान्नञ्च विवर्जयेत् ३५

इति श्रीमिश्रलटकन तनय श्रीमिश्रभाव विरचिते भावप्रकाशे
परिभाषादिप्रकरणे
चतुर्थं स्नेहपानविधिप्रकरणं समाप्तम् ४

अथ पञ्चमं पञ्चकर्मविधिप्रकरणम् ५

प्रथमं वमनं पश्चाद्विरेकश्चानुवासनम्
एतानि पञ्चकर्माणि निरूहो नावनं तथा १
शरत्काले वसन्ते च प्रावृट्काले च देहिनाम्
वमनं रेचनं चैव कारयेत्कुशलो भिषक् २
बलवन्तं कफव्याप्तं हृल्लासादिनिपीडितम्
तथा वमनसात्म्यञ्च धीरचित्तञ्च वामयेत् ३
विषदोषे स्तन्यरोगे मन्देऽग्नौ श्लीपदेऽर्बुदे

हृद्रोगे कुष्ठवीसर्पमेहाजीर्णभ्रमेषु च ४
विदारिकाऽपचीकासश्वासपीनसवृद्धिषु
अपस्मारे ज्वरोन्मादे तथा रक्तातिसारिषु ५
नासाताल्वोष्ठपाकेषु कर्णस्रावेऽधिजिह्वके
गलशुण्डयामतीसारे पित्तश्लेष्मगदे तथा
मेदोगदेऽरुचौ चैव वमनं कारयेद्भिषक् ६
न वामनीयस्तिमिरी न गुल्मी नोदरी कृशः
नातिवृद्धो गर्भिणी च न स्थूलो न क्षतातुरः ७
मदार्त्तो बालको रूक्षः क्षुधितश्च निरूहितः
उदावर्त्तर्यूर्ध्वरक्ती च दुश्छर्द्यः केवलानिली ८
पाण्डुरोगी कृमिव्याप्तः पवनात्स्वरघातवान् ९
एतेऽप्यजीर्णव्यथिता वाम्या ये विषपीडिताः
कफव्याप्ताश्च ते वाम्या मधुकक्वाथपानतः १०
सुकुमारं कृशं बालं वृद्धं भीरुञ्च वामयेत्
पाययित्वा यवागूं वा क्षीरतक्रदधीनि च ११
असात्म्यैः श्लेष्मलैर्भोज्यैर्दोषानुत्क्लेश्य देहिनाम्
स्निग्धस्विन्नाय वमनं दत्तं सम्यक्प्रवर्त्तते १२
वमनेषु च सर्वेषु सैन्धवं मधु वा हितम्
वीभत्सं वमनं दद्याद्विपरीतं विरेचनम् १३
क्वाथद्रव्यस्य कुडवं श्रपयित्वा जलाढके
अर्द्धभागावशिष्टञ्च वमनेष्ववचारयेत् १४
क्वाथपाने नवप्रस्था ज्येष्ठा मात्रा प्रकीर्त्तिता
मध्यमा षण्मिता प्रोक्ता त्रिप्रस्था च कनीयसी १५
वमने च विरेके च तथा शोणितमोक्षणे
अर्द्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः १६
कल्कचूर्णावलेहानां त्रिपलं मात्रयोत्तमम्
मध्यमं द्विपलं विद्यात्कनीयस्तु पलं भवेत् १७
वमने चाष्टवेगाःस्युः पित्तान्ता उत्तमास्तु ते
षड् वेगा मध्यमा वेगाश्चत्वारस्त्वपरे मताः १८
कफं कटुकतीक्ष्णोष्णैः पित्तं स्वादुहिमैर्जयेत्

सुस्वादुलवणाम्लोष्णैः संसृष्टं वायुना कफम् १९
कृष्णां राठफलं सिन्धुं कफे कोष्णजलैः पिबेत्
पटोलवासानिम्बांश्च पित्ते शीतजलैः पिबेत् २०
सश्लेष्मवातपीडायां सक्षीरं मदनं पिबेत्
अजीर्णे कोष्णपानीयं सिन्धुं पीत्वा वमेत्सुधीः २१
वमनं पाययित्वा तु जानुमात्रासने स्थितम्
कण्ठमेरण्डनालेन स्पृशन्तं वामयेद्भिषक् २२
प्रसेको हृद्ग्रहः कोठः कण्डूर्दुश्छर्दिते भवेत्
अतिवान्ते भवेत्तृष्णा हिक्कोद्गारो विसंज्ञिता २३
जिह्वानिःसरणं चाक्ष्णोर्व्यावृत्तिर्हनुसंहतिः
रक्तच्छर्दिः ष्ठीवनञ्च कण्ठपीडा च जायते २४
वमनस्यातियोगे तु मृदु कुर्याद्विरेचनम्
वमनेन प्रविष्टायां जिह्वायां कवलग्रहाः
स्निग्धाम्ललवणैर्युक्तैर्घृतक्षीररसैर्हिताः २५
फलान्यम्लानि खादेयुस्तस्य चान्येऽग्रतो नराः
निःसृतान्तु तिलद्राक्षाकल्कलिप्तां प्रवेशयेत् २६
व्यावृत्तेऽक्ष्णि घृताभ्यक्तेपीडनञ्च शनैः शनैः
हनुमोक्षे स्मृतः स्वेदो नस्यञ्च श्लेष्मवातहृत् २७
रक्तपित्तविधानेन रक्तष्ठीवमुपाचरेत्
धात्रीरसाञ्जनोशीरलाजाचन्दनवारिभिः २८
मन्थंकृत्वा पाययेच्च सघृतं क्षौरद्रशर्करम्
शाम्यन्त्यनेन तृष्णाऽद्या रोगाश्छर्दिसमुद्भवाः २९
हृत्कण्ठशिरसां शुद्धिर्दीप्ताग्नित्वञ्च लाघवम्
कफपित्तविनाशश्च सम्यग्वान्तस्य लक्षणम् ३०
ततोऽपराह्णे दीप्ताग्निं मुद्गषष्टिकशालिभिः
हृद्यैश्च जाङ्गलरसैः कृत्वा यूषञ्च भोजयेत् ३१
तन्द्रा निद्राऽस्यदौर्गन्ध्यं कण्डूश्च ग्रहणी विषम्
सुवान्तस्य न पीडायै भवन्त्येते कदाचन ३२
अजीर्णं शीतपानीयं व्यायामं मैथुनं तथा
स्नेहाभ्यङ्गञ्च रोषञ्च दिनमेकं सुधीस्त्यजेत् ३३

स्निग्धस्विन्नाय वान्ताय दद्यात्सम्यग्विरेचनम्
अवान्तस्य त्वधःस्रस्तो ग्रहणीं छादयेत्कफः ३४
मन्दाग्निं गौरवं कुर्याज्जनयेद्वा प्रवाहिकाम्
अथवा पाचनैरामं वलासं परिपाचयेत् ३५
ऋतौ वसन्ते शरदि देहशुद्धौ विरेचयेत्
अन्यदाऽत्ययिके कार्ये शोधनं शीलयेद् बुधः ३६
पित्ते विरेचनं युञ्ज्यादामोद्भूते गदे तथा
उदरे च तथाऽध्माने कोष्ठशुद्धौ विशेषतः ३७
दोषाः कादाचित्कुप्यन्ति जिता लङ्घनपाचनैः
शोधनैः शोधिता ये तु न तेषां पुनरुद्भवः ३८
बालो वृद्धो भृशं स्निग्धः क्षतक्षीणो भयान्वितः
श्रान्तस्तृषाऽत्त स्थूलश्च गर्भिणी च नवज्वरी ३९
नवप्रसूता नारी च मन्दाग्निश्च मदात्ययी
शल्यार्दितश्च रूक्षश्च न विरेच्या विजानता ४०
जीर्णज्वरी गरव्याप्तो वातरोगी भगन्दरी
अर्शः पाण्डूदरग्रन्थिहृद्रोगारुचिपीडिताः ४१
योनिरोगप्रमेहार्त्ता गुल्मप्लीहव्रणार्दिताः
विद्रधिच्छर्दिविस्फोटविसूचीकुष्ठसंयुताः ४२
कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विताः
प्लीहशोथाक्षिरोगार्त्ताः कृमिक्षारानिलार्दिताः ४३
शूलिनो मूत्रघातार्त्ता विरेकार्हा नरा मताः ४४
बहुपित्तो मृदुः कोष्ठो बहुश्लेष्मा च मध्यमः
बहुवातःक्रूरकोष्ठो दुर्विरेच्यः स कथ्यते ४५
मृद्वी मात्रा मृदौ कोष्ठे मध्यकोष्ठे च मध्यमा
क्रूरे तीक्ष्णा मता द्रव्यैर्मृदुमध्यमतीक्ष्णकैः ४६
मृदुर्द्राक्षापयश्चञ्चुतैलैरपि विरिच्यते
मध्यमस्त्रिवृतातिक्तकाराजवृक्षैर्विरिच्यते
क्रूरः स्नुक्पयसा हेमक्षीरीदन्तीफलादिभिः ४७
मात्रोत्तमा विरेकस्य त्रिंशद्वेगैः कफान्तिका
वेगैर्विंशतिभिर्मध्या हीनोक्ता दशवेगिका ४८

द्विपलं श्रेष्ठमाख्यातं मध्यमं च पलं भवेत्
पलार्द्धं च कषायाणां कनीयस्तु विरेचनम् ४९
कल्कमोदकचूर्णानां कर्षो मध्वाज्यलेहतः
कर्षद्वयं पलं वाऽपि वयोरोगाद्यपेक्षया ५०
पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादिभिः पिबेत्
त्रिफलाक्वाथगोमूत्रैः पिबेद् व्योषं कफार्दितः ५१
त्रिवृत्सैन्धवशुण्ठीनां चूर्णमम्लैः पिबन्नरः
वातार्दितो विरेकाय जाङ्गलानां रसेन वा ५२
एरण्डतैलं त्रिफलाक्वाथेन द्विगुणेन वा
युक्तं पीतं पयोभिर्वा न चिरेण विरिच्यते ५३
त्रिवृता कौटजं बीजं पिप्पली विश्वभेषजम्
समृद्वीकारसं क्षौद्रं वर्षाकाले विरेचनम् ५४
त्रिवृद्दुरालभामुस्तशर्करोदीच्यचन्दनम्
द्राक्षाऽम्बुना सयष्ट्याह्वं शीतलञ्च घनात्यये ५५
त्रिवृता चित्रकं पाठामजाजीं सरलं वचाम्
हेमक्षीरीं हेमन्ते तु चूर्णमुष्णाम्बुना पिबेत् ५६
पिप्पलद्यं नागरं सिन्धुं श्यामां त्रिवृतया सह
लिह्यात्क्षौद्रेण शिशिरे वसन्ते च विरेचनम् ५७
त्रिवृता शर्करा तुल्या ग्रीष्मकाले विरेचनम् ५८
अथाभयादिमोदकः
अभया मरिचं शुण्ठीविडङ्गामलकानि च
पिप्पली पिप्पलीमूलं त्वक्पत्रं मुस्तमेव च ५९
एतानि समभागानि दन्ती तु त्रिगुणा भवेत्
त्रिवृताऽष्टगुणा ज्ञेया षड्गुणा चात्र शर्करा ६०
मधुना मोदकान्कृत्वा कर्षमात्रान्प्रमाणतः
एकैकं भक्षयेत् प्रातः शीतज्ञानु पिबेज्जलम् ६१
तावद्विरिच्यते जन्तुर्यावदुष्णं न सेवते
पानाहारविहारेषु भवेन्नियन्त्रणः सदा ६२
विषमज्वरमन्दाग्निपाण्डुकासभगन्दरान्
दुर्नामकुष्ठगुल्मार्शोगलगण्डोदरभ्रमान् ६३

विदाहप्लीहमेहांश्च यक्ष्माणं नयनामयान्
वातरोगांस्तथाऽध्मानं मूत्रकच्छ्रादि चाश्मरीम् ६४
पृष्ठपार्श्वोरुजघनजङ्घोदररुजं जयेत्
स्नेहाभ्यङ्गश्च रोषञ्च दिनमेकं सुधीस्त्यजेत् ६५
सततं शीलनादेव पलितानि प्रणाशयेत्
अभयामोदका ह्येते रसायनवराः स्मृताः ६६
पीत्वा विरेचनं शीतजलैः संसिच्य चक्षुषी
सुगन्धि किञ्चिदाघ्राय ताम्बूलं शीलयेद् बुधः ६७
निर्वातस्थो न वेगांश्च धारयेन्न शयीत च
शीताम्बु न स्पृशेत्क्वापि कोष्णनीरं पिबेन्मुहुः ६८
वलासौषधपित्तानि वायुर्वान्ते यथा व्रजेत्
रेकात्तथा मलं पित्तं भेषजञ्च कफो व्रजेत् ६९
दुर्विरिक्तस्य नाभेस्तु स्तब्धता कुक्षिशूलरुक्
पुरीषवातसङ्गश्च कण्डूमण्डलगौरवम् ७०
विदाहोऽरुचिराध्मानं भ्रमश्छर्दिश्च जायते
तं पुनः पाचनैः स्नेहैः पक्त्वा स्निग्धं तु रेचयेत्
तेनास्योपद्रवा यान्ति दीप्ताग्निर्लघुता भवेत् ७१
विरेकस्यातियोगेन मूर्च्छा भ्रंशो गुदस्य च
शूलं कफातियोगः स्यान्मांसधावनसन्निभम् ७२
मेदोनिभं जलाभासं रक्तश्चापि विरिच्यते
तस्य शीताम्बुभिः सिक्त्वा शरीरं तण्डुलाम्बुभिः ७३
मधुमिश्रैस्तथा शीतैः कारयेद्वमनं मृदु
सहकारत्वचः कल्को दध्ना सौवीरकेण वा ७४
पिष्ट्वा नाभिप्रलेपेन हन्त्यतीसारमुल्वणम्
सौवीरं तु यवैरामैः पक्वैर्वा निस्तुषीकृतैः ७५
अजाक्षीरं रसञ्चापि वैष्किरं हारिणं तथा
शालिभिः षष्टिकैस्तुल्यैर्मसूरैर्वापि भोजयेत् ७६
शीतैः संग्राहिभिर्द्रव्यैः कुर्यात्संग्रहणं भिषक्
लाघवे मनसस्तुष्टावनुलोमं गतेऽनिले ७७
सुविरिक्तं नरं ज्ञात्वा पाचनं पाययेन्निशि

इन्द्रियाणां बलं बुद्धे प्रसादो वह्निदीप्तता ७८
धातुस्थैर्यं वयःस्थैर्यं भवेद्रेचनसेवनात्
प्रवातसेवां शीताम्बुस्नेहाभ्यङ्गमजीर्णताम् ७९
व्यायामं मैथुनञ्चैव न सेवेत विरेचितः
शालिषष्टिकमुद्गाद्यैर्यवागूं भोजयेत्कृताम् ८०
जङ्गालविष्किराणां वा रसैः शाल्योदनं हितम् ८१
वस्तिर्द्विधाऽनुवासाख्यो निरूहश्च ततः परम्
यः स्नेहो दीयते स स्यादनुवासन नामकः ८२
कषायक्षीरतैलैर्यो निरूहः स निगद्यते
वस्तिभिर्दीयते यस्मात्तस्माद्वस्तिरिति स्मृतः ८३
तत्रानुवासनाख्यो हि वस्तिर्यः सोऽत्र कथ्यते
अनुवासनभेदश्च मात्रावस्तिरुदीरितः ८४
पलद्वयं तस्य मात्रा तस्मादर्द्धाऽपि वा भवेत्
अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिली ८५
नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलस्तथोदरी
नास्थाप्या नानुवास्याश्च जीर्णोन्मादतृडर्दिताः
शोथमूर्च्छाऽरुचिभयश्वासकासक्षयातुराः ८६
नेत्रं कार्यं सुवर्णादिधातुभिर्वृक्षवेणुभिः
नलैर्दन्तैर्विषाणाग्रैर्मणिभिर्वा विधीयते ८७
एकवर्षात्तु षड्वर्षाद्यावन्मानं षडङ्गुलम्
ततो द्वादशकं यावन्मानं स्यादष्टसम्मितम् ८८
ततः परं द्वादशभिरङ्गुलैर्नेत्रदीर्घता
मुद्गच्छिद्रं कलायाभं छिद्रं कोलास्थिसन्निमम् ८९
यथा संख्यं भवेन्नेत्रं श्लक्ष्णं गोपुच्छसन्निभम्
गोपुच्छसन्निमं मूले स्थूलं तस्मात् क्रमात् कृशम् ९०
आतुराङ्गुष्ठमानेन मूले स्थूलं निधीयते
कनिष्ठिकापरीणाहमग्रे च गुटिकामुखम् ९१
तन्मूले कर्णिके द्वे च कार्ये भागाच्चतुर्थकात् ९२
योजयेत्तत्र वस्तिञ्च बन्धद्वयविधानतः
मृगाजशूकरगवां महिषस्यापि वा भवेत् ९३

मूत्रकोषस्य वस्तिस्तु तदलाभे तु चर्मणः
कषायरक्तः स मृदुर्वस्तिः स्निग्धो दृढो हितः ९४
व्रणवस्तेस्तु नेत्रं स्याच्छ्लक्ष्णमष्टाङ्गुलोन्मितम्
मुद्गच्छिद्रं गृध्रपक्षनलिकापरिणाहि च ९५
शरीरोपचयं वर्णं बलमारोग्यमायुषः
कुरुते परिवृद्धिञ्च वस्तिः सम्यगुपासितः ९६
दिवा शीते वसन्ते च स्नेहवस्तिः प्रदीयते
ग्रीष्मवर्षाशरत्काले रात्रौ स्यादनुवासनम् ९७
न चातिस्निग्धमशनं भोजयित्वाऽनुवासयेत्
मदं मूर्च्छां च जनयेद् द्विधा स्नेहः प्रयोजितः ९८
रूक्षभुक्तवतोऽत्यन्तं बलं वर्णञ्च हापयेत्
युक्तस्नेहमतो जन्तुं भोजयित्वाऽनुवासयेत् ९९
हीनमात्रावुभौ वस्ती नातिकार्यकरौ स्मृतौ
अतिमात्रौ तथाऽनाहक्लमातीसारकारकौ १००
उत्तमास्यात्पलैः षड्भिर्मध्यमा स्यात्पलैस्त्रिभिः
पलाध्यर्द्धेन हीनास्यादुक्ताः मात्राऽनुवासने १०१
शताह्वासैन्धवाभ्याञ्च देयं स्नेहे च चूर्णकम्
तन्मात्रोत्तममध्यान्त्या षट्चतुर्द्वयमाषकैः १०२
विरेचनात्सप्तरात्रे गते जातबलाय च
भुक्तान्नायानुवास्याय वस्तिर्देयोऽनुवासनः १०३
तथाऽनुवास्यं स्वभ्यक्तमुष्णाम्बुस्वेदितं शनैः
भोजयित्वा यथाशास्त्रं कृतचङ्क्रमणं ततः
उत्सृष्टानिलविण्मूत्रं योजयेत्स्नेहबस्तिना १०४
सुप्तस्य वामपार्श्वेन वामजङ्घाप्रसारिणः
कुञ्चितापरजङ्घस्य नेत्रं स्निग्धे गुदे न्यसेत् १०५
बद्धं वस्तिमुखं सूत्रैर्वामहस्तेन धारयेत्
पीडयेद्दक्षिणेनैव मध्यवेगेन धीरधीः १०६
जृम्भाकासक्षवादींश्च वस्तिकाले न कारयेत्
त्रिंशन्मात्रामितः कालः प्रोक्तो वस्तेस्तु पीडने १०७
ततः प्रणिहिते स्नेहे उत्तानो वाक्शतं भवेत्

प्रसारितः सर्वगात्रैर्यथावीर्यं प्रसर्पति १०८
स्वजानुनः करावर्त्तं कुर्याच्छोटिकया पुनः
एषा मात्रा भवेदेका सर्वत्रैवैष निश्चयः १०९
निमेषोन्मेषणं पुंसामङ्गुल्या छोटिकाऽथ वा
गुर्वक्षरोच्चारणं वा स्यान्मात्रेयं स्मृता बुधैः ११०
ताडयेत्तलयोरेनं त्रींस्त्रीन्वाराञ्छनैः शनैः
स्फिजोश्चैव तथा श्रोणीं शय्याञ्चैवोत्क्षपेत्ततः १११
स्फिजोश्चैनं स्वपाणिभ्यां पूर्ववत्ताडयेद् बुधः ११२
शय्याञ्च पादतस्तस्य त्रीन्वारानुत्क्षपेत्ततः
जाते विधाने तु ततः कुर्यान्निद्रां यथासुखम् ११३
सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु
उपद्रवं विना शीघ्रं स सम्यगनुवासितः ११४
जीर्णान्नमथ सायाह्ने स्नेहे प्रत्यागते पुनः
लघ्वन्नं भोजयेत्कामं दीप्ताग्निस्तु नरो यदि ११५
अनुवासिताय दातव्यमितरेऽह्नि सुखोदकम्
धान्यशुण्ठीकषायं वा स्नेहव्यापत्तिनाशनम् ११६
अनेनविधिना षड्वा सप्त चाष्टौ नवापि वा
विधेया वस्तयस्तेषामन्ते चैव निरूहणम् ११७
दत्तस्तु प्रथमो वस्तिः स्नेहयेद्वस्तिवङ्क्षणौ
सम्यग्दत्तो द्वितीयस्तु मूर्द्धस्थमनिलं जयेत् ११८
बलं वर्णश्च जनयेत्तृतीयस्तु प्रयोजितः
चतुर्थपञ्चमौ दत्तौ स्नेहयेतां रसासृजी ११९
षष्ठो मांसं स्नेहयति सप्तमो मेद एव च
अष्टमो नवमश्चापि मज्जानञ्च यथाक्रमम् १२०
एवं शुक्रगतान्दोषान्द्विगुणः साधु साधयेत् १२१
अष्टादशाष्टादशकाद्दिनाद्यो ना निषेवते
स कुञ्जरबलोऽश्वस्य जवतुल्योऽमरप्रभः १२२
रूक्षाय बहुवाताय स्नेहवस्तिं दिने दिने
दद्याद्वैद्यस्तथाऽन्येषामग्न्याबाधभयात् त्र्यहात्
स्नेहोऽल्पमात्रो रूक्षाणां दीर्घकालमनत्ययः १२३

तथा निरूहः स्निग्धानामल्पमात्रः प्रशस्यते
अथ वा यस्य तत्कालं स्नेहो निर्याति केवलः
तस्याप्यल्पतरो देयो न हि स्निग्धेऽवतिष्ठते १२४
अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः
तदाऽङ्गसदनध्माने शूलं श्वासश्च जायते १२५
पक्वाशये गुरुत्वञ्च तत्र दद्यान्निरूहणम्
तीक्ष्णं तीक्ष्णौषधैर्युक्तं फलवर्त्तिमथापि वा १२६
यथाऽनुलोमनो वायुर्मलः स्नेहश्च जायते
तथा विरेचनं दद्यात्तीक्ष्णं नस्यञ्च शस्यते १२७
यस्य नोपद्रवं कुर्यात्स्नेहवस्तिरनिःसृतः
सर्वोऽल्पो व्यावृतो रौक्ष्यादुपेक्ष्यः स विजानता १२८
अनायातं त्वहोरात्रे स्नेहं संशोधनैर्हरेत्
स्नेहबस्तावनायाते नान्यः स्नेहो विधीयते १२९
गुडूच्येरण्डपूतीकभार्ङ्गीवृषकरौहिषम्
शतावरीसहचरौ काकनासां पलोन्मिताम् १३०
यवमाषातसीकोलकुलत्थान्प्रसृतोन्मितान्
चतुर्द्रोणेऽम्भसः पक्त्वा द्रोणशेषेण तेन च १३१
पचेत्तैलाढकं सर्वैर्जीवनीयैः पलोन्मितैः
अनुवासनमेतद्धि सर्ववातविकारनुत् १३२
षटसप्ततिव्यापदस्तु जायन्ते बस्तिकर्मणः
दूषितात् समुदायेन ताश्चिकित्स्यास्तु सुश्रुतात् १३३
पानाहारविहाराश्च परिहाराश्च कृत्स्नशः
स्नेहपानसमाः कार्य्या नात्र कार्या विचारणा १३४
निरूहवस्तिर्बहुधा भिद्यते कारणान्तरः
तैरेव तस्य नामानि कृतानि मुनिपुङ्गवैः १३५
निरूहस्यापरं नाम प्रोक्तमास्थापनं बुधैः
स्वस्थाने स्थापनाद्दोषधातूनां स्थापनं मतम् १३६
निरूहस्य प्रमाणं तु प्रस्थं पादोत्तरं परम्
मध्यमं प्रस्थमुद्दिष्टं हीनञ्च कुडवास्त्रयः १३७
अतिस्निग्धोऽक्लिष्टदोषः क्षतोरस्कः कृशस्तथा

आध्मानच्छर्दिहिक्काऽशकासश्वासप्रपीडितः १३८
गुदशोफातिसारार्त्तो विसूचीकुष्ठसंयुतः
गर्भिणी मधुमेही च नास्थाप्यश्च जलोदरी १३९
वातव्याधावुदावर्ते वातासृग्विषमज्वरे
मूर्च्छातृष्णोदरानाहमूत्रकृच्छ्राश्मरीषु च १४०
वृद्ध्यसृग्दरमन्दाग्निप्रमेहेषु निरूहणम्
शूलेऽम्लपित्ते हृद्रोगे योजयेद्विधिवद् बुधः १४१
उत्सृष्टानिलविण्मूत्रं स्निग्धं स्विन्नमभोजितम्
मध्याह्ने गृहमध्ये च यथायोग्यं निरूहयेत् १४२
स्नेहवस्तिविधानेन बुधः कुर्यान्निरूहणम् १४३
जाते निरूहे च ततो भवेदुत्कटकासनः
तिष्ठेन्मुहूर्त्तमात्रन्तु निरूहागमनेच्छया १४४
अनायातं मुहूर्त्तं तु निरूहं शोधनैर्हरेत्
निरूहैरेव मतिमान्क्षारसूत्राम्लसैन्धवैः १४५
यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः
लाघवं चोपजायेत सुनिरूहं तमादिशेत् १४६
यस्य स्याद्वस्तिरत्यल्पवेगो हीनमलानिलः
मूर्च्छाऽत्तिजाड्यारुचिमान्दुर्निरूहं तमादिशेत् १४७
विविक्तता मनस्तुष्टिः स्निग्धता व्याधिनिग्रहः
आस्थापनस्नेहवस्त्योः सम्यग्दाने तु लक्षणम् १४८
अनेन विधिना युञ्ज्यान्निरूहं वस्तिदानवित्
द्वितीयं वा तृतीयं वा चतुर्थं वा यथोचितम् १४९
सस्नेह एकः पवने पित्ते द्वौ पयसा सह
कषायकटुमूत्राद्याः कफेऽत्युष्णास्त्रयो हिताः १५०
पित्तश्लेष्मानिलाविष्टं क्षीरयूषरसैः क्रमात्
निरूढं भोजयित्वा च ततस्तमनुवासयेत् १५१
सुकुमारस्य वृद्धस्य बालस्य च मृदुर्हितः
वस्तिस्तीक्ष्णः प्रयुक्तस्तु तेषां हन्याद्बलायुषी १५२
दद्यादुत्क्लेशनं पूर्वं मध्ये दोषहरं ततः
पश्चात्संशमनीयञ्च दद्याद्बस्तिं विचक्षणः १५३

एरण्डबीजं मधुकं पिप्पली सैन्धवं वचा
हपुषाफलकल्कश्च वस्तिरुत्क्लेशनः स्मृतः १५४
शताह्वा मधुकं बिल्वं कौटजं फलमेव च
सकाञ्जिकः सगोमूत्रो वस्तिर्दोषहरः स्मृतः १५५
प्रियङ्गुर्मधुकं मुस्ता तथैव च रसाञ्जनम्
सक्षीरः शस्यते वस्तिर्दोषाणां शमनः स्मृतः १५६
त्रिफलाक्वाथगोमूत्रक्षौद्रक्षारसमायुतः
ऊषकादिप्रतीवापैर्वस्तयोलेखनाः स्मृताः १५७
बृंहणद्रव्यनिक्वाथैः कल्कैर्मधुरकैर्युताः
सर्पिर्मांसरसोपेता वस्तयो बृंहणाः स्मृताः १५८
बदर्यैरावतीशेलुशाल्मलीपुष्पजाङ्कुराः
क्षीरसिद्धाःक्षौद्रयुक्ता नाम्ना पिच्छलसंज्ञिताः १५९
अजोरभ्रैणरुधिरैर्युक्ता देया विचक्षणैः
मात्रा पिच्छिलवस्तीनां पलैर्द्वादशभिर्मता १६०
दत्त्वादौ सैन्धवस्याक्षं मधुनः प्रसृतिद्वयम्
विनिर्मथ्य ततो दद्यात्स्नेहस्य प्रसृतित्रयम् १६१
एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत्
सम्मूर्च्छिते कषायन्तु चतुः प्रसृतिसम्मितम् १६२
गृह्णीयाच्च तदा वाऽल्पमन्ते द्विप्रसृतोन्मितम्
क्षिप्त्वा विमथ्य दद्याच्च निरूहं कुशलो भिषक् १६३
एवं प्रकल्पितो वस्तिर्द्वादशप्रसृतिर्भवेत्
वाते चतुष्पलं क्षौद्रं दद्यात् स्नेहस्य षट्पलम् १६४
पित्ते चतुष्पलं क्षौद्रं स्नेहं दद्यात्पलत्रयम्
कफे तु षट्पलं क्षौद्रं क्षिपेत् स्नेहं चतुष्पलम् १६५
एरण्डक्वाथतुल्यांशं मधुतैलं पलाष्टकम्
शतपुष्पापलार्द्धेन सैन्धवार्द्धेन संयुतम्
मधुतैलकसंज्ञोऽय वस्तिर्दारुविलोडितः १६६
मेदोगुल्मकृमिप्लीहमलोदावर्तनाशनः
बलवर्णकरश्चैव वृष्यो दीपनबृंहणः १६७
क्षौद्राज्यक्षीरतैलानां प्रसृतं प्रसृतं भवेत्

हपुषासैन्धवाच्चांशो वस्तिः स्याद्यापनः परः १६८
एरण्डमूलनिक्वाथो मधुतैलं ससैन्धवम्
एष युक्तरथो वस्तिः सवचापिप्पलीफलः १६९
पञ्चमूलस्य निक्वाथैस्तैलं मागधिका मधु
ससैन्धवः सयष्ट्याह्वः सिद्धवस्तिरिति स्मृतः १७०
स्नानमुष्णोदकैः कुर्याद्दिवास्वप्नमजीर्णताम्
वर्जयेदपरं सर्वमाचरेत्स्नेहवस्तिवत् १७१
अतः परं प्रवक्ष्यामि वस्तिमुत्तरसंज्ञितम्
निरूहादुत्तरो यस्मात्तस्मादुत्तरसंज्ञकः १७२
द्वादशाङ्गुलकं नेत्रं मध्ये च कृतकर्णिकम्
मालतीपुष्पवृन्ताभं छिद्रं सर्षपनिर्गमम् १७३
पञ्चविंशतिवर्षाणामधोमात्रा द्विकार्षिकी
तदूर्ध्वं पलमात्रा च स्नेहस्योक्ता भिषग्वरैः १७४
अथास्थापनशुद्धस्य तृप्तस्य स्नानभोजनैः
स्थितस्य जानुमात्रे च पिष्टे स्निग्धे शलाकया १७५
स्निग्धया मेढ्रमार्गे तु तत्रो नेत्रं नियोजयेत्
शनैः शनैर्घृताभ्यक्तं मेढ्रमन्ध्राङ्गुलानि षट् १७६
ततोऽवपीडयेद्बस्तिं शनैर्नेत्रं विनिर्हरेत्
ततः प्रत्यागते स्नेहे स्नेहवस्तिंक्रमो हितः १७७
स्त्रीणां कनिष्ठिकास्थूलं नेत्रं कुर्याद् दशाङ्गुलम्
मुद्गप्रवेशयोग्यञ्च योन्यन्तश्चतुरङ्गुलम् १७८
द्व्यङ्गुलं मूत्रमार्गे च सूक्ष्मं नेत्रं नियोजयेत्
मूत्रकृच्छ्रविकारेषु बालानां त्वेकमङ्गुलम् १७९
शनैर्निष्कम्पमाधेयं सूक्ष्मं नेत्रं विचक्षणैः
मालतीपुष्पवृन्ताभं नेत्रमित्युदितं पुनः १८०
योनिमार्गेषु नारीणां स्नेहमात्रा द्विपालिकी
मूत्रमार्गे पलोन्माना बालानां च द्विकार्षिकी १८१
उत्तानायै स्त्रियै दद्यादूर्ध्वजान्वै विचक्षणः
अप्रत्यागच्छति भिषग् वस्तावुत्तरसंज्ञिते १८२
भूयो वस्तिं विदध्याच्च संयुक्तं शोधनैर्गुणैः

फलवर्त्तिं विदध्याद् वा योनिमार्गे दृढां भिषक् १८३
सूत्रैर्विनिर्मितां स्निग्धां शोधनद्रव्यसंयुताम् १८४
दह्यमाने तथा वस्तौ दद्याद्बस्तिं विशारदः
क्षीरिवृक्षकषायेण पयसा शीतलेन वा १८५
वस्तिः शुक्ररुजः पुंसां स्त्रीणामार्त्तवजा रुजः
हन्यादुत्तरवस्तिस्तु नोचितो मेहिने क्वचित् १८६
सम्यग्दत्तस्य लिङ्गानि व्यापदः क्रम एव च
वस्तेरुत्तरसंज्ञस्य समानाः स्नेहवस्तिना १८७
घृताभ्यक्ते गुदे क्षिप्ता श्लक्ष्णा स्वाङ्गुष्ठसन्निभा
मलप्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता १८८
नस्यं तत्कथ्यते धीरैर्नासाग्राह्यं यदौषधम्
नावनं नस्यकर्मेति तस्य नामद्वयं मतम् १८९
नस्यभेदो द्विधा प्रोक्तो रेचनं स्नेहनं तथा
रेचनं कर्षणं प्रोक्तं स्नेहनं वृंहणं मतम् १९०
कफपित्तानिलध्वंसि पूर्वमध्यापराह्णके
दिनस्य गृह्यते नस्यं रात्रावप्युत्कटे गदे १९१
नस्यं त्यजेद्भोजनान्ते दुर्दिने चापतर्पितः
तथा नवप्रतिश्यायी गर्भिणी गरदूषितः
अजीर्णी दत्तवस्तिश्च पीतस्नेहोदकासवः १९२
क्रुद्धः शोकाभिभूतश्च तृषार्त्तो वृद्धबालकौ
वेगावरोधी श्रान्तश्च स्नातुकामश्च वर्जयेत् १९३
अष्टवर्षस्य बालस्य नस्यकर्म समाचरेत्
अशीतिवर्षादूर्ध्वञ्च नावनं नैव दीयते १९४
अथ वैरेचनं नस्यं ग्राह्यं तैलैः सुतीक्ष्णकैः
तीक्ष्णैः भेषजसिद्धैर्वा स्नेहैः क्वाथे रसैस्तथा १९५
नासिकारन्ध्रयोरष्टौ षट् चत्वारश्च बिन्दवः
प्रत्येकं रेचनं योग्यं मुख्यमध्याल्पमात्रया १९६
नस्यकर्मणि दातव्यं शाणैकं तीक्ष्णमौषधम्
हिङ्गु स्याद्यवमात्रन्तु माषैकं सैन्धवं मतम् १९७
क्षीरं चैवाष्टशाणं स्यात्पानीयञ्च त्रिकार्षिकम्

कार्षिकं मधुरद्रव्यं नस्यकर्मणि योजयेत् १९८
अवपीडः प्रधमनं द्वौ भेदावपरौ स्मृतौ
शिरोविरेचनस्याथ तौ तु देयौ यथायथम् १९९
कल्कीकृतादौषधाद्यः पीडितो निःसृतो रसः
सोऽवपीडः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः २००
षडङ्गुला द्विवक्त्रा या नाडी चूर्णं तथा धमेत्
तीक्ष्णं कोलमितं वक्त्रवातैः प्रधमनं हितम् २०१
ऊर्ध्वजत्रुगते रोगे कफजे स्वरसंक्षये
अरोचके प्रतिश्याये शिरःशूले च पीनसे २०२
शोफापस्मारकुष्ठेषु नस्यं वैरेचनं हितम्
भीरुस्त्रीकृशबालानां नस्यं स्नेहेन शस्यते २०३
गलरोगे सन्निपाते निद्रायां विषमज्वरे
मनोविकारे कृमिषु पूज्यते चावपीडनम् २०४
अत्यन्तोत्कटदोषेषु विसंज्ञेषु च दीयते
चूर्णं प्रधमनं धीरैस्तद्धि तीक्ष्णतरं यतः २०५
नस्यं स्याद् गुडशुण्ठीभ्यां पिप्पलीसैन्धवेन वा
जलपिष्टेन कर्णाक्षिनासामूर्द्धभवा गदाः २०६
मन्याहनुगलोद्भूता नश्यन्ति भुजपृष्ठजाः
मधूकसारकृष्णाभ्यां वचामरिचसैन्धवैः २०७
नस्यं कोष्णाम्भसा पिष्टं दद्यात्संज्ञाप्रबोधनम्
अपस्मारे तथोन्मादे सन्निपातेऽपतन्त्रके २०८
सैन्धवं श्वेतमरिचं सर्षपाः कुष्ठमेव च
बस्तमूत्रेण संपिष्टं नस्यं तन्द्रानिवारणम् २०९
रोहितस्य च पित्तेन भावितं मरिचं वचा
कट्फलं चेति तच्चूर्णं देयं प्रधमनं वुधैः २१०
अथ बृंहणनस्यस्य कल्पना कथ्यतेऽधुना
मर्शश्च प्रतिमर्शश्च द्वौ भेदौ स्नेहने मतौ २११
मर्शस्य तर्पणी मात्रा मुख्या शाणैः स्मृताऽष्टभिः
मध्यमा तु चतुःशाणैर्हीना शाणमिता मता २१२
एकैकस्मिंस्तु मात्रेयं देया नासापुटे बुधैः २१३

मर्शस्य द्वित्रिवेलं वा वीक्ष्य दोषबलाबलम्
एकान्तरं द्वयन्तरं वा नस्यं दद्याद्विचक्षणः २१४
त्र्यहं पञ्चाहमथवा सप्ताहं वा सुयन्त्रितः २१५
मर्शे शिरोविरेके च व्यापदो विविधाः स्मृताः
दोषोत्क्लेशात्क्षयाच्चैव विज्ञेयास्ता यथाक्रमम्
दोषोत्क्लेशनिमित्तासु युञ्ज्याद्वमनशोधनम् २१६
अथ क्षयनिमित्तासु यथास्वं बृंहणं हितम्
शिरोनासाऽक्षिरोगेषु सूर्यावर्त्तार्द्धभेदके २१७
दन्तरोगे बले हीने मन्याबाह्वंसजे गदे
मुखशोषे कर्णनादे वातपित्तगदे तथा २१८
अकालपलिते चैव केशश्मश्रुप्रपातने
पूज्यते बृंहणं नस्यं स्नेहैर्वा मधुरद्रवैः २१९
सशर्करं पयःपिष्टं भृष्टमाज्येन कुङ्कुमम्
नस्यप्रयोगतो हन्याद्वातरक्तभवा रुजः
भ्रूशङ्खाक्षिशिरःकर्णसूर्यावर्त्तार्द्धभेदकान् २२०
नस्यं स्यादणुतैलेन तथा नारायणेन वा
माषादिना वा सर्पिर्भिस्तत्तद्भेषजसाधितैः २२१
तैलं कफे स्याद्वाते च केवले पवने वसाम्
दद्यान्नस्यं सदा पित्ते सर्पिर्मज्जानमेव च २२२
माषात्मगुप्तारास्नाभिर्बलारुबुकरौहिषैः
कृतोऽश्वगन्धया क्वाथो हिङ्गुसैन्धवसंयुतः २२३
कोष्णो नस्यप्रयोगेण पक्षाघातं सकम्पनम्
जयेदर्दितवातञ्च मन्यास्तम्भावबाहुकौ २२४
प्रतिमर्शस्य मात्रा तु द्वित्रिविन्दुमिता मता
प्रत्येकशो नासिकया स्नेहनेति विनिश्चितम् २२५
स्नेहे ग्रन्थिद्वयं यावन्निमग्ना चोद्धृता ततः
तर्जनी यं स्रवेद्बिन्दुं सा मात्रा बिन्दुसंज्ञिता २२६
एवंविधैर्बिन्दुसंज्ञैरष्टाभिः शाण उच्यते
स देयो मर्शनस्येषु प्रतिमर्शो द्विबिन्दुकः २२७
समयाः प्रतिमर्शस्य बुधैः प्रोक्ताश्चतुर्दश

प्रभाते दन्तकाष्ठान्ते गृहान्निर्गमने तथा २२८
व्यायामाध्वव्यवायान्ते विण्मूत्रान्तेऽञ्जने कृते
कवलान्ते भोजनान्ते दिवास्वप्नोस्थिते तथा २२९
वमनान्ते तथा सायं प्रतिमर्शः प्रयुज्यते २३०
रीषदुच्छिक्कनात्स्नेहो यथा वक्त्रं प्रपद्यते
नस्ये निषिक्तं तं विद्यात्प्रतिमर्शप्रमाणतः २३१
उच्छिष्टं न पिबेन्नैव निष्ठीवेन्मुखमागतम् २३२
क्षीणे तृष्णाऽस्यशोषार्त्ते बाले वृद्धे च पूज्यते
प्रतिमर्शान्न जायन्ते रोगाश्चैवोर्ध्वजत्रुजाः
बलीपलितनाशश्च बलमिन्द्रियजं भवेत् २३३
बिभीतनिम्बौ गाम्भारी शिवा शेलुश्च काकिनी
एकैकतैलनस्येन पलितं नश्यति ध्रुवम् २३४
अथ नस्यविधिं वक्ष्ये नस्यग्रहणहेतवे
देशेवातरजोमुक्ते कृतदन्तनिघर्षणम् २३५
विशुद्धं धूमपानेन स्विन्नभालगलं तथा
उत्तानशायिनं किञ्चित्प्रलम्बशिरसं नरम् २३६
आस्तीर्णहस्तपादञ्च वस्त्राच्छादितलोचनम्
समुन्नामितनासाऽग्र वैद्यो नस्येन योजयेत् २३७
कोष्णेनाच्छिन्नधारेण हेमतारादिशुक्तिभिः
शुक्त्या वा यन्त्रयुक्त्या वा प्लोतैर्वा नस्यमाचरेत् २३८
नस्येष्वासिच्यमानेषु सिरो नैव प्रकम्पयेत्
न कुप्येन्न प्रभाषेत नोच्छिक्केन्न हसेत्तथा २३९
एतैर्हि विहितः स्नेहो नैवान्तं सम्प्रपद्यते
ततः कासप्रतिश्यायशिरोऽक्षिगदसम्भवः २४०
शृङ्गाटकमभिव्याप्य स्थापयेन्न गिलेद् द्रवम्
पञ्च सप्त दशैव स्युर्मात्राः स्नेहस्य धारणे २४१
उपविश्याथ निष्ठीवेन्नासावक्त्रागतं द्रवम्
वामदक्षिणपार्श्वाभ्यां निष्ठीवेत्संमुखं न हि २४२
नीते नस्ये मनस्तापं रजःक्रोधञ्च सन्त्यजेत्
शयीत निद्रां त्यक्त्वा च प्रोत्तानो वाक्छतं नरः २४३

तथा शिरोविरेकान्ते धूमो वा कवलो हितः
नस्ये त्रीण्युपदिष्टानि लक्षणानि प्रयोगतः २४४
शुद्धहीनातियोगा हि विज्ञेयाः शास्त्रचिन्तकैः
लाघवं मलसंशुद्धिः स्रोतसां व्याधिसंक्षयः
चित्तेन्द्रियप्रसादश्च शिरसः शुद्धिलक्षणम् २४५
कण्डूःप्रदेहो गुरुता स्रोतसां कफसंस्रवः
मूर्ध्नि हीनाविशुद्धेस्तु लक्षणं परिकीर्त्तितम् २४६
मस्तुलुङ्गागमो वातवृद्धिरिन्द्रियविभ्रमः
शून्यता शिरसश्चापि मूर्ध्नि गाढं विरेचिते २४७
हीनातिशुद्धे शिरसि कफवातघ्नमाचरेत्
तत्र हीनेन नस्येन शुद्धे वातघ्नमाचरेत् २४८
सम्यग्विशुद्धे शिरसि सर्पिर्नस्येन दीयते
कफप्रसेकः शिरसो गुरुतेन्द्रियविभ्रमः २४९
लक्षणं तदतिस्निग्धे तत्र रूक्षं प्रदापयेत्
भोजयेच्चानभिष्यन्दि नस्ये वातिकमादिशेत् २५०

इति श्रीमिश्रलटकन तनय श्रीमिश्रभाव विरचिते भावप्रकाशे
परिभाषाऽदिप्रकरणे
पञ्चमं पञ्चकर्मविधिप्रकरणं समाप्तम् ५

अथ षष्ठं धूमपानादिविधिप्रकरणम् ६

धूमस्तु षड्विधः प्रोक्तः शमनो बृंहणस्तथा
रेचनः कासहा चैव वामनो व्रणधूपनः १
शमनस्य तु पर्यायौ मध्यः प्रायोगिकस्तथा
बृंहणस्य च पर्यायौ स्नेहनो मृदुरेव च २
रेचनस्यापि पर्यायौ शोधनस्तीक्ष्ण एव च
अधूमार्हाश्च खल्वेते श्रान्तो भीतश्च दुःखितः ३
दत्तवस्तिर्विरिक्तश्च रात्रौ जागरितस्तथा
पिपासितश्च दाहार्त्तस्तालुशोषी तथोदरी ४
शिरोऽभितापी तिमिरी छर्द्यार्ध्मानप्रपीडितः
क्षतोरस्कः प्रमेहार्त्तः पाण्डुरोगी च गर्भिणी ५

रूक्षः क्षीणोऽभ्यवहृतक्षीरक्षौद्रघृतासवः
भुक्तान्नदधिमत्स्यश्च बालो वृद्धः कृशस्तथा ६
अकाले चातिपीतश्च धूमः कुर्यादुपद्रवान्
तत्रेष्टं सर्पिषः पानं नावनाञ्जनतर्पणम् ७
सर्पिरिक्षुरसं द्राक्षां पयो वा शर्कराऽम्बु वा
मधुराम्लौ रसौ वाऽपि वमनाय प्रदापयेत् ८
धूमस्तु द्वादशाद्वर्षाद् गृह्यतेऽशीतिकान्न च
कासश्वासप्रतिश्यायान् मन्याहनुशिरोरुजः ९
वातश्लेष्मविकारांश्च हन्याद्धूमः सुयोजितः
धूमोपयोगात्पुरुषः प्रसन्नेन्द्रियवाङ्मनाः
दृढकेशद्विजश्मश्रुः सुगन्धिवदनो भवेत् १०
धूमनाडी भवेत्तत्र त्रिखरडा च त्रिपर्विका
कनिष्ठिकापरीणाहा राजमाषागमान्तरा ११
धूमपानी भवेद्दीर्घा शमने रोगिणोऽङ्गुलैः
चत्वारिंशन्मितैस्तद्वद् द्वात्रिंशद्भिर्मृदौ मता १२
तीक्ष्णे चतुर्विंशतिभिः कासघ्ने षोडशोन्मित् १३
दशाङ्गुलैर्वामनीये तथा स्याद् व्रणनाडिका
कलायमरडलस्थूला कुलत्थागमरन्ध्रिका १४
अथेषिकां प्रलिम्पेच्च सुश्लक्ष्णां द्वादशाङ्गुलाम्
धूमद्रव्यस्य कल्केन लेपश्चाष्टाङ्गुलः स्मृतः १५
कल्कं कर्षमितं लिप्त्वा छायाशुष्कञ्च कारयेत्
ईषिकामपनीयाथ स्नेहाक्तां वर्त्तिमादरात् १६
अङ्गारैर्दीपितां कृत्वा धृत्वा नेत्रस्य रन्ध्रके
वदनेन पिबेद् धूमं वदनेनैव संत्यजेत् १७
नासिकाभ्यां ततः पीत्वा मुखेनैव वमेत्सुधीः
शरावसम्पुटे क्षिप्त्वा कल्कमङ्गारदीपितम्
छिद्रे नेत्रं निवेश्याथ व्रणं तेनैव धूपयेत् १८
एलादिकल्कं शमने स्निग्धं सर्जरसं मृदौ १९
रेचने तीक्ष्णकल्कञ्च श्वासघ्ने क्षुद्रकोषणम्
वामने स्नायुचर्माढ्यं दद्याद्धूमस्य पानकम् २०

व्रणे निम्बवचाद्यश्च धूपनं संप्रशस्यते
अन्येऽपि धूमा गेहेषु कर्त्तव्या रोगशान्तये २१
मयूरपिच्छं निम्बस्य पत्राणि बृहतीफलम्
मरिचं हिङ्गु मांसी च बीजं कार्पाससम्भवम् २२
छागरोमाहिनिर्मोको विष्ठा वैडालिकी तथा
गजदन्तश्च तच्चूर्णं किञ्चिद्घृतविमिश्रितम् २३
गेहेषु धूपनं दत्तं सर्वान् बालग्रहान् हरेत्
पिशाचान् राक्षसान् हत्वा सर्वज्वरहरं भवेत् २४
मनस्तापं रजःक्रोधौ धूमपाने निवारयेत्
नेत्राणि धातुजान्याहुर्नलवंशादिजान्यपि २५
स्नेहक्षीरकषायादिद्रवैः सम्पूर्णमाननम्
आपूर्य स्थीयते तावद्विधिर्गण्डूषधारणे २६
कफपूर्णास्यता यावच्छेदो दोषस्य वा भवेत्
नेत्रघ्राणस्रुतिर्यावत्तावद्गण्डूषधारणम् २७
गण्डूषान् सुस्थितः कुर्य्यात्स्विन्नभालगलादिकः
मनुष्यस्त्रींस्तथा पञ्च सप्त वाऽदोषनाशनात् २८
चतुर्विधः स्याद् गण्डूषः स्नेहनः शमनस्तथा
शोधनो रोपणश्चैव कवलश्चापि तादृशः २९
स्निग्धोष्णैः स्नैहिको वाते स्वादुशीतैः प्रसादनः
पित्ते कट्वम्ललवणैरुष्णैः संशोधनः कफे
कषायतिक्तमधुरैः कटूष्णो रोपणो व्रणे ३०
दद्याद् द्रव्येषु चूर्णञ्च गण्डूषे कोलमात्रकम्
कर्षप्रमाणः कल्कश्च कवले दीयते बुधैः ३१
धार्यन्ते पञ्चमाद्वर्षाद्गण्डूषाः कवलादयः ३२
व्याधेरपचयस्तुष्टिर्वैशद्यं वक्त्रलाघवम्
इन्द्रियाणां प्रसादश्च गण्डूषे विधृते भवेत् ३३
हरेदास्यस्य वैरस्यं शोषं पाकं व्रणं तृषाम्
दन्तचालञ्च गण्डूषो वैशद्यं तु करोति हि ३४
वातपित्तकफघ्नस्य द्रव्यस्य कवलं मुखे
अर्द्धं निक्षिप्य संचर्व्य निष्ठीवेत्कवले विधिः ३५

कवलः कुरुते काङ्क्षां भक्ष्येषु हरते कफम्
तृष्णां शोषञ्च वैरस्यं दन्तचालञ्च नाशयेत् ३६
दन्त जिह्वामुखानां यच्चूर्णकल्कावलेहकैः
शनैर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम् ३७
वैरस्यं मुखदौर्गन्ध्यं मुखशोषं तथा तृषाम्
अरुचिं दन्तपीडाञ्च निहन्ति प्रतिसारणम् ३८
हीने जाड्यकफोत्क्लेशावरसज्ञानमेव च
अतियोगान्मुखे पाकः शोषस्तृष्णावमिः क्लमः ३९
स्वेदश्चतुर्विधः प्रोक्तस्तापोष्मस्वेदसंज्ञितः
उपनाहो द्रवः स्वेदः सर्वे वातार्त्तिहारिणः ४०
स्वेदौ तापोष्मजौ प्रायः श्लेष्मघ्नौ समुदीरितौ
उपनाहस्तु वातघ्नः पित्तसङ्घे द्रवो हितः ४१
महाबले महाव्याधौ शीते स्वेदो महान् स्मृतः
दुर्बले दुर्बलः स्वेदो मध्यमे मध्यमो मतः
बलासे रूक्षणः स्वेदो रूक्षस्निग्धः कफानिले ४२
कफमेदोवृते वाते कोष्णं गेहं रवेः करान्
नियुद्धं मार्गगमनं गुरु प्रावरणं ध्रुवम् ४३
चिन्ताव्यायामभारांश्च सेवेतामयमुक्तये
येषां नस्यं प्रदातव्यं वस्तिश्चापि हि देहिनाम् ४४
शोधनीयाश्च ये केचित् पूर्वं स्वेद्याश्च ते मताः
स्वेद्या ऊर्ध्वं त्रयोऽपीह भगन्दर्यर्शसस्तथा ४५
अश्मर्या चातुरो जन्तुः शययेच्छस्त्रकर्मणः ४६
पश्चात्स्वेद्या हृते शल्ये मूढगर्भगदे तथा
काले प्रजाताऽकाले वा पश्चात्स्वेद्या नितम्बिनी ४७
सर्वान्स्वेदान्निवाते च जीर्णेऽन्ने वाऽवचारयेत्
स्वेदाद्धातुस्थिता दोषाः स्नेहक्लिन्नस्य देहिनः ४८
द्रवत्वं प्राप्य कोष्ठान्तर्गत्वा यान्ति विरेकताम्
स्नेहाभ्यक्तशरीरस्य शीतैराच्छाद्य चक्षुषी
स्वेद्यमानशरीरस्य हृदयं शीतलः स्पृशेत् ४९
अजीर्णी दुर्बली मेही क्षतक्षीणः पिपासितः ५०

अतिसारी रक्तपित्ती पाण्डुरोगी तथोदरी
मेदस्वी गर्भिणी चैव न हि स्वेद्या विजानता ५१
स्वेदादेषां याति देहो विनाशं नो साध्यत्वं यान्ति तेषां विकाराः ५२
एतानपि मृदुस्वेदैः स्वेदसाध्यानुपाचरेत्
मृदुस्वेदं प्रयुञ्जीत तथा ह्यन्मुष्कदृष्टिषु ५३
अतिस्वेदात्सन्धिपीठा दाहस्तृष्णा क्लमो भ्रमः
पित्तासृक्पिडिकाकोपस्तत्र शीतैरुपाचरेत् ५४
तेषु तापाभिधः स्वेदो बालुकावस्त्रपाणिभिः
कपालकन्दुकाङ्गारैर्यथायोग्यं हि जायते ५५
प्रतप्तैरम्लसिक्तैश्च कायेऽलक्तकवेष्टिते
ऊष्मस्वेदः प्रयोक्तव्यो लोहपिण्डेष्टकादिभिः
अथवा वातनिर्ण्याशिद्रव्यक्वाथरसादिभिः ५६
उष्णैर्घटं पूरयित्वा पार्श्वे छिद्रं विधाय च
विमुद्रयास्यं त्रिखण्डां च धातुजां काष्ठजामुत ५७
षडङ्गुलास्यां गोपुच्छां नाडीं युञ्ज्याद् द्विहस्तकाम्
सुखोपविष्टं स्वभ्यक्तं गुरुप्रावरणावृतम्
हस्तिशुण्डिकया नाडया स्वेदयेद्वातरोगिणम् ५८
पुरुषाया्ममात्रां वा भूमिं सम्मार्ज्य खादिरैः
काष्ठैर्दग्ध्वा तथाऽभ्युक्ष्य क्षीरधान्याम्लवारिभिः ५९
वातघ्नपत्रैराच्छाद्य शयानं स्वेदयेन्नरम्
एवं माषादिभिः स्विन्नैः शयानं स्वेदमाचरेत् ६०
अथोपनाहस्वेदञ्च कुर्याद्वातहरौषधैः
प्रदिह्य देहं वातार्त्तं क्षीरमांसरसादिभिः ६१
अम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैः
अथ ग्राम्यानूपमांसैर्जीवनीयगणेन च ६२
दधिसौवीरकक्षीरैर्वीरतर्वादिना तथा
कुलत्थमाषगोधूमैरतसीतिलसर्षपैः ६३
शतपुष्पादेवदारुशेफालीस्थूलजीरकैः
एरण्डमूलजीरैश्च रास्नामूलकशिग्रुभिः ६४
मिसिकृष्णाकुठेरैश्च लवणैरम्लसंयुतैः

प्रसारणयश्चगन्धाभ्यां बलाभिर्दशमूलकैः ६५
गुडूच्या वानरीवीजैर्यथालाभसमाहृतैः
क्षुण्णैः स्विन्नैश्च वस्त्रेण बद्धैः संस्वेदयेन्नरम् ६६
महाशाल्वणसंज्ञोऽय योगः सर्वानिलार्त्तिहृत् ६७
अथवाऽम्लेन सम्पिष्टैः कोष्णैःसूक्ष्मपटस्थितैः
भेषजैः स्वेदयेत् किं वा स्विन्नैः कोष्णैः पटस्थितैः ६८
द्रवस्वेदस्तु वातघ्नद्रव्यक्वाथेन पूरिते
कटाहे कोष्ठके वाऽपि सूपविष्टोऽवगाहयेत् ६९
सौवर्णं राजतं वापि ताम्रं लौहञ्च दारुजम्
कोष्ठकं तत्र कुर्वीतोच्छ्राये षड्विंशदङ्गुलम्
आयामे वा तदेव स्याच्चतुष्कोणन्तु चिक्कणम् ७०
नाभेः षडङ्गुलं यावन्मग्नं क्वाथस्य धारया
कोष्णया स्कन्धयोः सिक्तस्तिष्ठेत्स्निग्धतनुर्नरः ७१
मुहूर्त्तैकं समारभ्य यावत्स्यात्तच्चतुष्टयम्
तावत्तदवगाहेत यावदारोग्यनिश्चयः ७२
एवं तैलेन दुग्धेन सर्पिषा स्वेदयेन्नरम्
एकान्तरो द्व्यन्तरो वा युक्तः स्नेहोऽवगाहने ७३
सिरामुखैर्लोमकूपैर्धमनीभिश्च तर्पयेत्
शरीरे बलमाधत्ते युक्तः स्नेहोऽवगाहने ७४
जलसिक्तस्य वर्द्धन्ते यथा मूलेऽङ्कुरादयः
तथैव धातुवृद्धिर्हि स्नेहसिक्तस्य जायते ७५
नातः परतरः कश्चिदुपायो वातनाशनः
शीतशूलव्युपरमे स्तम्भगौरवनिग्रहे ७६
दीप्तेऽग्नौ मार्दवे जाते स्वेदनाद्विरतिर्मता ७७
अभ्यङ्गः परिषेकश्च पिचुर्वस्तिरिति क्रमात्
मूर्द्धतैलं चतुर्द्धा स्याद्बलवत्तद्यथोत्तरम् ७८
त्रयोऽभ्यङ्गादयः पूर्वे प्रसिद्धाः सर्वतः स्मृताः
शिरोवस्तिविधिश्चात्र प्रोच्यते सुज्ञसम्मतः ७९
शिरोवस्तिश्चर्मणः स्याद् द्विमुखो द्वादशाङ्गुलः
शिरःप्रमाणस्तं बद्ध्वा मस्तके माषपिष्टकैः ८०

सन्धिरोधं विधायाशु स्नेहैः कोष्णैः प्रपूरयेत्
तावद्धार्यस्तु यावत्स्यान्नासाकर्णमुखस्रुतिः ८१
वेदनोपशमो वाऽपि मात्राणां वा सहस्रकम्
स्वजानुनः करावर्त्तं कुर्याच्छोटिकया युतम् ८२
एषा मात्रा भवेदेका सर्वत्रैवैष निश्चयः
विना भोजनमेवात्र शिरोवस्तिः प्रशस्यते ८३
प्रयोज्यस्तु शिरोवस्तिः पञ्च सप्त दिनानि वा
विमोच्य शिरसो बस्तिं गृह्णीयाच्च समन्ततः ८४
ऊर्ध्वकायं ततः कोष्णे नीरे स्नानं समाचरेत्
अनेन दुर्जया रोगा वातजा यान्ति संक्षयम्
शिरःकम्पादयस्तेन सर्वकालेषु युज्यते ८५
स्वेदयेत्कर्णदेशन्तु किञ्चिन्नुः पार्श्वशायिनः
मूत्रैः स्नेहै रसैरुष्णैः श्रोत्ररन्ध्रं प्रपूरयेत् ८६
कर्णञ्च पूरितं रक्षेच्छतं पञ्च शतानि वा
सहस्रं वापि मात्राणां श्रोत्रकण्ठशिरोगदे ८७
मूत्राद्यैः पूरणं कर्णे भोजनात्प्राक्प्रशस्यते
तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते ८८
कर्णे शूलाकुले कोष्णं बस्तमूत्रं ससैन्धवम्
निक्षिपेत्तेन शाम्यन्ति शूलपाकादिजा रुजः ८९
शृङ्गवेरञ्च मधुकं सैन्धवं तैलमेव च
कदुष्णं कर्णयोर्देयमेतत्स्याद्वेदनाऽपहम् ९०
पीतार्कपत्रमाज्येन लिप्तं वह्नौ प्रतापयेत्
तद्रसः श्रवणे क्षिप्तः कर्णशूलहरः परः ९१
आलेपस्य तु नामानि लेपो लेपनलिप्तकौ
दोषघ्नो विषहा वरर्यः स च लेपस्त्रिधा मतः ९२
त्रिप्रमाणश्चतुर्भागत्रिभागार्द्धाङ्गुलोन्नतः
आर्द्रो व्याधिहरः स स्याच्छुष्को दूषयति च्छविम् ९३
दोषघ्नो लेपो यथा
शोथघ्नीदारुसिद्धार्थशुण्ठीशोभाञ्जनत्वचाम्
आरनालेप पिष्टानां प्रलेपः सर्वशोथहा ९४

शिरीषं मधुयष्टी च तगरं रक्तचन्दनम्
एला मांसी निशायुग्मं कुष्ठं बालकमेव च ९५
इति सञ्चूरर्य लेपोऽय पञ्चमांशघृतप्लुतः
जलेन क्रियते सुज्ञैर्दशाङ्ग इति संज्ञितः ९६
वीसर्पश्च विषस्फोटाञ्छोथदुष्टव्रणाञ्जयेत् ९७
विषहा लेपो यथा
अजादुग्धतिलैर्लेपो नवनीतेन संयुतः
शोथमारुष्करं हन्ति लेपो वा कृष्णमार्त्तिकः ९८
अपरः कृमिविषापहलेपो यथा
लाङ्गल्यतिविषाऽलाबूशालिनीबीजमूलकैः
लेपो धान्याम्बुसम्पिष्टः कीटविस्फोटनाशनः ९९
मुखकान्तिदो लेपो यथा
रक्तचन्दन मञ्जिष्ठा लोध्र कुष्ठ प्रियङ्गवः
वटाङ्कुरा मसूराश्च व्यङ्गघ्ना मुखकान्तिदाः १००
अथ लेपविधिश्चैव प्रोच्यते सुज्ञसम्मतः
आलेपश्च प्रदेहश्च द्वौ भेदौ तस्य भाषितौ १०१
चर्मार्द्रं माहिषं यद्वत्प्रोन्नतं सा मितिस्तयोः
शीतस्तनुविशोषी च प्रलेपः पित्तहन्मतः १०२
आर्द्रो घनस्तथोष्णः स्यात्प्रदेहः श्लेष्मवातहा
न रात्रौ लेपनं कुर्याच्छुष्यमाणं न धारयेत्
शुष्यमाणमुपेक्षेत प्रदेहं पीडनं प्रति १०३
तमसा पिहितो ह्यूष्मा लोमकूपमुखे स्थितः
विना लेपेन निर्याति रात्रौ नालेपयेदतः १०४
रात्रावपि प्रलेपादिर्व्रणे देयो विचक्षणैः
अपाकिन्यतिगम्भीरे रक्तश्लेष्मसमुद्भवे १०५
प्रलेपो यथा
मधुकं चन्दनं मूर्वा नलमूलञ्च पर्पटम्
उशीरं बालकं पद्मं प्रलेपः पित्तशोथहृत् १०६
प्रदेहो यथा
बीजपूरजटा हिंस्रा देवदारु महौषधम्

रास्नाऽरणिः प्रदेहोऽय वातशोथविनाशनः १०७
कृष्णापुराणपिण्याकशिग्रुत्वक्सिकताशिवाः
गोमूत्रपिष्टः कोष्णोऽय प्रदेहः श्लेष्मशोथहा १०८
शोणितं स्रावयेज्जन्तोरामयं प्रसमीक्ष्य च
प्रस्थं प्रस्थार्द्धमथ वा प्रस्थार्द्धार्द्धमथापि वा १०९
शरत्काले स्वभावेन शोणितं स्रावयेन्नरः
त्वग्दोषग्रन्थिशोथाद्या नश्यन्ति रुधिरोद्भवाः ११०
व्यभ्रे वर्षासु विध्येत शीते ग्रीष्मे शरद्यपि
मध्याह्ने शीतकाले च रुधिरं स्रावयेद् बुधः १११
अनुष्णाशीतं मधुरं स्निग्धं रक्तञ्चवर्णतः
शोणितं गुरु विस्रं स्याद् विदाहश्चास्य पित्तवत् ११२
विस्रता द्रवता रागश्चलनं विलयस्तथा
भूम्यादिपञ्चभूतानामेते रक्ते गुणाः स्मृताः ११३
रक्ते दुष्टे भवेच्छोथो रक्तमण्डलमेव च
व्यथा दाहश्च पाकश्च कण्डूश्च पिडकोद्गमः ११४
वृद्धे रक्ताङ्गनेत्रत्वं सिराणां पूर्णता तथा
गात्राणां गौरवं निद्रा मोहो दाहश्च जायते ११५
क्षीणेऽस्रे मधुराकाङ्क्षा मूर्च्छा च त्वचि रूक्षता
शैथिल्यं च सिराणां स्याद्वातादुन्मार्गगामिता ११६
अरुणं फेनिलं रूक्षं परुषं तनु शीघ्रगम्
आस्कन्दि सूचीनिस्तोदि रक्तं स्याद्वातदूषितम् ११७
पित्तेन पीतं हरितं नीलं श्यावं च विस्रकम्
अस्वादूष्णं मक्षिकाणां पिपीलीनामनिष्टकम् ११८
शीतलं बहुलं स्निग्धं गैरिकोदकसन्निभम्
मांसपेशीप्रभं स्कन्दि मन्दगं कफदूषितम् ११९
द्विदोषदुष्टं संसृष्टं त्रिदुष्टं पूतिगन्धकम्
सर्वलक्षणसंयुक्तं काञ्जिकाभं च जायते १२०
विषदुष्टं भवेच्छ्यावं नासिकोन्मार्गगं तथा
विस्रं काञ्जिकसंकाशं सर्वकुष्ठकरं तथा १२१
इन्द्रगोपप्रभं ज्ञेयं प्रकृतिस्थमसंहतम् १२२

शोथे दाहेऽङ्गपाके च रक्तवर्णेऽसृजः स्रुतौ
वातरक्ते तथा कुष्ठे सपीडे दुर्जयेऽनिले
पाण्डुरोगे श्लीपदे च विषदुष्टेच शोणिते १२३
ग्रन्थ्यर्बुदापचीक्षुद्ररोगाधिमन्थकाभिधे
विदारीस्तनरोगेषु गात्राणां सादगौरवे १२४
रक्ताभिष्यन्दतन्द्रायां पूतिघ्राणास्यदाहके
यकृत्प्लीहविसर्पेषु विद्रधौ पिडकोद्गमे १२५
कर्णौष्ठघ्राणवक्त्राणां पाके दाहे शिरोरुजि
उपदंशे रक्तपित्ते रक्तस्रावः प्रशस्यते १२६
एषु रोगेषु शृङ्गैर्वा जलौकाऽलाबुकैरपि
अथवापि सिरामोक्षैः कारयेद्रक्तपातनम् १२७
न कुर्वीत सिरामोक्षं कृशस्यातिव्यवायिनः
क्लीबस्य भीरोर्गर्भिण्याः सूतायाः पाण्डुरोगिणः १२८
पञ्चकर्मविशुद्धस्य पीतस्नेहस्य चार्शसाम्
सर्वाङ्गशोथयुक्तानामुदरिश्वासकासिनाम् १२९
छर्द्यतीसारजुष्टानामतिस्विन्नतनोरपि
ऊनषोडशवर्षस्य गतसप्ततिकस्य च १३०
आघातात्स्रुतरक्तस्य सिरामोक्षो न शस्यते १३१
एषां चात्ययिके रोगे जलौकाभिर्विनिर्हरेत्
तथा च विषजुष्टानां सिरामोक्षो न शस्यते १३२
गोशृङ्गेण जलौकाभिरलाबूभिरपि त्रिधा
वातपित्तकफैर्दुष्टं शोणितं स्रावयेद् बुधः १३३
द्विदोषाभ्यान्तु दुष्टं यत्त्रिदोषैरपिदूषितम्
शोणितं स्रावयेद्युक्त्यासिरामोक्षैः पदैस्तथा १३४
गृह्णाति शोणितं शृङ्गं दशाङ्गुलमितं बलात्
जलौकाहस्तमात्रं तु तुम्बी तु द्वादशाङ्गुलम् १३५
पदमङ्गुलमात्रस्य सिरा सर्वाङ्गशोधिनी
शीते निरन्ने मूर्छार्त्तिनिद्राभीतिमदश्रमैः १३६
युक्तानां न स्रवेद्रक्तं तथा विण्मूत्रसङ्गिनाम्
शोणिते चाप्रवृत्ते तु कुष्ठत्रिकटुसैन्धवैः १३७

मर्दयेद् व्रणवक्त्रञ्च तेन रक्तं प्रवर्त्तते
तस्मान्न शीते नात्युष्णे नास्विन्ने नातितापिते १३८
पीत्वा यथागूं तृप्तस्य स्रावयेच्छोणितं बुधः
अतिस्विन्नस्योष्णकाले तथैवातिसिराव्यधात् १३९
अतिप्रवर्त्तते रक्तं तत्र कुर्यात्प्रतिक्रियाम्
अतिप्रवृत्ते रक्ते तु लोध्रसर्जरसाञ्जनैः १४०
यवगोधूमचूर्णैश्च धवधन्वनगैरिकैः
सर्पनिर्मोकचूर्णैर्वा भस्मना क्षौमवस्त्रयोः १४१
मुखं व्रणस्य बद्ध्वा च शीतैश्चोपचरेद् व्रणम्
विध्येदूर्ध्वसिरां तावद्हेत्क्षारेण वह्निना १४२
व्रणं कषायः सन्धत्ते रक्तं स्कन्दयते हिमम्
व्रणास्यं पाचयेत्क्षारो दाहः सङ्कोचयेत्सिराः १४३
रक्ते दुष्टेऽवशिष्टेऽपि व्याधिर्नैव प्रकुप्यति
अतो रक्षेत्सावशेषं रक्ते नातिस्रुतिर्हिता १४४
आन्ध्यमाक्षेपकं तृष्णां तिमिरं शिरसो रुजः
पक्षाघातं श्वासकासौ हिक्कादाहौ च पाण्डुताम्
कुरुतेऽतिस्रुतं रक्तं मरणं वा करोति च १४५
देहस्योत्पत्तिरसृजा देहस्तेनैव धार्यते
रक्तं जीवस्य चाधारस्तस्माद्रक्षेदसृग्बुधः १४६
शीतोपचारैः कुपिते स्रुतरक्तस्य मारुते
कोष्णेन सर्पिषा शोथं सव्यथं परिषेचयेत् १४७
क्षीणस्यैणशशोरभ्रहरिणच्छागमांसजः
रसः समुचितः पाने क्षीरः षष्टिकया हितम् १४८
पीडाशान्तिर्लघुत्वं च व्याध्युपद्रवसंक्षयः
मनःस्वास्थ्यं भवेच्चिह्नं सम्यङ्निःसारितेऽसृजि १४९
व्यायाममैथुनक्रोधशीतस्नानप्रवातकान्
एकाशनं दिवानिद्रा क्षाराम्लकटुभोजनम् १५०
शोकं वादमजीर्णञ्च त्यजेदाबलदर्शनात् १५१
सेक आश्च्योतनं पिण्डी विडालस्तर्पणं तथा
पुटपाकोऽञ्जनं चैभिः कल्पैर्नेत्रमुपाचरेत् १५२

सेकस्तु सूक्ष्मधाराभिः सर्वस्मिन्नयने हितः
मीलिताक्षस्य मर्त्यस्य प्रदेयश्चतुरङ्गुलः १५३
स सस्नेहो भवेद्वाते पित्ते रक्ते च रोपणः
लेखनस्तु कफे कार्यस्तस्य मात्राऽभिधीयते १५४
षड्भिर्वाचां शतैः स्नेहे चतुभिश्चैव रोपणे
तैस्त्रिभिर्लेखने कार्यः सेको नेत्रप्रसादने १५५
निमेषोन्मेषणं पुंसामङ्गुल्या च्छोटिकाऽथ वा
गुर्वक्षरोच्चारणं वा वाङ्मात्रेयं स्मृता बुधैः १५६
सेकस्तु दिवसे कार्यो रात्रौ चात्यन्तिके गदे
एरण्डस्य दलैः पिष्टैः पक्वमाजं पयो हितम्
सुखोष्णं नेत्रयोः सिक्तं वाताभिष्यन्दनाशनम् १५७
क्वाथक्षौद्रासवस्नेहबिन्दूनां यत्तु पातनम्
द्व्यङ्गुलोन्मीलिते नेत्रे प्रोक्तमाश्च्योतनं हितम् १५८
बिन्दवोऽष्टौ लेखनेषु रोपणे दश बिन्दवः
स्नेहने द्वादश प्रोक्तास्ते शीते कोष्णरूपिणः १५९
उष्णे तु शीतरूपाः स्युः सर्वत्रैवैष निश्चयः
वाते तिक्तं तथा स्निग्धं पित्ते मधुरशीतलम् १६०
कफे तिक्तोष्णरूक्षं च क्रमादाश्च्योतनं हितम्
आश्च्योतनानां सर्वेषां मात्रा स्याद्वाक्छतोन्मिता १६१
ततः परं लोचनाभ्यां भेषजानामयोगतः
आश्च्योतनं न कर्त्तव्यं निशायां केनचित्क्वचित् १६२
बिल्वादिपञ्चमूलेन बृहत्येरण्डशिग्रुमिः
क्वाथ आश्च्योतने कोष्णो वाताभिष्यन्दनाशनः १६३
युक्तभेषजकल्कस्य पिण्डी कवलमात्रया
वस्त्रखण्डेन सम्बद्ध्या नेत्रेऽभिष्यिन्दनाशिनी १६४
स्निग्धोष्णा पिण्डिका वाते पित्ते सा शीतला मता
रूक्षोष्णा श्लेष्मणि प्रोक्ता विधिरुक्तो बुधैरयम् १६५
एरण्डपत्रमूलत्वङ्निर्मिता वातनाशिनी
धात्रीविरचिता पित्ते शिग्रुपत्रकृता कफे १६६
विडालको बहिर्लेपो नेत्रपद्मविवर्जितः

तस्य मात्रा परिज्ञेया मुखालेपविधानवत् १६७
यष्टीगैरिकसिन्धूत्थदार्वीताद्यैः समांशकैः
जलपिष्टैर्बहिर्लेपः सर्वनेत्रामयापहः १६८
वातातपरजोहीने वेश्मन्युत्तानशायिनः
अभितो माषचूर्णेन क्लिन्नेन परिपिण्डितौ १६९
समौ दृढावसम्बाधौ कर्त्तव्यौ नेत्रकोशयोः
पूरयेद् घृतमण्डेन विलीनेन सुखोदकैः १७०
सर्पिषा शतधौतेन क्षीरजेन घृतेन वा
निमग्नान्यक्षिपद्मानि यावत्स्युस्तावदेव हि १७१
पूरयेन्मीलिते नेत्रे तत उन्मीलयेच्छनैः
भिषग्भिरेष विख्यातस्तर्पणस्योदितो विधिः १७२
यद्रूक्षञ्च परिष्यन्दि नेत्रं कुटिलमाविलम्
शीर्णपद्मसिरोत्पातकृच्छ्रोन्मीलनसंयुतम् १७३
तिमिरार्जुनशुक्लाद्यैरभिष्यन्दाधिमन्थकैः
शुष्काक्षिपाकशोथाभ्यां युतं वातविपर्ययैः
तन्नेत्रं तर्पयेत्सम्यङ् नेत्ररोगविशारदः १७४
तर्पणं धारयेद्वर्त्मरोगे वाचां शतं बुधः
स्वस्थे कफे सन्धिरोगे वाचां पञ्च शतानि च १७५
षट्शतानि कफे कृष्णरोगे सप्त शतानि हि
दृष्टिरोगे शतान्यष्टावधिमन्थे सहस्रकम् १७६
सहस्रं वातरोगेषु धार्यमेव हि तर्पणम् १७७
पूर्णे चापाङ्गमार्गेण स्रावयित्वाऽक्षि शोधयेत्
स्विन्नेन यवपिष्टेन स्नेहवीर्येरितं ततः १७८
यथास्वं धूमपानेन कफमस्य विरेचयेत्
एकाहं वा त्र्यहं वापि पञ्चाहं तर्पणं चरेत् १७९
तर्पणे तृप्तिलिङ्गानि नेत्रस्यैतानि लक्षयेत्
सुखस्वप्नावबोधत्वं वैशद्यं नेत्रपाटवम्
निर्वृतिर्व्याधिशान्तिश्च क्रियालाघवमेव च १८०
गुर्वाविलमतिस्निग्धमश्रुकण्डूपदेहवत्
घर्षतोदयुतं नेत्रमतितर्पितमादिशेत् १८१

सास्रावशोफरोगाढ्यमुपदेहसमाकुलम्
रूक्षमस्रावमरुणं नेत्रं स्याद्धीनतर्पितम् १८२
अनयोर्दोषबाहुल्यात्प्रयतेत चिकित्सिते
रूक्षस्निग्धोपचाराभ्यामनयोः स्यात्प्रतिक्रिया १८३
दुर्दिनात्युष्णशीतेषु चिन्तायां संभ्रमेषु च
अशान्तोपद्रवे चाक्ष्णि तर्पणं न प्रशस्यते १८४
द्वे बिल्वे स्निग्धमांसस्य परद्रव्यपलं मतम्
द्रवस्य कुडवोन्मानं सर्वमेकत्र पेषयेत् १८५
तदेकत्र समालोड्य पत्रैः सुपरिवेष्टितम्
पुटपाकविधानेन तत्पक्त्वा तद्रसं बुधः १८६
तर्पणोक्तेन विधिना यथावदवधारयेत्
दृष्टिमध्ये निषेच्यः स्यान्नित्यमुत्तानशायिनः १८७
स्नेहनो लेखनश्चैव रोपणश्चेति स त्रिधा
हितः स्निग्धोऽतिरूक्षस्य स्निग्धस्य स तु लेखनः १८८
दृष्टेर्बलार्थमितरः पित्तासृग्व्रणवातनुत् १८९
स्नेहमांसवसामज्ज्ञमेदःस्वाद्यौषधैः कृतः
स्नेहनः पुटपाकः स्याद्धार्यो द्वे वाक्छते तु सः १९०
जाङ्गलानां यकृन्मांसैर्लेखनद्रव्यसंयुतैः
कृष्णलोहरजस्ताम्रशङ्खविद्रुमसिन्धुजैः १९१
समुद्रफेनकासीससस्रोतोऽजदधिमस्तुभिः
लेखनो वाक्छतं तस्य परं धारणमिष्यते १९२
स्तन्य जाङ्गलमध्वाज्यतिक्तद्रव्यविपाचितः
लेखनात्त्रिगुणो धार्यः पुटपाकस्तु रोपणः १९३
निम्बामृतावृषपटोलनिदिग्धिकाभिः
स्यात्पञ्चतिक्तक इति प्रथितो गणोऽयम् १९४
आचरेत्तर्पणोक्तां तु क्रियां व्यापत्तिदर्शने १९५
तेजांस्यनिलमाकाशमादर्शं भास्वराणि च
नेक्षेत तर्पिते नेत्रे यश्च वा पुटपाकवान् १९६
अथ सम्पक्वदोषस्य प्राप्तमञ्जनमाचरेत्
अञ्जनं क्रियते येन तद् द्रव्यं चाञ्जनं मतम् १९७

तत्प्रत्येकं त्रिधा प्रोक्तं लेखनं रोपणं तथा
स्नेहनं चेति लिङ्गानि तेषां विस्तरतः शृणु १९८
लेखनं क्षारतीक्ष्णाम्लरसैरञ्जनमुच्यते
नेत्रवर्त्मसिराजालश्रोत्रशृङ्गाटकस्थितम् १९९
मुखनासाऽक्षिभिर्दोषमुत्क्लिश्य स्रावयेच्च तत्
कषायं तिक्तकं चापि सस्नेहं रोपणं मतम् २००
स्नेहस्य शैत्याद्वरर्यं स्याद् दृष्टेश्च बलवर्द्धनम्
मधुरं स्नेहमण्डं तदञ्जनं स्यात्प्रसादनम् २०१
दृष्टिदोषप्रसादार्थं स्नेहनार्थञ्च तद्धितम्
हरेणुमात्रावर्त्तिस्तु लेखनी स्यात्प्रमाणतः २०२
सार्द्धहरेणुकमिता रोपणी वर्त्तिरिष्यते
क्रियते स्नेहनी वर्त्तिर्द्विहरेणुकमात्रया २०३
रसाञ्जनस्य मात्रा तु पिष्टवर्तिमिता मता
चूर्णं तु लेखनं वैद्यैर्द्विशलाकं प्रदीयते
रोपणं त्रिशलाकं स्याच्चतस्रः स्नेहनाञ्जने २०४
मुखयोर्मुकुलाकारा कलायपरिमण्डला
अष्टाङ्गुला शलाका स्यादश्मजा धातुजाऽथ वा २०५
ताम्रलोहाश्मसञ्जाता शलाका लेखने मता
सुवर्णरजतोद्भूता स्नेहने समुदाहृता २०६
अङ्गुली च मृदुत्वेन रोपणे सम्प्रयुज्यते
कृष्णभागावधिं लिम्पेदपाङ्गं यावदञ्जनम् २०७
हेमन्ते शिशिरे चैव मध्याह्नेऽञ्जनमिष्यते
पूर्वाह्णेवाऽपराह्णे वा ग्रीष्मे शरदि चेष्यते २०८
वर्षास्वनभ्रे नात्युष्णे वसन्ते तु सदैव हि
अथ वा सर्वदा प्रातः सायं वाऽञ्जनमाचरेत् २०९
नातिशीतोष्णवाताभ्रवेलायां तत्प्रयुज्यते
श्रान्तेऽथ रुदिते भीते पीतमद्ये नवज्वरे २१०
अजीर्णे वेगघाते च नाञ्जनं सम्प्रयुज्यते
रागोपदेहौ तिमिरं शूलं संरम्भमेव च २११
निद्राक्षयञ्च कुरुते निषिद्धे युक्तमञ्जनम् २१२

शङ्खनाभिर्बिभीतस्य मज्जा पथ्या मनः शिला
पिप्पली मरिचं कुष्ठं वचा चेति समांशकम् २१३
छागक्षीरेण सम्पिष्य वर्त्तिं कुर्याद्यवोन्मिताम्
हरेणुमात्रां सम्पिष्य जलैः कुर्याद्यथाऽञ्जनम् २१४
तिमिरं मांसवृद्धिञ्च काचं पटलमर्बुदम्
रात्र्यन्धं वार्षिकं पुष्पं वर्त्तिश्चन्द्रोदया हरेत् २१५
इति चन्द्रोदया वर्त्तिर्लेखनी
अशीतिस्तिलपुष्पाणि षष्टिः पिप्पलितण्डुलाः
जातीपुष्पाणि पञ्चाशन्मरिचानि तु षोडश २१६
सूक्ष्मं पिष्ट्वाऽम्बुना वर्त्तिः कृता कुसुमिकाऽभिधा
तिमिरार्जुनशुक्लानां नाशिनी मांसवृद्धिनुत्
एतस्या अञ्जने प्रोक्ता मात्रा सार्धहरेणुका २१७
धात्र्यक्षपथ्याबीजानि एकद्वित्रिगुणानि च
पिष्ट्वा वर्त्तिं जलैः कुर्यादञ्जनं द्विहरेणुकम् २१८
नेत्रस्त्रावं हरत्याशु वातरक्तरुजं तथा २१९
तुत्थमाक्षिकसिन्ध्त्थाः सिताशङ्खमनःशिलाः
गैरिकं सिन्धुफेनञ्च मरिचं चेति चूर्णयेत् २२०
संयोज्य मधुना कुर्यादञ्जनार्थं रसक्रियाम्
वर्त्मरोगार्मतिमिरकाचशुक्लहरीं पराम् २२१
रसाञ्जनं सर्जरसो जातिपुष्पं मनः शिला
समुद्रफेनो लवणं गैरिकं मरिचं तथा२२२
एतत्समांशं मधुना पिष्टं प्रक्लिन्नवर्त्मने
अञ्जनं क्लेदकण्डूघ्नं पक्ष्मणाञ्च प्ररोहणम् २२३
कतकस्य फलं घृष्ट्वा मधुना नेत्रमञ्जयेत्
ईषत्कर्पूरसहितं स्मृतं नेत्रप्रसादनम् २२४
दक्षाणडत्वक्छिलाकाचशङ्खचन्दनसैन्धबैः
अञ्जनं हरते नित्यं सर्वानक्षिगदान्बलात् २२५
शिलायां रसकं पिष्ट्वा सम्यगाप्लाव्य वारिणा
गृह्णीयात्तज्जलं सर्वं त्यजेच्चूर्णमधोगतम् २२६
शुष्कं तच्च जलं सर्वं पर्पटीसन्निभं भवेत्

विचूर्णय भावयेत्सम्यक्त्रिवेलं त्रिफलारसैः २२७
कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत्
अञ्जयेन्नयनं तेन सर्वदोषप्रशान्तये
समस्तनेत्ररोगघ्नं चूर्णमेतन्न संशयः २२८
अग्नितप्तं हि सौवीरं निषिञ्चेत्त्रिफलारसैः
सप्तवेलं तथा स्तन्यैः स्त्रीणां सिक्तं विचूर्णितम् २२९
अञ्जयेत्तेन नयने प्रत्यहं चक्षुषोर्हितम्
सर्वानक्षिविकारांस्तु हन्यादेतन्न संशयः २३०
गतदोषमपेताश्रु प्रपश्यत्सम्यगम्भसि
प्रक्षाल्याक्षि यथादोषं कार्यं प्रत्यञ्जनं ततः २३१
न वा निर्वातदोषेऽक्षिधावनं सम्प्रयोजयेत्
प्रत्यञ्जनं तत्रदद्याच्चूर्णं तीक्ष्णप्रसादनम् २३२
शुद्धे नागे द्रुते तुत्थं शुद्धं सूतं विनिक्षिपेत्
कृष्णाञ्जनं तयोस्तुल्यं सर्वमेकत्र चूर्णयेत् २३३
दशमांशेन कर्पूरं तस्मिञ्चूर्णे विनिक्षिपेत्
एतत्प्रत्यञ्जनं नेत्रगदजिन्नयनामृतम् २३४
त्रिफलाभृङ्गशुण्ठीनां रसैस्तद्वच्च सर्पिषा
गोमूत्रमध्वजाक्षीरैः सिक्तो नागः प्रतापितः २३५
तच्छलाका हरत्येव सर्वान्नेत्रभवान्गदान् २३६
इति भेषजानां विधानानि
भैषज्यमभ्यवहरेत्प्रभाते प्रायशो बुधः
कषायांस्तु विशेषेण तत्र भेदस्तु दर्शितः २३७
ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे नृणाम्
किञ्चित्सूर्योदये जाते तथा दिवसभोजने
सायन्तने भोजने च मुहुश्चापि तथा निशि २३८
प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः
लेखनार्थे च भैषज्यं प्रभातेऽनन्नमाहरेत् २३९
भैषज्यं विगुणेऽपाने भोजनाग्रे प्रशस्यते
अरुचौ चित्रभोज्यैश्च मिश्रं रुचिरमाहरेत् २४०
समानवाते विगुणे मन्देऽग्नावतिदीपनम्

दद्याद्भोजनमध्ये च भैषज्यं कुशलो भिषक् २४१
व्यानकोपेतु भैषज्यं भोजनान्ते समाहरेत्
हिक्काऽक्षेपककम्पेषु पूर्वमन्ते च भोजनात् २४२
उदाने कुपिते वाते स्वरभङ्गादिकारिणि
ग्रासग्रासान्तरे देयं भैषज्यं सान्ध्यभोजने २४३
प्राणे प्रदुष्टे सान्ध्यस्य भुक्तस्यान्ते प्रदीयते
औषधं प्रायशो धीरैः कालोऽय स्यात्तृतीयकः २४४
मुहुर्मुहुश्च तृट्छर्दिहिक्काश्वासगरेषु च
सायञ्च भेषजं दद्यादिति कालश्चतुर्थकः २४५
ऊर्ध्वजत्रुविकारेषु लेखने बृंहणे तथा
पाचने शमने देयमनन्नं भेषजं निशि २४६
वीर्याधिकं भवति भेषजमन्नहीनं हन्यात्तदामयमसंशयमाशु चैव
तद्बालवृद्धयुवतीमृदुभिश्च पीतं ग्लानिं परां नयति चाशु बलक्षयञ्च २४७
शीघ्रं विपाकमुपयाति बलं न हिंस्यादन्नावृतं न च मुहुर्वदनान्निरेति
एतद्धितं स्थविरबालकृशाङ्गनाभ्यः प्राग्भोजनाद्यदशितं किल तच्च तद्वत् २४८
औषधशेषे भुक्तं भोजनशेषे यदौषधं पीतम्
न करोति गदोपशमम्प्रकोपयत्यन्यरोगांश्च २४९
अनुलोमोऽनिलः स्वास्थ्यं क्षुत्तृष्णासुमनस्कताः
लघुत्वमिन्द्रियोद्गारशुद्धिर्जीर्णौषधाकृतिः २५०
क्लमो दाहोऽङ्गसदनं भ्रममूर्च्छाशिरोरुजाः
अरतिर्बलहानिश्च सावशेषौषधाकृतिः २५१
देवान्गुरूंस्तथा विप्रान्पूजयित्वा प्रणम्य च
आशिषश्च समादाय श्रद्धया भैषजं भजेत् २५२
रसायनमिवर्षीणां देवानाममृतं यथा
सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते २५३
ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः
देवाश्च सौषधिग्रामा भूमिदेवाश्च पान्तु वः २५४
औषधं हेमरजतमृद्भाजनपरिस्थितम्
पिबेदाप्तजनस्याग्रे प्रसन्नवदनेक्षणः २५५

प्रशान्तस्तूपविश्याथ पीत्वा पात्रमधोमुखम्
निक्षिप्याचम्य सलिलं ताम्बूलाद्युपयोजयेत् २५६

इति श्रीमिश्रलटकन तनय श्रीमन्मिश्रभाव विरचिते भावप्रकाशे
परिभाषादिप्रकरणे षष्ठं धूमपानादिविधिप्रकरणं समाप्तम्

अथ सप्तमं रोगिपरीक्षाप्रकरणम् ७

दर्शनस्पर्शनप्रश्नैस्तं परीक्षेत रोगिणम्
आयुरादि दृशा स्पर्शाच्छीतादि प्रश्नतः परम् १
मिथ्यादृष्टा विकारा हि दुराख्यातास्तथैव च
तथा दुष्परिदृष्टाश्च मोहयेयुश्चिकित्सकान् २
तत्र दर्शनं नेत्रजिह्वामूत्रादीनां कर्त्तव्यम्
नेत्रं स्यात्पवनाद्रूक्षं धूम्रवर्णं तथाऽरुणम्
कोटरान्तः प्रविष्टं च तथा स्तब्धविलोकनम् ३
हरिद्राखण्डवर्णं वा रक्तं वा हरितं तथा
दीपद्वेषिसदाहञ्च नेत्रं स्यात्पित्तकोपतः ४
चक्षुर्बलासबाहुल्यात्स्निग्धं स्यात्सलिलप्लुतम्
तथा धवलवर्णञ्च ज्योतिर्हीनं बलान्वितम् ५
नेत्रं द्विदोषबाहुल्यात्स्याद्दोषद्वयलक्षणम्
त्रिदोषलिङ्गसङ्गेन तं मारयति रोगिणम् ६
त्रिदोषदूषितं नेत्रमन्तर्मग्नं भृशं भवेत्
त्रिलिङ्गं सलिलस्रावि प्रान्तेनोन्मीलयत्यपि ७
शाकपत्रप्रभा रूक्षा स्फुटना रसनाऽनिलात्
रक्ता श्यावा भवेत्पित्ताल्लिप्तार्द्रा धवला कफात् ८
परिदग्धा खरस्पर्शा कृष्णा दोषत्रयेऽधिके
सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणा ९
वातेन पाण्डुरं मूत्रं रक्तं नीलञ्च पित्ततः
रक्तमेव भवेद्रक्ताद्धवलं फेनिलं कफात् १०
अथ शरीरस्य शैत्योष्णत्वादिज्ञानार्थं स्पर्शनं कार्यम्
पुंसो दक्षिणहस्तस्य स्त्रियो वामकरस्य तु
अङ्गुष्ठमूलगां नाडीं परीक्षेत भिषग्वरः ११

अङ्गुलीभिस्तु तिसृभिर्नाडीमवहितः स्पृशेत्
तच्चेष्टया सुखं दुःखं जानीयात्कुशलोऽखिलम् १२
सद्यःस्नातस्य सुप्तस्य क्षुत्तृष्णाऽतपशीलिनः
व्यायामश्रान्तदेहस्य सम्यङ् नाडी न बुध्यते १३
वातेऽधिके भवेन्नाडी प्रव्यक्ता तर्जनीतले
पित्ते व्यक्ता मध्यमायां तृतीयाङ्गुलिगा कफे १४
तर्जनीमध्यमामध्ये वातपित्ताधिके स्फुटा
अनामिकायां तर्जन्यां व्यक्ता वातकफे भवेत् १५
मध्यमाऽनामिकामध्ये स्फुटा पित्तकफेऽधिके
अङ्गुलित्रितयेऽपि स्यात्प्रव्यक्ता सन्निपाततः १६
वाताद्वक्रगतिं धत्ते पित्तादुत्प्लुत्य गामिनी
कफान्मन्दगतिर्ज्ञेया सन्निपातादतिद्रुता १७
वक्रमुत्प्लुत्य चलति धमनी वातपित्ततः
वहेद्वक्रञ्च मन्दञ्च वातश्लेष्माधिकत्वतः १८
उत्प्लुत्य मन्दं चलति नाडी पित्तकफेऽधिके
कामात्क्रोधाद्वेगवहा क्षीणा चिन्ताभयप्लुता १९
स्थित्वा स्थित्वा चलेद्या सा हन्ति स्थानच्युता तथा
अतिक्षीणा च शीता च प्राणान्हन्ति न संशयः २०
ज्वरकोपेन धमनी सोष्णावेगवती भवेत्
मन्दाग्नेः क्षीणधातोश्च सैव मन्दतरा मता २१
चपला क्षुधितस्य स्यात्तृप्तस्य भवति स्थिरा
सुखिनोऽपि स्थिरा ज्ञेया तथा बलवती मता २२
हेतुस्तदनु सम्प्राप्तिः पूर्वरूपञ्च लक्षणम्
तथैवोपशयः पञ्च रोगविज्ञानहेतवः २३
यत्तु न स्याद्विना येन तस्य तद्धेतुरुच्यते
शास्त्रे संव्यवहाराय तत्पर्यायान्प्रचक्ष्महे २४
निदानं कारणं हेतुर्निमित्तं च निबन्धनम्
मूलमायतनं तत्र प्रत्ययोऽपि निगद्यते २५
यथा दुष्टेन दोषेण यथा चानुविसर्पता
उत्पत्तिरामयस्यासौ सम्प्राप्तिर्जातिरागतिः २६

संख्याविकल्पप्राधान्यबलकालविशेषतः
साभिद्यते यथाऽत्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति २७
दोषाणां समवेतानां विकल्पोंऽशाशकल्पना २८
स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत् २९
हेत्वादिकात्स्न्र्यावयवैर्बलाबलविशेषणम् ३०
नक्तंदिनर्त्तुभुक्तांशैर्व्याधिकालो यथामलम् ३१
नक्तादेरंशेषु वातादिप्रकोप उक्तो वाग्भटेन
ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः
वयोऽहोरात्रभुक्तानामन्तमध्यादिगाः क्रमात् ३२ इति
ऋतुषु वातादिकोपो यथा
वर्षासु शिशिरे वायुः पित्तं शरदि चोष्णके
वसन्ते तु कफः कुप्येदेषा प्रकृतिरार्तवी ३३
पूर्वरूपन्तु तद्येन विद्याद्भाविनमामयम्
सामान्यं च विशिष्टञ्च द्विविधं तदुदाहृतम्
सामान्यं तत्र दोषाणां विशेषैरनधिष्ठितम्
विशिष्टमीषद्व्यक्तं स्याद्विशेषैश्च समन्वितम् ३४
पूर्वरूपं विशिष्टं यद्व्यक्तं तल्लक्षणं स्मृतम्
संस्थानं लिङ्गं चिह्नञ्च व्यञ्जनं रूपमाकृतिः ३५
औषधान्नविहाराणामुपयोगं सुखावहम्
नृणामुपशयं विद्यात्सहि सात्म्यमिति स्मृतः ३६
मधुरलवणसाम्लस्निग्धनस्योष्णनिद्रागुरुरविकरवस्तिस्वेदसंमर्दनानि
दधिघृततिलतैलाभ्यङ्गसन्तर्पणानिप्रकुपितपवमानं शान्तमेतानि कुर्य्युः ३७
तिक्तस्वादुकषायशीतपवनच्छायानिशावीजनं
ज्योत्स्नाभूगृहयन्त्रवारिजलजं स्त्रीगात्रसंस्पर्शनम्
सर्पिःक्षीरविरेकसेकरुधिरस्रावप्रदेहादिकं
पानाहारविहारभेषजमिदं पित्तप्रशान्तिं नयेत् ३८
रूक्षक्षारकषायतिक्तकटुकव्यायामनिष्ठीवनं
धूमात्युष्णशिरोविरेकवमनस्वेदोपवासादिकम्
तृड्वाताध्वनियुद्धजागरजलक्रीडाऽङ्गनासेवनं-
पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं हरेत् ३९

सर्वेषामेव रोगाणां निदानं कुपिता मलाः
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ४०
नीवारस्त्रिपुटः सतीनचणकश्यामाकमुद्गाढकी
निष्पावाश्च मकुष्ठकश्चवरटी मङ्गल्यकः कोद्रवः
यद् द्रव्यं कटुकं सतिक्ततुवरं शीतञ्च रूक्षं लघु-
स्वल्पाशो विषमाशनं निरशनं भुक्तेह्यजीर्णेऽशनम् ४१
भुक्तं जीर्णतरं परिश्रमभरोगर्त्तादिकोष्णं ल्लिंा घनं-
बाहुभ्यांतरणं तरोः प्रपतनं मार्गेऽतियानं पदा
दराडादिप्रहृतिस्तथोच्चपतनं धातुक्षयो जागरो-
मार्गस्यावरणंव्यवायभृशता वातादिवेगाहतिः ४२
अत्यर्थं वमनं विरेचनमतिस्त्रावोऽधिकश्चासृजो-
रोगान्मांसविहीनताऽतिमदनश्चिन्ता च शोको भयम्
वर्षा वै शिशिरो दिनस्य रजनेर्भागौ तृतीयौ घनाः
प्राग्वातस्तुहिनं शरीरमरुतो दुष्टेरमी हेतवः ४३
कट्वम्लोष्णविदाहितीक्ष्णलवणक्रोधोपवासातप-
स्त्रीसम्भोगतृषाक्षुधाऽभिहननव्यायाममद्यादिभिः
भुक्ते जीर्यति भोजने च शरदि ग्रीष्मे तथा प्राणिनां
मध्याह्ने च तथाऽधरात्रिसमये पित्तप्रकोपो भवेत् ४४
विदाहिद्रव्यमुद्गारमम्लं कुर्यात्तथा तृषाम्
हृद्विदाहञ्च जनयेत्पाकं गच्छति तच्चिरात् ४५
माषैस्तिलैः कुलत्थैश्च मत्स्यैर्मेषामिषेण च
गव्येन दधितक्रेण नृणां पित्तं प्रकुप्यति ४६
गुरुपटुमधुराम्लस्निग्धमाषैस्तिलैश्च द्रवदधिदिननिद्राशीतसर्पिः प्रपूरैः
प्रथमदिवसभागे रात्रिभागेऽपि चाद्येभवति हि कफकोपो भुक्तमात्रे वसन्ते
४७
निदानार्थकरो रोगो रोगस्याप्युपलक्ष्यते ४८
कश्चिद्धि रोगो रोगस्य हेतुर्भूत्वा प्रशाम्यति ४९
न प्रशाम्यति चाप्यन्यो हेत्वर्थं कुरुतेऽपि च ५०
अत्यन्तकुत्सितावेतौ सदा स्थूलकृशौ नरौ
श्रेष्ठो मध्यशरीरस्तु स्थूलः क्षीणो न पूजितः

कर्षयेद् बृंहयेच्चापि सदा स्थूलकृशौ नरौ
रक्षणञ्चापि मध्यस्य कुर्वीत कुशलो भिषक् ५१
क्षपयेद् बृंहयेच्चापि दोषधातुमलान्भिषक्
नरो रोगान्वितो यावद्रोगेण रहितो भवेत् ५२
अस्वस्थो येन विधिना स्वस्थो भवति मानवः
तमेव कारयेद्वैद्यो यतः स्वास्थ्यं सदेप्सितम् ५३
समदोषः समाग्निश्च समधातुमलक्रियः
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ५४
विण्मूत्राखिलदोषधातुसमता काङ्क्षाऽन्नपाने रुचि-
र्भुक्तं जीर्यति पुष्टये परिणतिः स्वप्नावबोधौ सुखम्
गृह्णीते विषयान्यथास्वमुचितान्वृत्तिं मनोवृत्तितः
स्वस्थस्याभिहितं चतुर्दशविधं जन्तोरिदं लक्षणम् ५५
तत्तद्वृद्धिकराहारविहारातिनिषेवणात्
दोषधातुमलानां हि वृद्धिरुक्ता भिषग्वरैः ५६
वाते वृद्धे भवेत्काश्र्यं पारुष्यं चोष्णकामिता
गाढं मलं बलञ्चाल्पं गात्रस्फूर्त्तिर्विनिद्रता
विण्मूत्रनेत्रगात्राणां पीतत्वं क्षीणमिन्द्रियम्
शीतेच्छातापमूर्च्छाःस्युः पित्ते वृद्धेऽल्पमूत्रता ५७
विडादिशौक्ल्यं शीतत्वं गौरवञ्चातिनिद्रता
सन्धिशैथिल्यमुत्क्लेदो मुखसेकः कफेऽधिके ५८
रसे वृद्धेऽन्नविद्वेषो जायते गात्रगौरवम्
लालाप्रसेकश्छर्दिश्च मूर्च्छा सादो भ्रमः कफः ५९
प्रवृद्धं रुधिरं कुर्याद् गात्रमारक्तवर्णकम्
लोचनञ्च तथा रुक्तं सिराः पूरयतेऽपि च ६०
रक्तन्तु कुरुते वृद्धं विसर्पप्लीहविद्रधीन्
कुष्ठं वातास्रकं गुल्मं सिरापूर्णत्वकामले ६१
गात्राणां गौरवं निद्रा मदो दाहश्च जायते
व्यङ्गाग्निसादसंमोहरक्तत्वङ्नेत्रमूत्रताः ६२
गुदमेढ्रास्यपाकार्शःपिडकामशकास्तथा
इन्द्रलुप्ताङ्गमर्दासृग्दरास्तापं कराङ्घ्रिषु ६३

शमयेद्रक्तवृद्ध्युत्थान् रक्तस्रुतिविरेचनैः
मांसं वृद्धन्तु गण्डौष्ठस्फिगुपस्थोरुवाहुषु
जङ्घयोः कुरुते वृद्धिं तथा गात्रस्य गौरवम् ६४
उदरे पार्श्वयोर्वृद्धिः कासश्वासादयस्तथा
दौर्गन्ध्यं स्निग्धता गात्रे मेदोवृद्धौ भवेदिति ६५
प्रवृद्धं कुरुते मेदः श्रममल्पेऽपि चेष्टिते
तृट्स्वेदगलगण्डौष्ठरोगमेहादिजन्म च ६६
श्वासं स्फिग्जठरग्रीवास्तनानां लम्बनं तथा
वृद्धान्यस्थीनि कुर्वन्ति अस्थीन्यन्यानि चास्थिषु ६७
आचरन्ति तथा दन्तान्विकटान्महतस्तथा
मज्ञा वृद्धः समस्ताङ्गनेत्रगौरवमाचरेत् ६८
शुक्राश्मरी शुक्रवृद्धौ शुक्रस्यातिप्रवर्त्तनम्
मलप्रवृद्धावाटोपो जायते जठरे व्यथा ६९
मूत्रे वृद्धे मुहुर्मूत्रमाध्मानं वस्तिवेदना
स्वेदे वृद्धे तु दौर्गन्ध्यं त्वचि कण्डूश्च जायते ७०
आर्त्तवातिप्रवृत्तिः स्याद्दौर्गन्ध्यं चार्त्तवे भवेत्
अङ्गमर्दश्च जायेत लिङ्गं स्यादार्त्तवेऽधिके ७१
स्तनयोरतिपीनत्वं क्षीरस्रावो मुहुर्मुहुः
तोदश्च तत्र भवति स्तन्याधिक्यस्य लक्षणम् ७२
उदरादिप्रवृद्धिस्तु वृद्धे गर्भेऽभिजायते
स्वेदश्च गर्भवत्याः स्यात्प्रसवे व्यसनं महत् ७३
तत्तद्ध्रासकराहारविहारपरिषेवणात्
दोषधातुमलानां हि ह्रासो निगदितो नृणाम् ७४
पूर्वः पूर्वोऽतिवृद्धत्वाद्वर्द्धयेद्धि परस्परम्
तस्मादतिप्रवृद्धानां धातूनां ह्रासनं हितम् ७५
असात्म्यान्नसदाक्रोधशोकचिन्ताभयश्रमै
अतिव्यवायानशनात्यर्थसंशोधनैरपि ७६
वेगानां धारणाच्चापि साहसादविघाततः
दोषाणामथ धातूनां मलानाञ्च भवेत्क्षयः ७७
वातक्षयेऽल्पचेष्टत्वं मन्दवाक्यं विसंज्ञता

पित्तक्षयेऽधिकः श्लेष्मा वह्निमान्द्यं प्रभाक्षयः ७८
सन्धयः शिथिला मूर्च्छा रौक्ष्यं दाहः कफक्षये
हृत्पीडा कण्ठशोषौत्वक्शून्यातृट् च रसक्षये ७९
सिराः श्लथा हिमाम्लेच्छा त्वक्पारुष्यं क्षयेऽसृजः
गण्डौष्ठकन्धरास्कन्धवक्षोजठरसन्धिषु ८०
उपस्थशोथपिण्डीषु शुष्कता गात्ररूक्षता
तोदो धमन्यः शिथिला भवेयुर्मांससंक्षये ८१
प्लीहाभिवृद्धिः सन्धीनां शून्यता तनुरूक्षता
प्रार्थना स्निग्धमांसस्य लिङ्गं स्यान्मेदसः क्षये ८२
अस्थिशूलं तनौ रौक्ष्यं नखदन्तत्रुटिस्तथा
अस्थिक्षये लिङ्गमेतद्वैद्यैः सर्वैरुदाहृतम् ८३
शुक्राल्पत्वं पर्वभेदस्तोदः शून्यत्वमस्थिनि
लिङ्गान्येतानि जायन्ते नराणां मज्जसंक्षये ८४
शुक्रक्षये रतेऽशक्तिर्व्यथा शेफसि मुष्कयोः
चिरेण शुक्रसेकः स्यात्सेके रक्ताल्पशुक्रता ८५
ओजः संक्षीयते कोपाच्चिन्ताशोकश्रमादिभिः
रूक्षतीक्ष्णोष्णकटुकैः कर्षणैरपरैरपि ८६
बिभेति दुर्बलोऽभीक्ष्णं चिन्तयेद्व्यथितेन्द्रियः
अभ्युत्थायोन्मना रूक्षः क्षामः स्यादोजसः क्षये ८७
पुरीषस्य क्षये पार्श्वे हृदये च व्यथा भवेत्
सशब्दस्यानिलस्योर्ध्वगमनं कुक्षिसंवृतिः ८८
मूत्रक्षयेऽल्पमूत्रत्वं वस्तौ तोदश्च जायते
स्वेदनाशस्त्वचो रौक्ष्यं चक्षुषोरपि रूक्षता ८९
स्तब्धाश्च रोमकूपाः स्युर्लिङ्गं स्वेदक्षये भवेत्
आर्त्तवस्य स्वकाले चाभावस्तस्याल्पताऽथ वा ९०
जायते वेदना योनौ लिङ्गं स्यादार्त्तवक्षये
अभावः स्वल्पता वा स्यात्स्तन्यस्य भवतस्तथा ९१
ग्लानौ पयोधरावेतल्लक्षणं स्तन्यसंक्षये
अनुन्नतो भवेत्कुक्षिर्गर्भस्यास्पन्दनं तथा
इति गर्भक्षये प्राज्ञैर्लक्षणं समुदाहृतम् ९२

तत्तत्संवर्द्धनाहारविहारातिनिषेवणात्
तत्तत्प्राप्य नरः शीघ्रं तत्तत्क्षयमपोहति ९३
ओजस्तु वर्द्धते नृणां सुस्निग्धैः स्वादुभिस्तथा
वृष्यैरन्यैर्विशेषात्तु क्षीरमांसरसादिभिः ९४
दोषधातुमलक्षीणो बलक्षीणोऽपि मानवः
तत्तत्संवर्द्धनं यत्तदन्नपानं प्रकाङ्क्षति ९५
यद्यदाहारजातन्तु क्षीणः प्रार्थयते नरः
तस्य तस्य स लाभेन तत्तत्क्षयमपोहति ९६
कषायकटुतिक्तानि रूक्षशीतलघूनि च
यवमुद्गप्रियङ्गूंश्च वातक्षीणोऽभिकाङ्क्षति ९७
तिलमाषकुलत्थादिपिष्टान्नविकृतिं तथा
मस्तुशुक्ताम्लतक्राणि काञ्जिकञ्चतथा दधि ९८
कट्वम्ललवणोष्णानि तीक्ष्णं क्रोधं विदाहि च
समयं देशमुष्णञ्च पित्तक्षीणोऽभिकाङ्क्षति ९९
मधुरस्निग्धशीतानि लवणाम्लगुरूणि च
दधि क्षीरं दिवास्वप्नं कफक्षीणोऽभिकाङ्क्षति १००
रसक्षीणो नरः काङ्क्षत्यम्भोऽतिशिशिरं मुहुः
रात्रिनिद्रां हिमं चन्द्रं भोक्तुञ्च मधुरं रसम् १०१
इक्षुं मांसरसं मन्थं मधु सर्पिर्गुडोदकम् १०२
द्राक्षादाडिमशुक्तानि सस्नेहलवणानि च
रक्तसिद्धानि मांसानि रक्तक्षीणोऽभिकाङ्क्षति १०३
अन्नानि दधिसिद्धानि षाडवांश्च बहूनपि
स्थूलक्रव्यादमांसानि मांसक्षीणोऽभिकाङ्क्षति १०४
मेदः सिद्धानि मांसानि ग्राम्यानूपौदकानि च
सक्षाराणि विशेषेण मेदःक्षीणोऽभिकाङ्क्षति १०५
अस्थिक्षीणस्तथा मांसं मज्जास्थिस्नेहसंयुतम्
स्वाद्वम्लसंयुतं द्रव्यं मज्जाक्षीणोऽभिकाङ्क्षति १०६
शिखिनः कुक्कुटस्याण्डं हंससारसयोस्तथा
ग्राम्यानूपौदकानाञ्च शुक्रक्षीणोऽभिकाङ्क्षति १०७
यवान्नं यवकान्नञ्च शाकानि विविधानि च

मसूरमाषयूषञ्च मलक्षीणोऽभिकाङ्क्षति १०८
पेयमिक्षुरसं क्षीरं सगुडं बदरोदकम्
मूत्रक्षीणोऽभिलषति त्रपुसैर्वारुकाणि च १०९
अभ्यङ्गोद्वर्त्तने मद्यं निवातशयनासने
गुरु प्रावरणं चैव स्वेदक्षीणोऽभिकाङ्क्षति ११०
कट्वम्ललवणोष्णानि विदाहीनि गुरूणि च
फलशाकानि पानानि स्त्री काङ्क्षत्यार्त्तवक्षये १११
सुराशाल्यन्नमांसानि गोक्षीरं शर्करां तथा
आसवं दधि हृद्यानि स्तन्यक्षीणाऽभिवाञ्छति ११२
मृगाजाविवराहाणां गर्भान्वाञ्छति संस्कृतान्
वसाशूल्यप्रकारादीन्भोक्तुं गर्भपरिक्षये ११३
रसादिशुक्रपर्य्यन्तं धातुपुष्टिनिमित्तकम्
चेष्टासु पाटवं यत्तु बलं तदभिधीयते ११४
अभिघाताद्भयात्क्रोधाच्चिन्तया च परिश्रमात्
धातूनां संक्षयाच्छोकाद्बलं संक्षीयते नृणाम् ११५
गौरवं स्तब्धता गात्रे मुखम्लानिर्विवर्णता
तन्द्रा निद्रा वातशोथो बलव्यापत्तिलक्षणम् ११६
दोषसाम्यकरं यत्तु बह्निसाम्यकरं च यत्
धातुपुष्टिकरं द्रव्यं बलं तदभिवर्द्धयेत् ११७
कृशोऽपि बलवान्कश्चित् स्थूलोऽत्यल्पबलो यतः
तस्माच्चेष्टापटुत्वेन बलवन्तं विदुर्बुधाः ११८
इति श्रीमिश्रलटकन तनय श्रीमन्मिश्रभाव विरचिते श्रीभावप्रकाशे पूर्वखण्डे
परिभाषादिप्रकरणे सप्तमं रोगिपरीक्षाप्रकरणं समाप्तम् ७
इति पूर्व खण्डं समाप्तम्

Bhāva Prakāśha, by Bhav Mishra, edited by Brahmashankar Mishra, 1969 edition.
Typed by Pramod Sharma, M.A.
Proofread by Maya Nand Sastri, Ved Vyakaranacharya.
Font conversion by Claude Setzer and Ralph Bunker.
Formatted for Maharishi University of Management Vedic Literature Collection